# हेत्वाभाससामान्यनिरुक्तौ

# गदाधर-जगदीशयोर्मतवैशिष्ट्यपर्यालोचनम्

यादवपुरविश्वविद्यालयस्य संस्कृतसंकाये
२०१६वर्षे
'पि-एइच्.डि.' इत्युपाधिलाभाय समायोजितोऽयं शोधनिबन्धः


शोधनिबन्धकारः

**अञ्जन-दासः**

शोधविद्यार्थी संस्कृतसंकायस्य
यादवपुरविश्वविद्यालयस्य

निर्देशकाः

**अध्यापकाः ड. तपनशङ्करभट्टाचार्य्याः**

संस्कृतसंकायाध्यक्षा
यादवपुरविश्वविद्यालयस्य

# HETVĀBHĀSASĀMĀNYANIRUKTAU

# GADĀDHARA-

# JAGADĪŚAYORMATAVAIŚIṢṬYAPARYĀLOCANAM

The thesis paper is submitted for the Ph.D. degree in the year 2016 of the Department of Sanskrit, Jadavpur University, Kolkata.


Prepared & Submitted by

**Anjan Das**

Ph.D. Research Scholar,

Department of Sanskrit
Jadavpur University



Supervisor:

**Prof. Dr. Tapan Sankar Bhattacharyya**

Head, Department of Sanskrit,

Jadavpur University

# Certified that the Thesis entitled

**'हेत्वाभाससामान्यनिरुक्तौ गदाधर-जगदीशयोर्मतवैशिष्ट्यपर्यालोचनम्'**

submitted by me for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my work carried out under the Supervision of Prof. Dr. Tapan Sankar Bhattacharyya, Head, Department of Sanskrit, Jadavpur University, Kolkata and that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere/ elsewhere.

Countersigned by Suprevisor

Dated:

Signature of the Candidate

Dated:

# कार्तज्ञ्यज्ञापनम्

अनुसन्धानात्मकस्य तपसोऽस्य सम्पूत्यर्थं विषयवचनकालाद् ग्रन्थसमाप्तिं यावद्यैः समागतान् निखिलान् विघ्नान् विदूरीकृत्य मम शोधनिबन्धे भूयसी सहायताकारि तेभ्यो सश्रद्धं प्रणत्यादिकं विज्ञाप्यतेऽस्मिन् समये ।

ये स्वीयममूल्यं समयमविगणय्य मां सर्वदा व्याकरण-न्यायशास्त्रमध्याप्य पुनः स्वाधीनतया शोधकार्येऽनुमतिं प्रदायानुगृहीतवन्तस्तान् पण्डितान् सात्त्विकब्राह्मणान् अञ्जनार्कान् अध्यापकतपनशङ्करभट्टाचार्य्यान्मुहुर्मुहुः प्रणमामि ।

"गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।

गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः॥" इति वचनं यं प्रति सर्वदैव यथायथं प्रयुक्तं भवति, स हि मम नव्यन्यायशास्त्रस्याराध्यदेवः अध्यापको नव्यनैयायिकः श्यामापदकरमहोदयः। यस्य निरन्तरप्रचेष्टया मद्वद् अञ्जनोऽपि निरञ्जनो भवितुमर्हति इति तेनैव सर्वदा ईरितम् । तं प्रति मम साष्टाङ्गप्रणामः।

अपि च, न्यायशास्त्रप्रवेशे यस्यावदानं तथा यस्याशीर्वादं विना ममाज्ञानं दूरीभूतं नाभविष्यत्, यत्प्रसादान्मादृशो बालोऽपि सर्वदैव न्यायमार्गमतिदुरूहं मन्यमानः केवलं गुरुमन्त्रं हृदि निधाय तत्समुद्रमतिक्रमति । स हि व्याकरणन्यायादिशास्त्रेषु अकुण्ठितमतिशक्तिः अध्यापकः शेखसाबिर-आलिमहाभागः। समयेऽस्मिन् तं प्रति मम सश्रद्धप्रणामः –

"ॐ अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥" इति ।

पुनश्च, ये महामानसा मदीयपठनपाठनविषये भविष्यज्जीवनस्य च चलनविषये सर्वदैव सदुपदेशेन प्रोत्साहितवन्तस्तेभ्योऽध्यापकेभ्यो ड. सत्यव्रतपाहाडीमहोदयेभ्यः अध्यापकदुर्गाशंकरचक्रवर्तिमहाभागेभ्यश्च चिरमधमर्णोऽहं सश्रद्धं प्रणतिततीस्तथा स्वकार्तज्ञ्यं विज्ञापयामि ।

बेलुडमठस्थस्य रामकृष्णमिशन्विद्यामन्दिरस्य विभागीयाध्यापकाः विप्लव-अग्रजाः, सन्न्यासिनः गुरुकृपानन्दपादाः (डाक्तारमहाराजाः), यज्ञधरानन्दपादाः (सुनिलमहाराजाः), रामकृष्णमिशन्विद्यामन्दिरस्याध्यक्षाः शास्त्रज्ञानन्दपादाः (सञ्जीवमहाराजाः) च छात्रवात्सल्येन वारिधिपारावारे सौविध्यमकल्पयन् । एतदर्थं तेभ्यः सकार्तज्ञ्यं धन्यवादान् विज्ञापयामि । प्राध्यापकेभ्यः, प्राध्यापिकाभ्यः, विविधग्रन्थालयाध्यक्षेभ्यः, कर्मचारिभ्यश्च सविनयं कृतज्ञतां विनिवेदयामि ।

शोधकार्येऽस्मिन् मम प्रातःस्मरणीयाराध्यदेव्या मातुः श्रीमत्यायमुनादासस्य, भ्रातुः पार्थस्य, अनुजायाः दासोपाह्वायाः टगर्या, प्रियपियालीमण्डलस्य च सर्वदा ऐकान्तिकी उत्साहप्रदानप्रचेष्टोल्लेखार्हा । तेषां निरामयशरीरं दीर्घसुखञ्च ईश्वरं प्रार्थये।

एतदनुसन्धानात्मककार्यं सम्पादयितुं मम प्रियाग्रजस्य तथा आचार्यस्य सन्तुसिःहस्य, अग्रजस्वरूपसिंहस्य, अग्रजशुभ्रजित्सेनस्य, अग्रजतापससाहेत्यस्य, विद्यामन्दिरस्य छात्राणां (शम्भु-अनिमेष-सन्दिप-सौरभ-शौभिक-विनय-सुब्रत-पार्थसारथि-चिरञ्जित्-दीपकानाम्) यत्साहाय्यं मया प्राप्तं तत्सर्वं स्मारं स्मारं सम्प्रत्यनुसन्धानतपःपूर्तिवेलायां तेभ्यो भूयो भूयो मनसा वाचा बुद्ध्या च हार्दिकान् धन्यवादान् निवेदयामि ।

किञ्च रामकृष्णन्मिशविद्यामन्दिरस्य, यादवपुरविश्वविद्यालयस्य च ग्रन्थागाराद् ग्रन्थाः स्वीकृता इति ग्रन्थागाराणामध्यक्षेभ्यःस्तथा कर्मचारिभ्यः सर्वेभ्यः स्वकार्तज्ञ्यं धन्यवादांश्च विनिवेदयामि ।

धर-ब्रादार्स्-इत्यनेनानुसन्धानप्रबन्धस्यास्य ग्रन्थरूपेण मुद्रापणमकारीति तदधिकारिभ्यः कृतवेदितां विज्ञाप्य श्रीरामकृष्ण-सारदादेवी-स्वामिविवेकानन्दपादाः समासां भूततततीनां समस्तसन्मङ्गलानि साधयन्त्विति भूयो भूयः सम्प्रार्थ्य तेभ्यश्च साष्टाङ्गप्रणतिततिं विनिवेद्य विरमामि ।

दिनाङ्कः – २९/०८/२०१६

विनीतस्य विदुषां वशंवदस्य

अञ्जन-दासस्य

# ग्रन्थसङ्केताः

| | | |
|---|---|---|
| अ.को. | - | अमरकोषः |
| अ.शा. | - | अर्थशास्त्रम् |
| का.व. | - | कारिकावली |
| का.सं. | - | कात्यायनसंहिता |
| छा.उ. | - | छान्दोग्योपनिषद् |
| त.चि. | - | तत्त्वचिन्तामणिः |
| त.भा. | - | तर्कभाषा |
| त.सं. | - | तर्कसंग्रहः |
| ता.र. | - | तार्किकरक्षा |
| द.शा.इ. | - | दर्शनशास्त्रस्येतिहासः |
| न.म. | - | नवद्वीप महिमा |
| न्या.कु. | - | न्यायकुसुमाञ्जलिः |
| न्या.द. | - | न्यायदर्शनम् |
| न्या.प. | - | न्यायपरिचयः |
| न्या.म. | - | न्यायमञ्जरी |

| | | |
|---|---|---|
| न्या.र. | - | न्यायरत्नम् |
| न्या.सू. | - | न्यायसूत्रम् |
| न्या.सू.वृ. | - | न्यायसूत्रवृत्तिः |
| न्या.वा. | - | न्यायवार्तिकम् |
| प्र.पा.भा. | - | प्रशस्तपादभाष्यम् |
| बृह.उ. | - | बृहदारण्यकोपनिषद् |
| भा.प. | - | भाषापरिच्छेदः |
| भा.पु. | - | भागवतपुराणम् |
| म.स्मृ. | - | मनुस्मृतिः |
| मा.मे.द. | - | मानमेयोदयः |
| मी.द. | - | मीमांसादर्शनम् |
| या.स्मृ. | - | याज्ञवल्क्यस्मृतिः |
| यो.सू. | - | योगसूत्रम् |
| व.न.न्या.च. | - | वङ्गे नव्यन्यायचर्चा |
| वा.प. | - | वाक्यपदीयम् |
| वै.सू. | - | वैशेषिकसूत्रम् |
| व्या.प. | - | व्याप्तिपञ्चकम् |
| स.द.सं. | - | सर्वदर्शनसंग्रहः |

| | | |
|---|---|---|
| स.प. | - | सप्तपदार्थी |
| सा.नि. | - | सामान्यनिरुक्तिः |
| सा.नि.जा. | - | सामान्यनिरुक्तिजागदीशी |
| सा.नि.प्र. | - | सामान्यनिरुक्तिप्रकरणम् |
| सा.सू. | - | सांख्यसूत्रम् |

# सूचीपत्रम्


| *विषयः* | | *पत्राङ्कः* |
| --- | --- | --- |
| **उपोद्घातः** | | १३ |
| **प्रथमोऽध्यायः –** | विवक्षिताचार्याणां परिचयः | ४३ |
| | १.१) गङ्गेशोपाध्यायः | ४७ |
| | १.२) रघुनाथशिरोमणिः | ५२ |
| | १.३) जगदीशतर्कालंकारः | ६३ |
| | १.४) गदाधरभट्टाचार्यः | ६६ |
| **द्वितीयोऽध्यायः –** | सङ्गतिविवेकः | ७१ |
| | २.१) हेत्वाभासनिरूपणे सङ्गतिनिरूपणम् | ८४ |
| | २.२) सङ्गतिप्रदर्शने दीधितिकारमतम् | ९० |
| | २.३) 'सपरिकर'पदविवेकः | ९२ |
| | २.४) 'तत्त्वनिर्णय'पदविवेकः | ९५ |
| | २.५) 'विजयप्रयोजकत्व'पदविवेकः | ९८ |
| **तृतीयोऽध्यायः –** | प्रथमहेत्वाभाससामान्यलक्षणविवेकः | १०० |
| | ३.१) 'अनुमिति'पदविवेकः | १०३ |

३.२) 'यथार्थ'पदविवेकः ११७

**चतुर्थोऽध्यायः –** द्वितीयहेत्वाभाससामान्यलक्षणविवेकः १३३

४.१) 'लिङ्गमविवक्षितमि'ति कल्पविवेकः १३३

४.२) 'यद्विषयकत्व'पदार्थविवेकः १४५

४.३) 'अव्यापकविषयिताशून्यत्वनिवेश'कल्पविवेकः १५२

४.४) 'विशिष्टान्तराघटितत्वनिवेश'कल्पविवेकः १६४

४.५) 'न-च-चतुष्टय' इति कल्पविवेकः १७२

४.६) 'अत्र वदन्ति' इति कल्पविवेकः १८२

**पञ्चमोऽध्यायः –** तृतीयहेत्वाभाससामान्यलक्षणविवेकः १९१

५.१) 'दशाविशेष'कल्पविवेकः १९२

५.२) निष्कर्षतमं लक्षणम् १९६

५.३) प्रकारभेदः १९९

**षष्ठोऽध्यायः –** आचार्यकृतहेत्वाभासलक्षणस्योत्कर्षविवेकः २१२

**उपसंहृतिः** २२७

**मूलचिन्तामणिः** २३१

**सहायकग्रन्थपञ्जी** २३३

प्रणम्य मातरौ गुरून्स्वयम्भुवं नमामि च ।
तत्प्रसादादन्वेषणापत्रमिदं विरच्यते ॥

# उपोद्घातः

**"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"**[1] इति श्रुतिवचनमवलम्ब्य वक्तुं शक्यते यद् आदौ प्रतिपाद्यविषयस्य श्रवणं भवेत्तदनन्तरं तद्विषये मननं कर्तव्यं, तदनन्तरञ्च तन्मननविषये निदिध्यासनेन साक्षात्कारः करणीयः। आत्मतत्त्वसाक्षात्कारो स्वात्मगोचरमिथ्याज्ञानोन्मूलद्वारा तत्त्वसाक्षात्कार एव मोक्षः। वस्तुतस्तु यद्विषयकः साक्षात्कारो मोक्षजनकः, तद्विषयकं मननं मोक्षोपयोगि । अत एव आत्मगोचरं मननमुपयुज्यते । वस्तुतस्तु उक्तश्रुतिवाक्ये 'मन्तव्यः' इति पदेन मननं तथा अनुमानमेव बुध्यते । श्रुतिवाक्यस्यास्य व्याख्यानेऽपि शङ्कराचार्यैर्भणितमेवम् — **"आत्मा वै अरे द्रष्टव्यो दर्शनार्हः, दर्शनविषयमापादयितव्यः; श्रोतव्यः पूर्वमाचार्यतः आगमतश्च; पश्चान्मन्तव्यः तर्कतः; ततो निदिध्यासितव्यः निश्चयेन ध्यातव्यः"**[2] इति । उदयनाचार्यैरपि समुच्चारितम्—

**"न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।**
**उपासनैव क्रियते श्रवणानन्तरागता ॥"**[3] इति ।

अतः अनुमानस्यावश्यकता सर्वैः निर्विवादं स्वीकृता । अनुमानं नाम अनुमितेः करणम् । तन्निरूपणं मोक्षाधिगमसाधनम् । अत एव अनुमितेर्जनको हेतुः। व्याप्तिबलाद् बलीयान् सन् योऽर्थं ज्ञापयति स हि हेतुः। अत्रेदमवधेयं यत् हेतुः

---

[1] बृह. उ. – ४/५/६

[2] तदेव

[3] न्या.कु. – १/४

लिङ्गपदेन परिचीयते। तदुक्तं तर्कभाषायाम् – **"व्याप्तिबलेनार्थगमकं लिङ्गम्"**[4] इति। प्रशस्तपादाचार्यैः लिङ्गलक्षणं लक्षितम् –

**"लिङ्गं पुनः यदनुमेयेन सम्बन्धं प्रसिद्धञ्च तदन्विते।**
**तदभावे च नास्त्येव तल्लिङ्गमनुमापकम्॥"**[5] इति।

अनुमितिजनकलिङ्गमिदं त्रिविधं केवलान्वयि, केवलव्यतिरेकि, अन्वयव्यतिरेकि च।

अन्वयमात्रव्याप्तिकं केवलान्वयि। तदुदाहरणं हि शब्दोऽभिधेयः प्रमेयत्वाद् घटवत्। अत्र प्रमेयत्वं हि हेतुः, साध्यञ्च अभिधेयत्वमिति। अत एव यत्र यत्र हेतुः तत्र तत्र साध्यमिति रीत्या यत्र यत्र प्रमेयत्वं तत्र तत्र अभिधेयत्वमिति अन्वयव्याप्त्या केवलान्वयि व्याप्तिग्रहो भवति।

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्, यदितरेभ्यो न भिद्यते न तद्गन्धवत्, यथा जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र यद् गन्धवत् तदितरभिन्नमिति अन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात् इति।

अन्वयव्यतिरेकि खलु अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि इति। तत्रोदाहरणं हि वह्नौ साध्ये धुमवत्त्वम्। अर्थात् वह्नौ वह्नित्वावच्छिन्ने साध्ये सति धूमवत्त्वम्। धूमः अन्वयव्यतिरेकिहेतुरित्यर्थः।

अत्रान्वयव्याप्तिं व्यतिरेकव्याप्तिञ्चाभिनीय दर्शयति। यत्र धूमस्तत्राग्निरिति। इदमत्र बोध्यम्। हेतुसाध्ययोः व्याप्तिरन्वयव्याप्तिः, साध्याभावहेत्वभावयोर्व्याप्ति-

---

[4] त.भा., सम्पा. गङ्गाधर कर, पृ. १४२

[5] प्र.पा.भा., सम्पा. दण्डीस्वामी दामोदर आश्रम, पृ.- ३३७

र्व्यतिरेकव्याप्तिः, अन्वयव्याप्तौ हेतुर्व्याप्यः, साध्यं व्यापकं; व्यतिरेकव्याप्तौ साध्याभावो व्याप्यः हेत्वभावो व्यापकः, **'व्याप्यस्य वचनं पूर्वं व्यापकस्य ततःपरम्'** इति । अतोऽन्वयव्याप्तौ हेतोः प्रथमनिर्देशः। अनन्तरं साध्यस्य । व्यतिरेकव्याप्तौ साध्याभावस्य प्रथमं निर्देशः, अनन्तरं हेत्वभावस्य । प्रकृते च धूमो हेतुः वह्निः साध्यः। अत एव अन्वयव्याप्तौ धूमः प्रथमो निर्दिष्टः, अनन्तरं साध्यम् । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्तीति व्यतिरेकव्याप्तौ साध्याभावः प्रथमो निर्दिष्टः, अनन्तरं हेत्वभाव इति ।

पुनः अनुमानं द्विविधं स्वार्थं परार्थं च । सरलतयोरर्थो हि यत्र स्वयमेव निश्चित्य परबोधनाय पञ्चावयववाक्यानि (प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि) प्रयुक्तानि तत्र परार्थानुमानम् इति । अर्थात् अयं पर्वतो वह्निमानिति प्रतिज्ञा, धूमवत्त्वादिति हेतुः, यो यो धूमवान् स स वह्निमानित्युदाहरणम्, तथा चायमित्युपनयः, तस्मात्तथा इति निगमनम् ।

अत्रेदं स्मरणीयं यत् स्वार्थं तथा परार्थं, यस्यामनुमितौ अनुमापकहेतोः गुरुत्वमनस्वीकार्यम् । प्रत्येकमनुमानस्थले हि हेतुना पक्षे साध्यमनुमीयते । यथा 'पर्वतो वह्निमान् धूमात्' इत्यत्र धूमरूपहेतुना पर्वतरूपपक्षे साध्यस्यानुमितिर्जायते । वस्तुतस्तु यथार्थानुमितिरूपप्रमाज्ञानाय कस्मिंश्चिदनुमाने हेतुः सद्धेतुत्वेनाविर्भवत्येव। तस्य सद्धेतोः वैशिष्ट्यानि हि पक्षसत्त्वं, सपक्षसत्त्वं, विपक्षासत्त्वम्, अवाधितत्वम्, असत्प्रतिपक्षत्वञ्चेति ।

हेतुत्रैविध्यालोचनावसरे पक्षसपक्षविपक्षादेः प्रसङ्गोऽपि आगच्छति । तथाहि इदानीं पक्ष-सपक्ष-विपक्षाणामालोचनं करोमि । तत्र पक्षलक्षणं हि सन्दिग्धसाध्यवान्

पक्ष इति । यथा 'पर्वतो वह्निमान् धूमात्' इत्यत्र हेतुर्हि धूमः, साध्यं वह्निमत्त्वं, पक्षश्च पर्वत इति । अत एव धूमरूपहेतुना पर्वतरूपपक्षे वह्निरूपसाध्यमनुमितं भविष्यति । वस्तुतस्तु साध्यवह्निः पर्वते अस्ति न वेति संशयत्वाद् धूमरूपहेतुना वह्निरूपसाध्यमनुमीयते । तथा च 'पर्वत' इति पक्षे तथाधारे साध्यवह्निः सन्दिग्धः।

अथ सपक्षलक्षणं हि निश्चितसाध्यवान् सपक्ष इति । अर्थाद् अधिकरणे साध्यं यदि निश्चितत्वेन तिष्ठति तर्हि स सपक्षरूपेणाभिधीयते । यथा पर्वतो वह्निमान् धूमात् इत्यादिस्थले महानसम् इति सपक्षः, यतः तस्मिन् अधिकरणे साध्यवह्नेरुपस्थितिः निश्चिता ।

ततश्च विपक्षलक्षणं हि निश्चितसाध्याभाववान् विपक्षः इति । 'पर्वतो वह्निमान् धूमात्' इत्यत्र साध्यधर्मो वह्निः तस्याभावो यत्र विद्यते स साध्याभावः। अत एव वह्नेरभावो जलाशये विद्यते इति निश्चयः । अत्र विपक्षो हि जलाशयः, यतः स हि साध्याभावस्य निश्चिताधिकरणम् ।

इदानीं हेत्वाभासः क इति आलोचनावसरो समागच्छति । तथात्र समासेन तदुल्लेखं करोमि । हेतुर्हि द्विविधः— सद्धेतुः असद्धेतुश्च । तत्र व्याप्तिपक्षधर्मताविशिष्ट आद्यः। व्याप्तिपक्षधर्मत्वाभाववान् द्वितीयः। स एव हेत्वाभासो वा असद्धेतुर्वा । हेत्वाभासशब्दस्य द्विविधोऽर्थः प्राप्यते प्राचीनन्याय-नव्यन्यायनये । तत्र प्राचीनन्यायमते हेत्वाभासशब्दस्यार्थो हि हेतुवदाभासन्ते इति हेत्वाभासाः। अर्थाद् अनुमानस्थले यो न प्रकृतहेतुः, परन्तु हेतुसदृशतया प्रतीयमानः स हेत्वाभास इत्युच्यते। तदुक्तं प्राचीननैयायिकभाष्यकारवात्स्यायनैः – **"हेतुलक्षणाभावादहेतवो**

**हेतुसामान्याद् हेतुवदाभासमानाः"**[6] इति । नव्यनये च हेत्वाभासस्य व्युत्पत्तिर्हि हेतोराभासा दोषा हेत्वाभासाः। अनया व्युत्पत्त्या हेतोः पञ्चविधत्वविशिष्टदोषो हि हेत्वाभासः। तथाहि नव्यनैयायिकरघुनाथशिरोमणिना भणितम् – **"केचित्तु यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सन्तवन्ति, तावदन्यान्यत्वमेकमात्रदोषस्थले च तत्त्वमेव हेत्वाभासत्वम्"**[7] इति ।

न्यायजनकमहर्षिगौतमनये पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्व-असत्प्रतिपक्षितत्व-अवाधिततत्वरूपपञ्चधर्मा एव हेतुपदार्थस्य सामान्यलक्षणम् । तत्रोक्तपञ्चानां धर्माणां मध्ये एकैकस्य धर्मस्याभावे पञ्चविधो हेत्वाभासो भवति । यथा विपक्षासत्त्वराहित्ये सव्यभिचारहेत्वाभासः, सपक्षसत्त्वाभावे विरुद्धहेत्वाभासः, असत्प्रतिपक्षितत्वाभावे प्रकरणसमहेत्वाभासः, पक्षसत्त्वाभावे साध्यसमहेत्वाभासः अबाधिततत्वहीने च कालातीतहेत्वाभासः।

इदानीं वक्तुं शक्यते यत् आचार्यगङ्गेशोपाध्यायैः हेत्वाभासविषये सयुक्तिकं मतं प्रदत्तम् । तत्र त्रीणि हेत्वाभाससामान्यलक्षणानि गङ्गेशोपाध्यायैः उपन्यस्तानि । अत्र वक्तव्यमस्ति एतेषां त्रयाणां लक्षणानां विवेचनपरो प्रकरणग्रन्थः "सामान्यनिरुक्तिः" इति नाम्ना प्रसिद्धः। ननु कानि लक्षणानि इति पृच्छायामुच्यन्ते तानि हि –

**१. अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्**[8]**,**

[6] न्या.द. (प्रथमखण्ड)। सम्पा. फणिभूषण तर्कवागीश, पृ. - ३३८

[7] तदेव (पादटीका), पृ. - ३८९

[8] सा.नि.प्र., सम्पा. वामाचरणभट्टाचार्य, पृ. - ०३

**२. यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्[9],**

**३. ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वं वा[10] ।**

**प्रथमेऽध्याये** विवक्षिताचार्याणां परिचयो मया प्रदत्तः –

**"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।**

**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥"[11]**

सर्वविद्यानां प्रदीपस्वरूपं न्यायशास्त्रं द्विविधं प्राचीन-नव्यभेदेन । तत्र न्यायशास्त्रे यथा प्राचीननैयायिकानामवदानं स्वर्णाक्षरेण ग्रथितम्, तद्वत् नव्यनैयायिकाः सूक्ष्मातिसूक्ष्मविश्लेषणेन तेऽस्मान् न्यायपिपासुन् निकषा प्रत्यहं चर्चिताः पूजिताश्च । अत्र शोधपत्रे मम विवक्षिताचार्याणां परिचयो मया चर्चितो भवति । विवक्षिता आचार्या हि – गङ्गेशोपाध्यायः, रघुनाथशिरोमणिः, जगदीशतर्कालंकारः, गदाधरभट्टाचार्यश्च ।

➢ गङ्गेशोपाध्यायः -

नव्यन्यायतिलकस्य गङ्गेशोपाध्यायस्य सप्रमाणं जीवनचरितमधुनापि न प्राप्यते । तथा च तत्सम्बन्धे कतिपयाः प्रवादाः समुपलभ्यन्ते । तेषु एको हि –

बाल्यकाले श्रीगङ्गेशोपाध्यायः स्वीयमातुलगृहे निवसन्, गाश्च चारयन् स्वीयं जीवनं यापयन्नासीत् । अस्य मातुलानी सर्वदा चास्मै पर्युसितं भोजनभूतमन्नं कर्पहिकाख्यमददत् । एकस्मिन् दिवसे बुभुक्षित एवायं गङ्गेशो गाश्चारयितुं गतवान्,

---

[9] सा.नि.प्र., सम्पा. वामाचरणभट्टाचार्य, पृ. - ०३

[10] तदेव

[11] अ.शा. सम्पा. मानवेन्दु वन्द्योपाध्या, पृ. - ५८९

अथ च सायंकालेऽपि गृहं नागतः। अयं वराको गङ्गेशः स्वीयसहाध्यायिषु सर्वाधिको मन्दमतिः प्राक् श्रूयते स्म, किन्तु सहैव सर्वथा पूर्णनिर्भिकोऽप्यासीदित्यपि श्रूयते । वारमेकं गङ्गेशस्य सहाध्यायिनो गङ्गेशं सर्वथा निर्भीकं मन्यमाना रात्रौ प्रेषितवन्तोऽग्निमानेतुं श्मशानमिति । सर्वमूर्तसंयोगित्वेन सर्वत्र विराजमाना श्रीजगज्जननी जगदम्बा गङ्गेशस्य निर्भीकताम् अतिमन्दताञ्च सन्निरीक्ष्य हर्षप्रकर्षवदना सती वरं ब्रुहीति प्रोवाच । ततश्च अयं गङ्गेशो न्यायशास्त्रस्य पूर्णवैदुष्यपरिपूर्णां न्यायविद्यां मे देहीति आह । 'तथास्तु' इति वरं प्रदाय माता जगदम्बा तत्रैवान्तर्दधे ।

तादृशजगद्वन्द्यमातृप्रदत्तवरप्रदानरूपकारणवशादेव श्रीगङ्गेशोऽलौकिकाद् भूतपाण्डित्यप्राप्तिकरो जातः। तदनन्तरं भगवद्भास्करोदये जायमाने एव यदा गृहमागतवान् गङ्गेशः तदास्य मातुलो वदति 'त्वं गौः' इति। श्रीगङ्गेशो ब्रुते "गोत्वावच्छिन्नो गौर्भवति, अर्थाद् गोत्वं यस्मिन्नधिकरणे वर्तते स एव गौः कथ्यते, 'गौ'-शब्दस्य प्रवृत्तिनिमित्तं तथा शक्यतावच्छेदकं यद् गोत्वं तदधिकरणं गौरित्यर्थः। तच्च गोपदस्य प्रवृत्तिनिमित्तं गोत्वं तदधिकरणं गौरित्यर्थः। तच्च गोपदस्य प्रवृत्तिनिमित्तं गोत्वं नास्ति मयीति नाहं गौः।"

किन्तु ब्राह्मणत्वरूपस्य प्रवृत्तिनिमित्तस्य, मनुष्यत्वरूपस्य वा प्रवृत्तिनिमित्तस्य मयि सत्त्वेनाहं ब्राह्मणो वा मनुष्यो वास्मीत्युभयत्वावच्छिन्नो वेति । गौरिति शब्दप्रयोग औपचारिकश्चेत्तदा भवान्नपि गौः।

मातुलो भागिनेयस्य गङ्गेशस्येदञ्च सुयुक्तिपूर्णं वाक्यं निशम्य विस्मितवान्। मातुलेन चोक्तम्, 'किमवदः? पुनः वद' इति । श्लोकः पुनरुच्चारितः। एतच्छ्रुत्वा मातुलेन आसनं परित्यज्य भागिनेयस्य साश्रुनयनेन क्रोडे आलिङ्गनं कृतम् । किञ्च

मातुलेन स्वीयविद्या गङ्गेशाय प्रदत्तेति गङ्गेशस्य बाल्यजीवनम् । वस्तुतस्तु कथेयं प्रवादत्वेन परिचितः।

यद्भवतु एतद्व्यतिरिच्य गङ्गेशस्य स्वकृतग्रन्थात् तत्सम्बन्धे तत्परिचयो ज्ञायतेऽस्माभिः । यथाचार्यैस्तदीयग्रन्थादावात्मपरिचयः प्रदत्तः –

**"अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतम्**
**चिन्तादिव्यविलोचनेन च तयोः सारं विलोक्याखिलम् ।**
**तन्त्रे दोषगणेन दुर्गमतरे सिद्धान्तदीक्षागुरुः,**
**गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम् ॥"**[12] इति ।

वाक्यमेनं प्रति मनोनिवेशे सति बुध्यते यत् – गङ्गेशेन न्यायशास्त्रस्य नानामतानि अवगतानि, प्रभाकरादिमीमांसकानां मतमपि सम्यक्त्वेनालोचितम् । अपि च, विविधचिन्तनात्परं तेन महापादेन ग्रन्थोऽयं विरचितः। श्लोकेऽस्मिन् 'दिव्यविलोचनेन' इति पदेन ज्ञायते यत् तं प्रति दैवप्रभावोऽभवत् । तथापि तेनाचार्येण बहुलपरिश्रमः कृत इति विषये नास्ति कोऽपि संशयः। वस्तुतस्तु आचार्येण न्यायसूत्रप्रणीतुः गौतमस्य प्रथमपदार्थप्रमाणमवलम्ब्य 'तत्त्वचिन्तामणिः' इति नव्यन्यायप्रकरणग्रन्थो विरचितः। ग्रन्थोऽयं प्रत्यक्षानुमानोपमानशब्दप्रमाणचतुष्टयात्मकः। प्रत्येकं प्रमाणमवलम्ब्य अयं ग्रन्थो हि भागचतुष्टयात्मकः। तेषां भागानां नाम हि प्रत्यक्षचिन्तामणिः, अनुमानचिन्तामणिः, उपमानचिन्तामणिः, शब्दचिन्तामणिश्च । प्रकृतस्तु तत्त्वचिन्तामणौ प्रत्यक्षखण्डम्, अनुमानखण्डम्, उपमानखण्डं, शब्दखण्डञ्चेति ।

एष खलु नव्यनैयायिकतिलको दरभङ्गामण्डलान्तर्गते कमलारोधसि वर्तमाने कोरानग्रामे कस्यचित् श्रोत्रियस्य सदने समजनि ।

---

[12] व्या.प., पृ.- ५-६(भूमिका)

➢ रघुनाथशिरोमणिः –

महामहोपाध्यायगङ्गेशोपाध्यायजीवनवृत्तवन्महामतिरघुनाथशिरोमणिमहापादस्य जीवनवृत्तम् अपि अद्यापि तमसाच्छन्नम् । वस्तुतस्तु यस्याविर्भावेण निखिलभारतवर्षस्य तथा वङ्गदेशस्य सम्मानं वर्धितम्, परन्तु तस्य महामानवस्य जीवनकथा सर्वैः विस्मृता । तथाहि लोकमुखप्रवादैः रघुनाथजीवनवृत्तं ज्ञातुं बाध्याभवाम । तथापि स्मरणीयं यत्तेषु प्रवादेषु मतभेदो दरीदृश्यते । यथा केचन वदन्ति स महामानवः नवद्वीपे जनिं लेभे, केऽपि वा श्रीहट्टे समजनि ।

बाल्यकाले हि रघुनाथः पितृहीन आसीत् । तथाहि अतीव कष्टसहकारेण जननी रघुनाथस्य भरणपोषणं कृतवती । ततःपरं महामहोपाध्यायाद् वासुदेवसार्वभौमान्न्यायशास्त्रं तथा सकलं शास्त्रमधीत्य विशेषजिज्ञासानिवृत्तये आहोस्वित् परीक्षणं कर्तुकामः श्रीपक्षधरस्य महान्यायशास्त्रविदुषः सकाशं गतवान् । अपि च तं निकषा सम्पूर्णतया न्यायशास्त्रमधीतवन्तस्ते।

शिरोमणेराविर्भावकालविषये मतभेदो दरीदृश्यते पण्डितेषु । तथापि वक्तुं शक्यते यत् ई. १४७७ परिमितेऽब्दे श्रीमता रघुनाथशिरोमणिना नदियाशान्तिपुरे जनुर्गृहीता।

➢ जगदीशतर्कालंकारः –

पण्डितप्रवरो जगदीशः शैशव एव पितृविहीनोऽग्रजस्य षष्ठीदासस्य शासनमुल्लङ्घ्य प्रायोऽनाप्ताक्षरपरिचयोऽनाविष्टोऽष्टादशवर्षं यावदभ्रमदसन्मार्गेण । ततश्च काचिद् घटनापरम्परा समबोधयेदेनमिति किंवदन्ती । सा चैवं हि कदाचित् पक्षिशावकाहरणमानसो महान्तं तालबृक्षमारुह्य पक्षिशावकानादातुं प्रसारितकरो

विषमफणां विस्तीर्य दंशनार्थं कञ्चिद् विषधरं सर्पं विलोक्य प्रत्युत्पन्नमतिरगतिकोऽसौ जगदीशः सहसा दृढमुष्ठ्या तद्विषधरवदनं धृत्वा तालवृन्तस्य क्रकचाकारप्राप्तभागेन खण्डितं वदनं दूरे निक्षिप्तवान् । ततश्च क्रुध्यस्य सर्पस्य पश्चादर्धेन प्राक्संवेष्टितहस्तोऽसौ पश्चादर्धमपि तथैव खण्डशो विधाय भूमावपातयत् । तत्र समीपवर्तिना केनचित् सन्न्यासिना तस्य तादृशं प्रत्युत्पन्नमतित्वं साहसं तीक्ष्णबुद्धिं च समवलोक्य समीपमाहूय च जगदीशं सदुपदेशदानादिना प्रत्यबोधयेत् । आप्तसम्मतिश्चासौ ततः प्रभृति निद्रामपि दूरीकृत्य द्युर्निशं महता प्रयत्नेनाध्यवसायेन च साहित्यव्याकरणादिकं तत्तदुपाध्यायेभ्यः सम्यगधिगत्य न्यायशास्त्रमपि कस्यचित् सार्वभौमोपाधिकस्य गुरोः सकाशादधीतवान् । केचन १५४०-१५५० ईसवीयाब्दे जातोऽयं जातक इति प्राहुः।

- गदाधरभट्टाचार्यः -

नव्यन्यायशिरोमणिना प्रणीतदीधितेर्याः खलु टीका जगति विराजन्ते तासु 'गादाधरी' प्रथमं प्रधानञ्च स्थानं लभते । एतस्याः खलु निर्माता नव्यनैयायिकानामग्रणीर्गदाधरभट्टाचार्यः। गदाधरेण नदियाख्यं न्यायशास्त्रस्य आद्यपीठं गत्वा हरिरामतर्कवागीशानां सविधे तर्कशास्त्रमधीतम् ।

**द्वितीयेऽध्याये** सङ्गतिविवेक आलोचितः। तत्र अध्यायस्य सारो हि महर्षिगौतमप्रणीतप्रमाणादिषोडशपदार्थेषु[13] प्रमाणमवलम्ब्य श्रीमद्भिः गङ्गेशोपाधायैः "तत्त्वचिन्तामणिः" इति नव्यन्यायशास्त्रं प्रणीतम् । तत्रानुमानखण्डे क्रमेण अनुमितिनिरूपणं व्याप्तिवादः, व्याप्तिग्रहोपायः, तर्कः, व्याप्त्यनुगमः, सामान्यलक्षणा, अर्थापत्तिः, अवयवः इत्येतावत् सम्यक्तया निरूपणं कृत्य 'अथ

[13] प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः, न्या.सू.- १/१/१

हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते' इति ग्रन्थेन हेत्वाभासो निरूपितः।

ननु निरूपणमात्रेष्वेव 'नासङ्गतं प्रयुञ्जीत' इत्यादिश्रवणेन सङ्गतिसत्त्वमपेक्षितमस्ति । तथा च वक्तुं शक्यते यत् षट् सङ्गतिषु[14] अत्र एककार्यत्वं तदन्तर्गतं सङ्गतिरस्ति । अत्र च प्रसङ्गाभिधानापि सङ्गतिः सम्भवति । सङ्गतिसामान्यलक्षणं यथा – अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञान-विषयत्वमिति । अतः प्रकृते अनन्तराभिधानं नाम हेत्वाभासविषयकज्ञानानुकूल-व्यापारात्मकहेत्वाभासनिरूपणमेव, तत्प्रयोजिका जिज्ञासा, के च हेत्वाभासा इति हेत्वाभासत्वावान्तरधर्मप्रकारकज्ञानं जायतामित्यर्थिका; तज्जनकज्ञानञ्च हेत्वाभासत्वज्ञानं तद्धर्मावान्तरधर्मप्रकारकज्ञानगोचरेच्छां प्रति तद्धर्मज्ञानस्य कारणत्वस्याङ्गीकारादिति । परन्तु एतदस्वीकर्त्तृनये इष्टसाधनताज्ञानविधया तज्ज्ञानस्य जिज्ञासां प्रति कारणत्वमभ्युपेयम् । इष्टसाधनताज्ञानञ्च हेत्वाभासत्वज्ञानं मे इष्टसाधनमित्याकारकम् । तथा च इष्टसाधनताज्ञानविशेष्यीभूतज्ञानांशे प्रकारतया भासमानस्य हेत्वाभासत्वस्य तादृशजिज्ञासाकारणीभूतेष्टसाधनताज्ञानविषयत्वमपि अक्षतं, तदेव च हेत्वाभासत्वं सङ्गतिः।

ननु आनन्तर्यं हि स्वधंसाधिकरणसमयध्वंसाधिकरण्त्वे सति स्वधंसाधिकरणत्वं तच्च प्रकृते सम्भवि, शिष्यजिज्ञासादिना व्यवधानादिति चेत्, स्वध्वंसाधिकरणनिरूपणध्वंसानधिकरणत्वे सतीत्यस्य वक्तव्यत्वादिति । तथा च शिष्यजिज्ञासादीनां निरूपणत्वाभावान्न स्वधंसाधिकरणनिरूपणध्वंसाधिकरणत्वं प्रकृतनिरूपणस्य ।

---

[14] सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा ।
निर्वाहैककार्यत्वे षोढा सङ्गतिरिष्यते ॥

ननु तथापि न हेत्वाभासनिरूपणे व्याप्तिविशिष्टहेतुनिरूपणानन्तरमुपाधिं निरूप्य हेत्वाभासनिरूपणादिति कथं सामान्यसङ्गतिलक्षणसद्भावः, तदभावे च कथमिवासङ्गतवस्तुप्रतिपादनाधीनोन्मत्ततापरीहारो ग्रन्थकर्त्तुरिति चेन्नैवं, शिष्टा हि ते ग्रन्थकर्तारो बहुधा पर्यालोच्य निबध्नान्ति शास्त्रोपदेशान् । तथा च अनौपाधिकत्वस्य केषाञ्चिद् व्याप्तित्वमते व्याप्तिनिरूपणाङ्गतया एव उपाधिनिरूपणस्यापि कर्त्तव्यत्वेन व्याप्तिनिरूपणमेव उपाधिनिरूपणपर्यन्तमवधार्य हेत्वाभासनिरूपणे आनन्तर्यम् अक्षतमुपस्थापितमिति । सामान्यलक्षणस्य विशेषलक्षणसहकारेण कार्योपधायकतया विशेषलक्षणसत्त्वमपि दर्शयति – तत्त्वनिर्णयेत्यादिना । तथा च शिष्यो हि द्विविधः – तत्त्वबुभुत्सुः विजिगिषुश्च ।

तत्त्वनिर्णयपदस्यार्थो हि तत्त्वं नाम याथार्थ्यं, तस्य निर्णयो निश्चयः ततः प्रमितिकोटिनिश्चयो हि तत्त्वनिर्णय इति । केचित् प्रमितिं कोटिं विज्ञातुमिच्छन्तो विशेषज्ञानजनकं शास्त्रविधिमपेक्षन्ते, केचिच्च पराहङ्कारखण्डनादिनात्मप्राधान्य-संस्थापनादिकामनया च शास्त्रे प्रवृत्तिमुपयान्ति, तेषां सर्वेषामेव शास्त्रेणानेन प्रयोजनमिति उपदर्श्य एतच्छास्त्रपाठप्रवृत्तावुपयोगिता दर्शिता । तत्र तत्त्वनिर्णये सद्धेतोरिव हेत्वाभासस्यापि उपयोगोऽस्ति इति एककार्य्यप्रयोजकत्वमुभयोः। तथाहि 'पर्वतो वह्निमान्' इदं ज्ञानं प्रमा व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानजन्यत्वात्, अत्र 'पर्वतो वह्निमान्' इति ज्ञानधर्मिकप्रमात्वज्ञानमेव तत्त्वनिर्णयः, स च निर्णयः प्रकृतेऽनुमित्यात्मकः अनुमितिं प्रति च पक्षधर्मिकहेतुज्ञानस्य कारणतया कारणतावच्छेदकानाञ्च जनकजनकतावच्छेदकसाधारणप्रयोजकत्वसत्त्वेन विषयतया परम्परापरिश्रान्तकारणतावच्छेदकीभूतव्याप्तिपक्षधर्मताविशिष्टहेतोरपि प्रमात्वग्रहं प्रति प्रयोजकत्वम् इति । अथ कथं व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानजन्यत्वेन हेतुना

ज्ञाने प्रमात्वनिश्चयः, तादृशस्य हेतोः उत्पत्तिकालीनघटो गन्धवान् पृथिवीत्वादित्याद्यसङ्कीर्णबाधस्थलान्तर्भावेन व्यभिचारादिति चेदत्र सार्वभौमपादाः प्रमात्वं न स्वरूपसम्बन्धेन साध्यमपि तु स्वाश्रयत्वस्वाश्रयपरामर्शजन्यत्वैतद-न्यतरसम्बन्धेन, तथा च यत्र व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानजन्यानुमितिः प्रमा तत्र स्वाश्रयत्वसम्बन्धेन, यत्र च व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानजन्या अनुमितिरप्रमा तत्र स्वाश्रयपरामर्शजन्यत्वसम्बन्धेन प्रमात्वं साध्यम् । अत एव प्रकृते पक्षतावच्छेदकधर्मावच्छिन्ने साध्यवत्त्वविरहात्तदवगाहित्वेन ज्ञानस्याप्रमात्वेऽपि परामर्शस्य प्रमात्वेन तज्जन्यत्वाच्चास्य न व्यभिचार इति प्राहुः। दुष्टहेतोश्च तत्त्वनिर्णयं प्रत्युपयोगित्वं यथा इयमनुमितिः प्रमा दुष्टहेतुग्रहजन्यानुमितिविरोधित्वादिति प्रमात्वनिर्णयहेतुभूततथाविधविरोधित्वज्ञानांशे परम्परया विशेषणीभूतदुष्टहेतोः कारणतावच्छेदकत्वरूपं प्रयोजकत्वम् । एवम्प्रकारेण सद्धेतौ असद्धेतौ च तत्त्वनिर्णयरूपैककार्यप्रयोजकत्वसत्त्वेन सद्धेतुनिरूपिता सङ्गतिर्दुष्टहेतावपीति प्रतिपत्तव्यम् । सद्धेतौ न सद्धेतुनिरूपिता सङ्गतिः, विषयसिद्धेरिच्छां प्रति प्रतिबन्धकतया सामान्यसङ्गतिलक्षणघटकजिज्ञासाया एवानुदयादादावेव तन्निरूपणे शिष्टानां तद्विषयकज्ञानोदयात्, सामान्य लक्षणसमवहितस्यैव विशेषलक्षणस्य कार्यं प्रत्युपयोगात् । अथवा स्वप्रयोज्यकार्यप्रयोजकत्वरूपविशेषलक्षणे प्रयोजकांशे स्वभिन्नत्वविशेषणमुपादाय दोषो वारणीयः, स्थलान्तरानुरोधेनापि ईदृशस्य निवेशस्य कर्तव्यत्वात् ।

ननु पूर्वोक्तरूपेण दुष्टहेतुनिरूपणे प्रकृतं सङ्गतञ्च स्यान्न दोषनिरूपणमिति कथं प्रथमतो दोषं निरूप्य तद्वत्त्वेन दुष्टहेतुनिरूपणमिति चेन्न, दोषप्रकारेण एव दुष्टहेतूनां तत्त्वनिर्णयकारणतावच्छेदकतया दोषाणामपि परम्परया प्रमात्वनिर्णयकारणताव-च्छेदकत्वरूपप्रयोजकत्वं प्राप्तमिति निष्प्रत्यूहमिति । विजयप्रयोजकत्वञ्च वादिज्ञाने

अप्रामाण्यप्रतिपादनेन, इयमनुमितिस्तु अप्रमा अदुष्टहेतुग्रहजन्यानुमितिविरोधित्वादिति सद्धेतोः परम्परया वादिजनानुमितौ अप्रामाण्यग्रहजनकतावच्छेदकत्वरूपप्रयोजकत्वं दुष्टहेतोरपि इयमनुमितिरप्रमा दुष्टहेतुग्रहजन्यत्वात् । यत्र केवलं हेत्वंशे दोषस्तत्रानुमितेः प्रमात्वेन व्यभिचारापातात् अप्रमात्वमपि पूर्वोक्तान्यतरसम्बन्धेन साध्यमिति । एवं हि यथा सद्धेतौ तत्त्वनिर्णयप्रयोजकत्वं विजयप्रयोजकत्वञ्च तथैवासद्धेतौ अपि सङ्गतिसमन्वयः। अत्र पञ्चम्यर्थो ज्ञानजन्यजिज्ञासाधीनत्वम्, अथशब्दार्थः आनन्तर्यं तेनैव सङ्गतिलक्षणान्तर्गतानन्तर्यलाभाद् व्याप्तिनिरूपणानन्तरतत्त्वनिर्णयविजयप्रयोजकत्वज्ञानजन्यजिज्ञासाधीनत्वं निरूपणे स्वकर्तव्यत्वं तथा चायं बोधः – व्याप्तिनिरूपणानन्तरतत्त्वनिर्णयविजयप्रयोजकत्वज्ञानजन्यजिज्ञासाधीनमन्निष्ठकृतिप्रयोज्यशिष्यसमवेतबोधानुकूलव्यापारविषयतावन्तो हेत्वाभासाः। उक्तेन च वाक्येन हेत्वाभासनिरूपणम् उत्तरकालकर्तव्यमिति उत्तरकालकर्तव्यत्वप्रकारकनिरूपणविषयकबुद्ध्युदयात् प्रतिज्ञालक्षणनिर्वाहः। प्रतिज्ञा च उत्तरकालकर्तव्यत्वप्रकारकबोधानुकूलव्यापारः, स च उक्तवाक्योच्चारणमेव । तथापि उच्चारणोच्चार्ययोरभेदोपचाराद् वाक्येऽपि उच्चार्य प्रतिज्ञावाक्यत्वसिद्धिरिति गुरुपादाः। दीधितौ 'प्रतिजानीते' इत्यत्र प्रतिज्ञाश्रय इत्यर्थे उच्चारणस्यैव प्रतिज्ञात्वमभ्युपगम्यमिति । तत्र वाक्यस्य प्रतिज्ञात्वे मूलकारस्य तदाश्रयत्वासम्भवात्, वर्णसमुदायात्मकस्य वाक्यस्य गगनवृत्तित्वात् । हेत्वाभासस्य द्विविधव्युत्पत्तिमाश्रित्य आदौ दोषं निरूप्य तदनन्तरं तद्वत्त्वेन दुष्टलक्षणं ग्रन्थकृता प्रस्तुतमिति, तच्च हेत्वाभासत्वमनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमित्यादिकं बहुलं निरूपितं तच्चान्यदेवेति ।

**तृतीयेऽध्याये** वर्णितो मया प्रथमहेत्वाभाससामान्यलक्षणविवेकः। गङ्गेशोपाध्यायैः तदीये तत्त्वचिन्तामणिग्रन्थे हेत्वाभासस्य प्रथमसामान्यलक्षणं लक्षितम् – **"तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्"**[15] इति ।

तत्र इत्यस्यार्थो हि निरूपणे, सप्तम्यर्थो विषयत्वं हेत्वाभासत्वे तस्यान्वयः, तथा च निरूपणविषयीभूतं हेत्वाभासत्वं च । अनुमितौ कारणीभूतो योऽभावस्तस्य प्रतियोगि यद् यथार्थज्ञानं तद्विषयत्वमित्यर्थः । धूमाभाववद्वृत्तिवह्निरूपव्यभिचारे लक्षणसमन्वयः, तथाहि – पर्वतो धूमवान् वह्नेरित्यनुमितौ कारणीभूतो योऽभावः 'धूमाभाववद्वृत्तिर्वह्निरि'त्याकारकव्यभिचारनिश्चयाभावः, तस्य प्रतियोगि यद् यथार्थज्ञानं धूमाभाववद्वृत्तिर्वह्निरिति निश्चयः तद्विषयत्वस्य तत्र सत्त्वात् ।

न चानुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वमित्येवास्तु किं कारणीभूताभाव-प्रतियोगित्वनिवेशेनेति वाच्यम् । प्रतिबन्धकत्वं हि द्विविधम् – कारणीभूताभावप्रतियोगित्वं, प्रयोजकीभूताभावप्रतियोगित्वं च । अत्र तु कारणीभूताभावप्रतियोगित्वमेव निविष्टमिति सूचनाय तदुपादानात्, अन्यथा वह्निव्याप्यधूमवान् ह्रद इति परामर्शेऽतिव्याप्तेः, तादृशपरामर्शधर्मिकाप्रामाण्य-निश्चयाभावस्यापि ह्रदो वह्निमानित्यनुमितौ प्रयोजकत्वात्, तत्प्रतियोगियथार्थज्ञान-विषयत्वस्य तत्र सत्त्वात् ।

ननु अनुमितिकारणाभावप्रतियोगियथार्थज्ञानविषयत्वमित्येवोच्यतां किं भूतपदेनेति चेन्न, अनुमितिकारणस्याभाव इति षष्ठीतत्पुरुषभ्रमनिरासाय तदुपादानात् । तथा चानुमितिकारणपरामर्शस्याभावप्रतियोगिपरामर्शविषये

---

[15] सा.नि.प्र., सम्पा. वामाचरणभट्टाचार्य, पृ. - ०३

वह्निव्याप्यधूमवत्पर्वते नातिव्याप्तिः। तेनानुमितिकारणीभूतश्चासौ अभावश्चेति कर्मधारयलाभ इति ध्येयम् ।

नन्वेवमपि अनुमितिकारणीभूतो यस्तत्प्रतियोगियथार्थज्ञानविषयत्वमित्येव उच्यतां किमभावपदोपादानेनेति चेन्न, पर्वतो वह्निमानित्यत्र घटवद्भूतलेऽतिव्याप्तिः, स्वावच्छिन्नभिन्नभेदस्य स्वस्वरूपतया परामर्शावच्छिन्न-भिन्नभेदस्य परामर्शरूपतया पर्वतो वह्निमानित्यत्र अनुमितिकारणीभूतो यः परामर्शः परामर्शावच्छिन्नभिन्नभेदस्वरूपः तत्प्रतियोगि यत्स्वावच्छिन्नभिन्नं 'घटवद्भूतलमि'ति ज्ञानं तद्विषयत्वस्य तत्र घटवद्भूतले सत्त्वात् अतिव्याप्तिः। न चाभावपदोपादानेऽपि तद्दोषतादवस्थ्यम्, परामर्शस्य स्वाभावाभावरूपत्वेनाभावरूपत्वादिति। अभावपदस्य भावप्रधाननिर्देशतया अनुमितिनिष्ठकार्यतानिरूपितकारणतावच्छेदकं यदभावत्व-रूपानुयोगित्वं तन्निरूपितप्रतियोगिताश्रययथार्थज्ञानविषयत्वस्य विवक्षणीयत्वात् । तथा च नोक्तातिव्याप्तिः, परामर्शस्य परामर्शावच्छिन्नभिन्नभेदत्वेन परामर्शाभावाभावत्वेन वा न कारणत्वम्, अपि तु परामर्शत्वेनैव, परामर्शत्वं तु नानुयोगितारूपमिति अनुमितिकारणतावच्छेदकीभूतानुयोगिताविरहादिति ।

अत्रेदमवधेयं यत् जगदीशस्तु अभावपदानुपादाने अयमात्मा आत्मप्रकारकज्ञानप्रतियोगिकसमवायादित्यत्र ज्ञायमानलिङ्गस्य कारणत्वमते आत्मत्वेऽतिव्याप्तिः। न चनुमितिकारणीभूतो यस्तन्निरूपितयत्किञ्चित्सम्बन्धावच्छिन्न-प्रतियोगिताश्रययथार्थज्ञानविषयत्वम् इति निवेश्यम्, समवायनिरूपितसांसर्गिक-प्रतियोगितायां सम्बन्धावच्छिनत्वविरहेणातिव्याप्त्यभावात्, एतेन निरूपितत्वस्य प्रतियोगिस्वरूपतयानुमितिकारणीभूतो यः परामर्शः तत्प्रतियोगित्वस्य व्याप्तिज्ञाने सत्त्वेन व्याप्त्यादावातिव्याप्तिः, कार्यतानिरूपितत्वस्य कारणतायां सत्त्ववत्,

कार्यनिरूपितत्वस्य कारणे सुलभत्वादिति निरस्तम्, निरूपितत्वस्य प्रतियोगिरूपत्वे तस्य सम्बन्धानवच्छिन्नत्वादिति वाच्यमिति । सांसर्गिकप्रतियोगितायां सम्बन्धावच्छिन्नत्वविरहेऽपि तत्सम्बन्धावच्छिन्नाधेयतायाः तत्संसर्गीयप्रतियोगिता-रूपत्वेन सम्बन्धावच्छिन्नत्वस्य सुलभत्वात् । न च ज्ञायमानलिङ्गस्य कारणत्वस्वीकारेऽभावपदोपादानेऽपि आत्मत्वप्रकारकज्ञानाभावहेतुके आत्मत्वेऽति-व्याप्तिर्दुर्वारैवेति तत्पक्षो न युक्त इति । तावतापि अनुमितिकारणीभूतो यो बाधनिश्चयाभावस्तस्य घटानुयोगिकस्वरूपेण स्वावच्छिन्नाभेदस्वरूपतया घटवद्भूतलेऽतिव्याप्तिः अत एव अभावपदं प्रागुक्तार्थकमिति । वस्तुतस्तु अनुमितिनिष्ठकार्यतानिरूपितकारणताश्रयपरामर्शप्रतियोगिव्याप्तिज्ञानविषये वह्नि-व्याप्यधूमेऽतिव्याप्तिः, व्याप्तिज्ञानस्य कारणत्वमते तस्य परामर्शसम्बन्धेन तथात्वात्, परामर्शसम्बन्धप्रतियोगित्वमित्याह ।

न च तथापि ज्ञानपदं किमर्थमिति वाच्यम् । पर्वतो वह्निमानित्यत्र कामिनीज्ञानेऽतिव्याप्तेः, कामिनीजिज्ञासायाः कामिनीज्ञानान्यज्ञाने प्रतिबन्धकतया कामिनीजिज्ञासाभावस्य च कामिनीज्ञानान्यज्ञाने कारणतया अनुमितिकारणीभूतो यः कामिनीजिज्ञासाभावः तत्प्रतियोगिनी या यथार्था कामिनीजिज्ञासा तद्विषयत्वस्य तत्र सत्त्वात् । न च पर्वतो वह्निमानियं कामिनीति समूहालम्बनानुमितावपि निरुक्तानुमितित्वसत्त्वेन तत्र च निरुक्तेच्छाप्रतिबध्यताया असत्त्वान्नातिव्याप्तिरिति वाच्यम् इति । यादृशस्थलविशेषे कामिनीविषयिणी पक्षे साध्यानुमितिः कस्यापि न जाता तत्रातिव्याप्तेर्दुर्वारत्वादिति ।

ननु तथापि पर्वतो वह्निमानित्यत्र साध्यवत्पक्षेऽतिव्याप्तिः अनुमितिकारणीभूतो यः सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तत्प्रतियोगियथार्थ-ज्ञानविषयत्वस्य साध्यवत्पक्षे सत्त्वादिति चेन्न, अभावपदस्य सिषाधयिषाविरहविशिष्टसिद्ध्यभावातिरिक्ताभावपरत्वात् । वस्तुतस्तु तद्विधेयकानु-

मितावेव सिद्धेः प्रतिबन्धकत्वेन पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशाल्यनुमितित्वस्य वह्निमत्पर्वतो घटवानित्यनुमितावपि सत्त्वेन तत्र निरुक्तसिद्धिप्रतिबन्धकताविरहेण अनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायाः सिद्धौ असत्त्वात्, बाधादिनिश्चयस्तु तत्प्रकारताशालिबुद्धिं प्रतिबध्नाति इति।

**चतुर्थेऽध्याये** द्वितीयहेत्वाभाससामान्यलक्षणविवेकः यथायथरूपेण पर्यालोचितः। अथ प्रथमलक्षणे प्रायशः हेतुदोषाणां स्वरूपं निर्वचनं भवतीति तेनैव लक्षणेन शिष्याणां दोषविषयकं विज्ञानं सम्भवति, तथापि तत्र लक्षणे वैगुण्यं परिलक्ष्य तत्परित्यक्तम्।

अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वं हेत्वाभासत्वमित्यत्र प्रतिबन्धकज्ञानविषयदोषादिघटकप्रत्येकपदार्थपर्याप्तसाध्यतावच्छेदकाद्यवच्छिन्नस्य प्रत्येकं हेत्वाभासत्वापत्तिः समागच्छति । एकदेशस्यापि विशिष्टघटकतया हेत्वाभासत्वस्य तत्रैष्टत्वात्।

एकदेशे हेत्वाभासत्वस्यावृत्तित्वे दोषघटकसमुदायेऽपि हेत्वाभासत्वस्य अवृत्तित्वप्रसङ्गः स्यात् । वस्तुतः दोषघटकप्रत्येकपदार्थस्य हेत्वाभासत्वं नेष्टमिति । यद्रूपावच्छिन्नवत्ताज्ञानस्य (साध्यतावच्छेदकावच्छिन्नवत्ताज्ञानस्य) अनुमित्यविरोधित्वं तत्र हेत्वाभासत्वस्य व्यवहारो न भवति, तद्रूपावच्छिन्नमात्रज्ञानात् (वह्नित्वावच्छिन्नमात्रज्ञानात्) धूमादिहेतौ दुष्टत्वव्यवहारोऽपि न इष्टापत्तेर्विषयो भवति।

अत एव यद्रूपावच्छिन्नविशिष्टविषयकत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्त्वं हेत्वाभासत्वमिति लक्षणं करणीयम् । तेन दोषघटकसाध्यादिप्रत्येकपदार्थविषयत्वस्य अनुमितिप्रतिबन्धकतातिरिक्तवृत्तितया न तत्रातिव्याप्तिरिति यदि कथ्यते तर्हि यथार्थपदं व्यर्थमिति । एतेन यथार्थपदघटितलक्षणेन सद्धेतुस्थलेऽनुमितिविरोधिभ्रमविषयसाध्याभावादौ यथातिप्रसङ्गवारणं सम्भवति

तथैवासद्धेतुस्थलेऽपि । अतो यथार्थपदादानेऽपि तादृशातिव्याप्तिवारणसम्भवे यथार्थपदनिवेशनं निरर्थकमित्यभिप्रेत्य दीधितिकृता उक्तं **"अथ विशिष्टविषयकं ज्ञानं प्रतिबन्धकम्, तद्धटकं च न विशिष्टमिति चेत्तर्हि यथार्थेति व्यर्थम्, भ्रमविषयविशिष्टस्याप्रसिद्धत्वात्"**[16] इत्याशयेन द्वितीयलक्षणं यथार्थपदाघटितमाह – **"यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्"**[17] इति ।

अत्र लिङ्गांशनिवेशस्य निष्प्रयोजनकत्वं दीधितिकृता भणितम् । अतो यद्रूपावच्छिन्नविषयकत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वं हेत्वाभासत्वमिति पर्यवसितो द्वितीयलक्षणार्थः। अत्र तृतीयायाः अवच्छेदकत्वमर्थः, तच्च प्रथमतो यदि अनतिरिक्तवृत्तित्वरूपं स्वीक्रियते तदासम्भवः, विशिष्टस्य केवलानतिरिक्तत्वात् वह्न्यभावविशिष्टह्रदविषयकत्वस्य शुद्धह्रदत्वावच्छिन्नविषयकज्ञानेऽपि सत्त्वात्तस्य अनुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वात् । स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे सद्धेतुकानुमितिस्थले प्रतिबन्धकभ्रमविषयेऽतिव्याप्तिः, तद्विषयकत्वस्य प्रतिबन्धकतावच्छेदकघटकत्वात् । यदि यद्रूपावच्छिन्नविषयताप्रकृतानुमिति-प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकतायाः पर्याप्त्यधिककरणीभूता तत्त्वमिति लक्षणनिर्वचनं क्रियते, तदा पर्वतो वह्निमान् धूमादित्यादौ पर्वतत्वावच्छिन्नविषयतानिरूपितवह्न्यभावत्वावच्छिन्नविषयता एव तादृशानुमिति-प्रतिबन्धकतावच्छेदकतया तथाविधविषयतासमूहस्यैव प्रतिबन्धकतावच्छेदकता-पर्याप्त्यधिकरणत्वात् केवलवह्न्यभावविषयतायाः तथात्वाभावात् न केवलवह्न्यभावादावतिव्याप्तिरित्युच्यते तदा असम्भवदोष एव । सुतरामसम्भवात् प्रतिबन्धकतावच्छेदकतायाः पर्याप्तिनिवेशनं न सम्भवति । यद्विषयतायां प्रतिबन्धकतावच्छेदकत्वपर्याप्त्यधिकरणत्वनिवेशने 'ह्रदो वह्निमान् धूमाद्' इत्यादौ सर्वत्रासम्भवदोषः स्यात् हेत्वाभासलक्षणस्य ।

---

[16] सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ.- ६९

[17] सा.नि.प्र., सम्पा. वामाचरणभट्टाचार्य, पृ. - ०३

यत्र ह्लदो वह्निमान् इत्यादौ ह्लदत्वेन नद्यवगाहि, वह्नित्वेन पदार्थान्तरावगाहि, अभावत्वेन च पदार्थान्तरावगाहि 'ह्लदो वह्न्यभाववान्' इत्याकारकज्ञानस्य निरुक्तानुमितिप्रतिबन्धकत्वात्, तादृशानुमितिं प्रति भ्रमप्रमासाधारणह्लदत्वावच्छिन्नविषयतानिरूपिता वह्नित्वावच्छिन्नविषयता-निरूपिताभावत्वावच्छिन्ना या विषयता तच्छालिनिश्चयत्वेन प्रतिबन्धकत्वात् निरुक्तनिरूप्यनिरूपकविषयताया अपि तथाविधानुमितिप्रतिबन्धकतावच्छेदकता-पर्याप्त्यधिकरणतया वास्तविकलक्ष्यीभूत वह्न्यभावविशिष्टह्लदादिविषयतायाः प्रतिबन्धकतावच्छेदकतापर्याप्त्यनधिकरणत्वाद् इति।

वस्तुतस्तु तृतीयायाः स्वरूपसम्बन्धरूपावच्छेदकत्वस्वीकारे लाघव-मुतोऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्वीकारे लाघवमिति विषयमवलम्ब्य महान् विचारो वर्तते। तद्विचारन्तु शोधनिबन्धपत्रे उपपादयिष्यामि। इदानीं तस्यावश्यकता नास्ति। तथा वक्तुं शक्यते यत् भट्टाचार्यैः स्वरूपसम्बन्धरूपमवच्छेदकत्वम् उपेक्ष्यानतिरिक्तवृत्तित्वरूपमवच्छेदकत्वस्वीकारे वै लाघवमभिहितम्।

अत्रापि अनतिरिक्तवृत्तित्वं स्वव्यापकतत्कत्वं न तु प्रकृतानुमितित्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकतात्वावच्छिन्नाभाववदवृत्तित्वम्। प्रतिबन्धकत्वाभाव-वदवृत्तित्वरूपानतिरिक्तवृत्तित्वविवक्षणे ह्लदो वह्निमान् धूमादित्यादिषु स्थलीयदोषेषु लक्षणगमनाभावादसम्भवः स्यात्। वह्न्यभाववद्ध्रदविषयकत्वस्य शुद्धह्लदत्वावच्छिन्नविषयकत्वाभिन्नतयानुमितिप्रतिबन्धकत्वाभाववति 'शुद्धह्लदः' इत्याकारकज्ञाने विद्यमानस्य ह्लदमात्रविषयकत्वस्य तादृशानुमितिप्रतिबन्धकता-त्वावच्छिन्नाभाववद्वृत्तितया वह्न्यभाववद्ध्रदादिविषयकत्वे तादृशप्रतिबन्ध-कत्वाभाववदवृत्तित्वस्य उपपादनासम्भवात् विशेष्यवृत्तिपदार्थस्य विशिष्टानुयोगिका-भावास्वीकारनियमात्।

वस्तुतः पूर्वोक्तानतिरिक्तवृत्तित्वरूपावच्छेदकत्वं तृतीयाया अर्थ इति स्वीकारे निरूप्यनिरूपकभावापन्नविषयताया अपि स्वरूपसम्बन्धरूपावच्छेदकत्व-व्यवस्थापनेनापि नासम्भवः, न वा पर्याप्त्यनिवेशे बाधाद्येकदेशादौ अतिव्याप्तिरिति ।

तथापि विशिष्टविशेषे अतिव्याप्तिवारणं दुःशक्यं स्यात् यदि विशिष्टद्वयाघटितत्वनिवेशो न स्यात् । एवमपि अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्वीकारे व्यभिचारादिघटितपदार्थान्तरेऽतिव्याप्तिः स्यात् । तथा च प्रमेयत्वविशिष्टव्यभिचारनिश्चयस्य व्याप्तिग्रहप्रतिबन्धकत्वात् तादृशप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकतायाः शुद्धव्यभिचारवि-षयतायामेव स्वीकार्यतया प्रमेयत्वविशिष्टव्यभिचारविषयितायाः तादृशप्रति-बन्धकतावच्छेदकत्वे प्रामाण्याभावात्, स्वरूपसम्बन्धरूपावच्छेदकत्वस्वीकारे प्रमेयत्वविशिष्टव्यभिचारे नातिव्याप्तिः सम्भवति, परन्तु अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्वीकारे तत्रातिव्याप्तिः अतस्तद्वारणाय रघुनाथेनोक्तं – **"विशेषणीयञ्च तादृशविशिष्टान्तराघटितत्वेन"**[18] इति । तथा च स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं किन्तु तदपि प्रकृतानुमितिप्रतिबन्ध-कतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं यद्रूपावच्छिन्नविषयकत्वव्यापकं प्रकृतानुमितिप्रतिबन्धकत्वं तादृशं यत् स्वं, तादृशस्वात्मकयद्रूपावच्छिन्न-विषयकनिश्चयत्वव्यापकं प्रकृतानुमितिप्रतिबन्धकत्वं तद्रूपवत्त्वं हेत्वाभासत्वमिति । विशिष्टान्तराघटितत्वविशेषणाघटितं लक्षणमिति ।

तत्रापि नवीनपद्धत्या 'न च चतुष्टयमु'द्धृत्य भट्टाचार्यैः विशिष्टान्तराघटितत्वलक्षणं व्याख्यायापि सर्वत्रातिव्याप्त्यादिवारणेनालम् । यद्विषयकत्वेन ज्ञानस्य प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकसाध्यतावच्छेदक-सम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यकप्रकृतहेतुतावच्छेदकसम्बन्धावच्छि-

---

[18] सा.नि.प्र. (चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ.- १३३

न्नहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिप्रतिबन्धकत्वं तत्त्वं हेत्वाभासत्वमिति विवक्षणीयतया निर्वह्निः पर्वतो वह्निमान्, पर्वतः पर्वतावृत्तिवह्निमान् – इत्यादौ दोषेष्वव्याप्तिः। निर्वह्निपर्वतविशेष्यकवह्निप्रकारकानुमितेरप्रसिद्धत्वादिति । स्वविरोधिधर्मधर्मितावच्छेदकस्वप्रकारकानाहार्यज्ञानस्यानभ्युपगमात्, एवं पर्वतः पर्वतावृत्तिवह्निमानित्यादौ पर्वते पर्वतावृत्तित्वरूपसाध्यतावच्छेदकावच्छिन्न-प्रकारकानुमितेरप्रसिद्धत्वात् तादृशानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वमपि न सम्भवतीति सर्वत्र दोषेष्वव्याप्तिरिति अनुमित्यघटितलक्षणं दीधितिकृता उक्तम् – 'अत्र वदन्ती'त्यादिना।

यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तस्तदुत्तरमनुमितावनाहार्यमानसज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुमत्तावगाहित्वस्य च द्वयोर्व्य-तिरेकस्तत्त्वं हेतुदोषत्वमिति।

तथा च यद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्ये लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानसामान्ये वा विरोधिविषयिताप्रयुक्तः प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्य-प्रकारकत्वप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितव्याप्तित्वावच्छिन्नवि-षयतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारताकत्वोभयाभावस्तद्रूपवत्त्वं हेत्वा-भासत्वम् इति फलितम्।

अत्र ह्रदो वह्निमानित्यादौ वह्न्यभावविशिष्टह्रदरूपबाधे लक्षणसमन्वयः। उक्तस्थले बाधत्वावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरजायमानानुमितयस्तु घटपटाद्यनुमितयः। तादृशघटपटाद्यनुमितिसामान्ये प्रकृतपक्षविशेष्यतानिरूपितप्रकृत-साध्यव्याप्यहेतुप्रकारताकत्वसत्त्वेऽपि प्रकृतह्रदत्वावच्छिन्नविशेष्यतानिरूपितप्रकृत-साध्यवह्नित्वावच्छिन्नवह्निप्रकारकत्वस्य साध्यतावच्छेदकवह्निनिरूपितव्याप्ति-

विशिष्टहेतुमत्त्वावगाहित्वस्य विरहेण विरोधिविषयिताप्रयुक्तत्वस्य सत्त्वेनोभया-भावस्य तत्र सत्त्वादिति भवति वह्न्यभावविशिष्टह्रदे लक्षणसमन्वयः।

उक्तस्थले धूमाभावविशिष्टह्रदत्वरूपस्वरूपासिद्धित्वावच्छिन्नविषयकनिश्चयो-त्तरं जायमानायां ह्रदो वह्निमान्, ह्रदो घटवान् वा इत्याकारानुमितौ ह्रदादिधर्मिकवह्न्यादिप्रकारकत्वसत्त्वेऽपि वह्निव्याप्यधूमप्रकारकत्वविरहेण तादृशोभयाभावस्य तत्राक्षततया धूमाभावविशिष्टह्रदरूपस्वरूपासिद्धिनिश्चये लक्षणसमन्वयः।

एवं 'धूमवान् वह्नेः' इत्यादौ धूमाभाववद्वृत्तित्वविशिष्टवह्निरूप-व्यभिचारनिश्चयोत्तरं व्यभिचारनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतायाः धूमव्याप्तिविषयकधूमव्याप्यवह्निमान् अयम् इत्याकारानुमितेरनुत्पत्त्या तादृशनिश्चयोत्तरमुत्पन्नासु घटपटाद्यनुमितिषु धूमव्याप्यवह्निप्रकारकत्वाभावेन तादृशोभयाभावस्य सत्त्वात् धूमाभाववद्वृत्तित्वविशिष्टवह्निरूपव्यभिचारविषयेऽपि लक्षणसमन्वयः।

ह्रदो वह्निमान् धुमादित्यादौ यत्र वह्न्यभाववद्ध्रदात्मकबाधनिश्चयो वर्तते, तन्निष्टो यो ह्रदधर्मिकवह्निप्रकारकबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्ध-कतावच्छेदकविषयात्मको धर्मः तस्य तादृशबाधनिश्चयोत्तरोत्पन्नानुमितौ (घटपटाद्यनुमितौ) वर्त्तमानो यः तादृशनिश्चय(बाधनिश्चय)निष्ठप्रतिबन्धकता-निरूपितप्रतिबध्यतावच्छेदकस्य ह्रदधर्मिकवह्निप्रकारकत्वस्याभावस्तं प्रति प्रयोजकत्वात् । तथा च ह्रदविशेष्यकवह्निप्रकारकबुद्धिप्रतिबन्धकतावच्छेदकताया वह्न्यभावविशिष्टह्रदरूपबाधविषयितायाः तादृशनिश्चयोत्तरोत्पन्नानुमितौ (घटपटा-द्यनुमितौ) वर्तमानो यः ह्रदविशेष्यकवह्निप्रकारकत्वरूपनिश्चयप्रतिबध्यता-वच्छेदकधर्मघटितोभयाभावस्तं प्रति प्रयोजकतया तादृशो बाधनिश्चयो यो विषयिताया विरोधिविषयितात्वमक्षतमिति भावः।

यद्विषयकनिश्चयस्य विरोधिविषयिताप्रयुक्तस्तदुत्तरमनुमितौ इत्यनुक्त्वा 'तदुत्तरं ज्ञाने' इत्येवोच्यतामिति वाच्यम् । तथा सति बाधादिनिश्चयानन्तरं पक्षतावच्छेदकावच्छिन्ने साध्यादिप्रकारकस्याहार्य्यज्ञानस्य लौकिकप्रत्यक्षस्य च उत्पत्तिसम्भवात्तत्र बाधादावव्याप्तिरिति ज्ञानसामान्यमुपेक्ष्यानुमितिसामान्यनिवेशः। एवमपि यत्र दोषविषयकनिश्चयानन्तरं कदापि कस्याप्यनुमितिर्न जाता तत्राव्याप्तिरिति अनुमितिस्थले अनाहार्य्यदोषविशेषाजन्यज्ञानं निवेशनीयमित्यभिप्रेत्य कल्पान्तरमाह अनाहार्य्येति । तथा च यत्र बाधादिनिश्चयानन्तरं तादृशानुमितेरप्रसिद्धिस्तत्र तादृशयथोचितमानसोप-नीतज्ञानादिकमादाय तत्रोभयाभावं संगृह्य लक्षणमवसेयम् । बाधादि-निश्चयानन्तरमाहार्य्यसाध्यादिप्रकारकसाध्यव्याप्यहेतुप्रकारकप्रत्यक्षोत्पत्तिसम्भवात् असम्भवोऽव्याप्तिर्वा भवतीति तन्निरासाय लक्षणे अनाहार्य्यस्य निवेशनं कृतम् । सर्वत्र दोषविषयकनिश्चयानन्तरम् आहार्य्यपक्षविशेष्यकसाध्यप्रकारकपक्षविशेष्यकसाध्य-व्याप्यहेतुप्रकारकज्ञानोत्पत्तौ प्रमाणाभावादाह अव्याप्तिर्वा । तथा च यादृशदोषविषयकनिश्चयानन्तरम् आहार्य्यपक्षादिविशेष्यकसाध्यादिप्रकारकं साध्यव्याप्यहेतुप्रकारकं ज्ञानं चोत्पद्यते तादृशस्थलीयदोषेऽव्याप्तिरिति ।

'शंखो न पीतः' इत्यादिनिश्चयानन्तरं शंखादौ पीतत्वादिप्रकारकदोषविशेष्य-जन्यचाक्षुषादेरुत्पत्तिसम्भवात् 'शंखः पीतः शंखत्वात्' इत्यादिस्थलीय-बाधादावव्याप्तिः स्यात् । अतः लक्षणे 'मानस'पदं निवेशितम् । मानसमपि दोषविशेषाजन्यज्ञानपरं निर्दिष्टम् । तेन 'अहं न गौरः' इत्यादिनिश्चयानन्तरं मिथ्याज्ञानजन्यवासनादिरूपदोषविशेषजन्यात्मविशेष्यकगौरत्वादिप्रकारकमानसज्ञा-नोत्पत्तावपि 'अहं गौरः आत्मत्वात्' इत्यादिस्थलीयबाधव्यभिचारादौ नाव्याप्तिः।

एतेन यादृशपक्षसाध्यहेतुकस्थले यद्विषयकनिश्चयानन्तरं विरोधिसामग्रीवशात् मानसज्ञानं कदापि नोत्पन्नं तत्रापि अव्याप्तिरिति परास्तम् । तत्रानुमितिशाब्दबोधादिकं वादाय लक्षणसमन्वयसम्भवादिति ।

**पञ्चमेऽध्याये** तृतीयहेत्वाभाससामान्यलक्षणविवेकः पर्यालोचितो मया । आचार्यपादैर्गङ्गेशोपाध्यायैस्तृतीयहेत्वाभाससामान्यलक्षणं लक्षितम् — **"ज्ञायमानं सदनुमितिप्रतिबन्धकं यत्तत्त्वं वा"**[19] इति । अत्र ज्ञायमानं लिङ्गमनुमितिकरणमिति मतमिव ज्ञायमानबाधादिः प्रतिबन्धक इति मतविशेषः। तन्मते यद्विषयकज्ञानस्य नानुमितिप्रतिबन्धकत्वमिति तन्मतविशेषमाश्रित्य लक्षणमिदमीरितम् ।

अत्र लक्षणे यत्पदेन यद्रूपावच्छिन्नविषयतासामान्यं ग्राह्यं, ज्ञायमानं यद् यद्रूपावच्छिन्नविषयतासामान्यम्, अनुमितिप्रतिबन्धकमनुमितित्वव्यापकप्रतिबध्यता-निरूपितप्रतिबन्धकतावच्छेदकं, तत्त्वं तद्रूपवत्त्वमिति लक्षणसमन्वयः। ज्ञानीययद्रूपावच्छिन्नविषयताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपित-प्रतिबन्धकता तद्रूपावच्छिन्नत्वमिति । अत्राप्यनुमितिपदं साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याकारकानुमितिपदम् । तथा च वह्न्यभाववान् ह्रद इति ज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताव्यापिका ह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतास्ति तद्रूपावच्छिन्नत्वस्य वह्न्यभाववद्ध्रदे सत्त्वाल्लक्षणसमन्वयः।

**षष्ठेऽध्याये** आचार्यकृतहेत्वाभासलक्षणोत्कर्षविवेकः सम्यक्तया पर्यालोचितः। गङ्गेशोपाध्यायैस्तत्त्वचिन्तामणौ यानि त्रीणि हेत्वाभाससामान्यलक्षणानि प्रणीतानि तानि अवलम्ब्य परवर्तिनि काले नव्यनैयायिकाः स्वकीयमतमुपस्थापितवन्तः। यथा तर्कसंग्रहकृता अन्नंभट्टेन सामान्यनिरुक्तिप्रकरणस्य प्रथमहेत्वाभाससामान्य-लक्षणमवलम्ब्य हेत्वाभासलक्षणं कृतम् - **"अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम्"**[20] इति । अर्थात् अनुमितेः प्रतिबन्धकं यत् यथार्थज्ञानं तद्विषयत्वं हेत्वाभासत्वम् । प्रतिबन्धको हि द्विविधः – कारणीभूताभावप्रतियोगित्वं

[19] सा.नि.प्र., सम्पा. वामाचरणभट्टाचार्य, पृ. - ०३

[20] त.सं.,सम्पा. पञ्चानन शास्त्री, पृ.- १४४

प्रयोजकीभूताभावप्रतियोगित्वं च । अत्र तु प्रतिबन्धकशब्दस्यार्थस्तावत् कारणीभूताभावप्रतियोगित्वम् । तथाहि 'ह्रदो वह्निमान्' इत्यनुमितौ 'वह्न्यभाववान् ह्रद' इति यथार्थनिश्चयात्मकं ज्ञानं प्रतिबन्धकम् । यतः तत्सत्त्वे 'ह्रदो वह्निमान्' इति अनुमितिर्न जायते । अत्र प्रतिबन्धकं नाम कारणीभूताभावप्रतियोगीति । तथा च व्यभिचारादिहेत्वाभासेऽव्याप्तिवारणाय लक्षणे अनुमितीति पदस्थले अनुमितितत्करणान्यतरेति पदमुपादेयम् । तेनानुमितिकारणीभूतस्य परामर्शस्य प्रतिबन्धकयथार्थज्ञानविषयत्वस्य हेत्वाभासत्वे व्यभिचारादौ हेत्वाभासलक्षणसमन्वयो भवति व्यभिचारादेरनुमितिप्रतिबन्धकत्वाभावेऽपि परामर्शप्रतिबन्धकात् । अपि च, 'पर्वतो वह्निमान्' इत्याद्यनुमितौ 'पर्वतो वह्न्यभाववान्' इत्यादेर्बाधभ्रमस्य हेत्वाभासत्ववारणाय यथार्थेति पदं लक्षणे प्रदेयम्। अत एव सम्पूर्णलक्षणशरीरं भवति— **'अनुमितितत्करणान्यतरकारणीभूताभाव-प्रतियोगियथार्थज्ञानविषयत्वम्'** इति । इदानीं दिङ्मात्रे दृष्टान्ते लक्षणसमन्वयः प्रदर्श्यते— 'वह्निरनुष्णो द्रव्यत्वात्' इति यज्ज्ञानं तद्विषयत्वं विषयतासम्बन्धेन एकज्ञानविषयत्वसम्बन्धेन च द्रव्यत्वरूपे हेत्वाभासे विद्यते इति लक्षणसमन्वयः ।

भ्रमविषये साध्याभावादौ अतिव्याप्तिवारणाय यथार्थपदसार्थक्यमित्युक्तम् । परन्तु तन्न युक्तियुक्तम्, तुल्यरीत्या प्रमाविषयेऽपि साध्याभावादावतिव्याप्तिः स्यात् । यथानुमितिकारणीभूताभावप्रतियोगि हि 'वह्न्यभाववान् पर्वत' इति भ्रमविषयत्वं वह्न्यभावे वर्तते तथैव अनुमितिकारणीभूताभावप्रतियोगि 'वह्न्यभाववान् ह्रद' इति प्रमाविषयत्वमपि वह्न्यभावे वर्तते । तत्रत्य अतिव्याप्तिवारणाय यो हि प्रकारोऽनुष्ठीयते तेनैव भ्रमविषये साध्याभावादौ अतिव्याप्तिवारणं सम्भवतीति यथार्थपदमनावश्यकम् । यद्वा प्रत्येकं साध्याभावादेर्हेत्वाभासतापत्तिः स्यात् । तत्र

प्रतिबन्धकीभूतप्रमाविषयत्वस्य सत्त्वादतो यथार्थपदाघटितं किमपि लक्षणं करणीयं, तथाहि गङ्गेशोपाध्यायैः द्वितीयहेत्वाभाससामान्यलक्षणं लक्षितम् – **"यद्विषयकत्वेन लिङ्गज्ञानस्य अनुमितिप्रतिबन्धकत्वम्"** इति । परन्तु तर्कसंग्रहकृता अतःपरं किमपि नोक्तम्, तथा च कारिकावलीकृतः मतं प्राप्यते ।

मुक्तावल्यां च गङ्गेशोपाध्यायानां द्वितीयहेत्वाभासलक्षणमनुसृत्य हेत्वाभासलक्षणं लक्षितम् - **"यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम्"**[21] इति। अर्थात् अनुमितिविरोधित्वमनुमितितत्करणान्यतरप्रतिबन्धकम् । तथा च ज्ञाननिष्ठयद्विषयकत्वावच्छिन्नानुमितितत्करणान्यतरप्रतिबन्धकत्वं तद्विषयत्वं हेत्वाभासत्वम् । न्यायरत्नेऽपि गङ्गेशोपाध्यायमतमवलम्ब्य उवाच – **"तत्तदनुमितिकारणीभूततृतीयलिङ्गपरामर्शप्रमात्वनिरूपकव्याप्तिपक्षधर्मतावैशिष्ट्यव्यतिरेक एव हेत्वाभासत्वम्"**[22] इति ।

इदानीं मम इमं विषयमाश्रित्य गवेषणाकारणविषये किञ्चिद्वक्तुकामः –

**प्रथमतः**, प्रश्नो जायते यत् हेत्वाभासविषयिणी चर्चा न्यायशास्त्रे सूत्रकालादेव प्राप्यते, तर्हि किं मम हेत्वाभासचर्चा युक्तियुक्ता भवेदिति शङ्कायामुच्यते यद्यपि न्यायदर्शने हेत्वाभासचर्चा भूयो भूयो दृश्यते तथापि मम प्रयासः कदापि चर्वितचर्वणं न भविष्यति । कारणत्वेनात्र वक्तुं शक्यते जरन्नैयायिकजयन्तभट्टस्य वचनम् -

**"कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।**
**वचोविन्यासवैचित्र्यमात्रमत्र विचार्यताम् ॥"**[23] इति ।

---

[21] का.व., सम्पा. पञ्चाननशास्त्री, पृ.- ३७४

[22] न्या.र., पृ.- १६१

[23] न्या.म., मङ्गलाचरणश्लोक- ८

**द्वितीयतः**, ननु **'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवति'** इति न्यायेन सद्धेत्वालोचनाद्द्वारासद्धेत्वालोचनाया आवश्यकता नास्ति क्लेशभयात् इति चेदुच्यते शिष्यशिक्षणाय क्लेशकरत्वेऽपि तदालोचनया प्रयोजनं विद्यते।

**तृतीयतः**, **"जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः।**

**ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम्॥"**[24]

अध्ययनशक्तिह्रासादध्ययनरूपकार्यस्य ह्रास एवात्र विद्याह्रास इति अभिहितं महामहोपाध्यायेन उदयनाचार्येण । न्यायशास्त्राध्ययनशक्तिह्रासादपि न्यायशास्त्राध्ययनरूपकार्यस्य ह्रास इदानीं सर्वत्र दरीदृश्यते । न्यायशास्त्राध्ययने प्रभूतधैर्य्यस्यापेक्षा वर्तते। इदानीं पाठकानां मध्ये तादृशं धैर्य्यं नावदृश्यते। अतएव येन न्यायशास्त्राध्ययनस्योच्छेदो न भवेत् , न्यायशास्त्रालोचनस्योच्छेदो वा न भवेत्तदुद्दिश्य गादाधरीं जागदीशीं चावलम्ब्यास्माभिः प्रयासमत्र शोधनिबन्धपत्रे क्रियते।

**चतुर्थतः**, **"ज्ञानजन्या भवेदिच्छा इच्छाजन्या कृतिर्भवेत्।**

**कृतिजन्या भवेच्चेष्टा चेष्टाजन्या क्रिया भवेत्॥"**

इति वाक्येन ज्ञायते यत् ज्ञान-इच्छा-कृति-प्रवृत्तीनां पूर्वं पूर्वं स्वोत्तरं प्रति कारणत्वाच्छोधनिबन्धप्रवृत्तौ या मन्निष्ठकृतिस्तत्र मदिच्छाया एव कारणत्वमिति । तथाहि मम सामान्यनिरुक्तिप्रकरणस्याध्ययनकाले ये तावद्विचारविषया आगतवन्तः तत्र च कतिपयकूटसमस्यानां समाधानेच्छा मयि सुप्तावस्थायामासीत्तद्धि इदानीमहं मच्छोधनिबन्धपत्रे सम्पूरयिष्यामीति कामः। किञ्च मदाशा वर्तते भाविनि काले विषयमिममाश्रित्य केचिद्गवेषका नूतनं तत्त्वमाविष्कर्तुं प्रवृत्ता भविष्यन्ति।

---

24 न्या.म., मङ्गलाचरणश्लोक- २/३

**पञ्चमतः**, नव्यनैयायिकगङ्गेशोपाध्यायविरचिते हेत्वाभाससामान्यनिरुक्तिग्रन्थे महद्भाम्भिर्यं तथा प्रभूतं काठिन्यमपि वर्तते । अस्माभिर्न्यायशास्त्रमधीत्य तादृशकाठिन्यस्य सुगमतया पर्यालोचनमिष्यते। प्रसङ्गेऽस्मिन्नस्माकमाचार्यप्रवरेण रघुनाथशिरोमणिनोक्तम् –

**"न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ।**

**अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः॥"**[25]

वयन्तु न्यायशात्रस्य रहस्यमुन्मोचयितुं न शक्नुमस्तथाप्यद्य प्रभृति सप्तशतवर्षात्प्राक्मैथिलकुलावतंसेनगङ्गेशेन नव्यन्यायशास्त्रात्मकं तत्त्वचिन्तामणि-नामकग्रन्थं निर्माय भारतवर्षस्य महान्नुपकारः सम्पादित इति ।

परिशेषे हि शोधनिबन्धस्यास्य यथायथतया विनिर्माणे यत्ने यथाशक्ति क्रियमाणेऽपि यदि केचन प्रमादा विदुषां दृष्टिपथमागच्छेयुस्तर्हि ते कृपया मर्षणीया इति विनीतं प्रार्थये ।

---

25 न्या.प.,पृ.- ०८

# प्रथमोऽध्यायः

# ॥ प्रथमोऽध्यायः ॥

## विवक्षिताचार्याणां परिचयः

जगति प्रत्येकं मानव इन्द्रियादिप्रमाणैस्तं तमर्थमुपलभ्योपादेयमुपादत्ते हेयञ्च जहाति। यथा दृश्यते यत् पिपासुस्तृष्णार्तश्चक्षुषा तोयं पश्यन् पूर्वानुभूततृषाशमनहेतुतां स्मरन् पूर्वानुभूततोयजातीयतया पुरोवर्तितोयत्य समीहिततृषोपशमाभ्यु-पायतामनुभूय तदुपादाय सुखी भवति । एवं पथि पतितं कण्टकादिमुपलभ्य तस्यानिष्टसाधनतामनुमाय तं जहाति । तद्वत् प्रत्यक्षेणेन्द्रियादिनार्थपरिच्छेदेऽपि तर्कसहायतां भजते । प्रत्यक्षं हि इह भूतले घटो नास्तीति भूतलवद् घटाभावेऽपि प्रवर्तमानं, यद्यभविष्यद्घटो भूतलमिवाद्रक्षत तस्य तेन सह तुल्यदर्शनयोग्यत्वात्, न च दृश्यते घट इति तर्केणानुगृह्यमाणं भूतले घटाभावं निश्चाययति । न च तर्को न प्रतिष्ठितो मेधाविभिरुत्प्रेक्षितानामपि तर्काणां ततोऽप्यभियुक्ततरैः आभासीकरणादिति वाच्यम्। न हि प्रतिष्ठितस्तर्क एव नास्तीति वक्तुं शक्यते । तर्काणामप्रतिष्ठितत्वमपि तर्केणैव प्रतिष्ठापनीयं भवति। तथाहि भगवता मनुना तर्कस्य माहात्म्यं कीर्तितम् –

**"आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना ।**

**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥"**[26] इति ।

यद्भवतु, तस्मात् हानोपादानादिसकललोकयात्रानिर्वाहकमनुमानं सर्वोपजीव्यं भवति। अनुमानञ्चान्वीक्षा । प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षेति । तया प्रवर्तते

[26] म.सं. – १२/१०६

इयमान्वीक्षिकी तर्कविद्या तर्कशास्त्रादिशब्दैरभिधीयते । तदुक्तञ्चामरैः तदीये अमरकोषग्रन्थे **"आन्वीक्षिकी दण्डनीतिः तर्कविद्यार्थशास्त्रयोः"**[27] इति । छान्दोग्योपनिषदि सप्तमाध्याये प्रथमखण्डे नारदसनत्कुमाराख्यायिका श्रुयते । तत्रेदमहं जाने इति वदेति सनत्कुमारेणानुयुक्तो नारदः तर्कशास्त्रमपि स्वाधीतमाह – **"ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमार्थवणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशि दैवं निधिं वाकोवाक्यमेकायनम्"**[28] इत्यादिना । तत्र "वाकोवाक्यं तर्कशास्त्रम्" इति भगवत्पादभाष्यमपि प्राप्यते ।

इयं तर्कविद्या तथान्वीक्षिकी न्यायविद्या न्यायशास्त्रमिति नाम्नाभिधीयते । ननु को नाम न्याय इति चेदुच्यते नीयते प्राप्यते विवक्षितार्थसिद्धिर्येनेति विग्रहे निपूर्वकाद् इण्-धातोरुत्तरं घञ्-प्रत्यये न्यायशब्दस्य व्युत्पत्तिसिद्धिः। न्यायोऽयं संशयितार्थे उपलब्धेऽर्थे प्रवर्तते । तदनुरूपं न्यायभाष्ये भाषितम् – **"नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते, किं तर्हि ? संशयितेऽर्थे ।"**[29] न्यायमञ्जर्यामपीरितम् -

**"तत्र नानुपलब्धेऽर्थे न निर्णीते प्रवर्तते ।**

**किन्तु संशयितेऽर्थे न्यायस्तदङ्गं तेन संशयः॥**

**प्रयोजनमनुद्दिश्य न च न्यायं प्रयुञ्जते ।"**[30] इति ।

किञ्च अर्थपरीक्षणं तथा लिङ्गपरीक्षणं हि न्यायः। तस्माद्वक्तुं शक्यते लोकयात्रानिर्वाहकतया सर्वोपजीव्यस्यानुमानस्य, विप्रतिपन्नपुरुषप्रतिपादकतया श्रेष्ठस्य सपरिकरस्य न्यायस्य, सर्वविद्यापेक्षितप्रमाणादेश्च व्युत्पादनेन,

---

27 अ.को. स्वर्गवर्ग. ११५

28 छा.उ. – ७/१/२

29 न्या.द.(प्रथखण्ड), सम्पा. फणिभूषणतर्कबागीश, पृ. - २७

30 न्या.म., सम्पा. अमितभट्टाचार्य, पृ. - २४

प्रवर्तनारूपकार्ये स्वप्रतिपाद्यनिर्णये च सर्वासां विद्यानां बहूपकारकरणेन, वेदप्रामाण्यव्यवस्थापनेन, अपवर्गसाधनोपदेशपरत्वेन, श्रुतिस्मृतिसम्मतत्वेन च वाङ्मये उन्नतं पदमधिरूढं विलसति न्यायशास्त्रम् । न्यायभाष्ये तदुक्तम् –

**"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।**

**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥"**[31] इति।

इदं न्यायदर्शनं पञ्चाध्यायात्मकं षोडशपदार्थसमन्वितमक्षपादापरनामा महर्षिगौतमः प्रणिनाय । वस्तुतस्तु गौतमः प्राचीनन्यायशास्त्रस्य जनक इति प्रायोवादः। ननु किं तावन्न्यायशास्त्रस्य प्राचीनत्वमर्वाचीनत्वं वा? यद्यपि सूत्रकारीयप्रमाणभागनिरूपकत्वाद् गङ्गेशोपाध्यायप्रचलितशैलीसम्पन्नानां ग्रन्थानामद्य यावत्प्राचीनेष्वेवान्तर्भावः समुचितः, तथा नव्यन्यायशास्त्रं प्राचीनन्यायशास्त्रं चेति व्यपदेशस्यादर्शनात् सकलमेव न्यायशास्त्रमेकविधमेव भवितुं युक्तम्, तथापि भारद्वाजकृतस्यन्यायवार्तिकस्य 'अतिजरतीनाम्' इत्यादिवाक्येन प्राचीनत्वं संस्थापयन्तो वाचस्पतिमिश्रादय एव प्राच्यनव्यव्यवहारे प्रमाणम् । न चैवमपि तत्त्वचिन्तामण्यादिनिबन्धानां नव्यत्वं पूर्वोक्तरीत्यासम्भवतीति वाच्यम्। न्यायसारमारभ्योपलभ्यमानेषु न्यायशास्त्रनिबन्धेषु 'इति प्राच्याः, इति नव्याः' इत्यादिवाक्येन विद्वत्सूभयव्यवहारस्य प्रचलितत्वेन तन्निरासस्याशक्यत्वात् ।

अथ आत्मादिप्रमेयपदार्थानां[32] तत्त्वज्ञानान्निःश्रेयसमङ्गीकुर्वद्भिः गौतमादिमहर्षिभिः निरात्मविज्ञानात्मवादिचार्वाकबौद्धादिपराजयार्थमात्मनोऽनु-मानेन सिद्धिस्तावत् प्रदर्शिता । परार्थानुमानापरपर्यायस्य च न्यायस्य पूर्वाङ्गोत्तराङ्गसाकल्येनैव वस्तुसाधनक्षमत्वमिति तदनुसारिणां सूत्रग्रन्थानां

---

[31] न्या.द.(प्रथमखण्ड), सम्पा. फणिभूषणतर्कबागीश, पृ. - ६०

[32] आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गस्तु प्रमेयम् – १/१/९

शास्त्रीयसकलपदार्थप्रतिपादकानां भाष्यवार्तिकतात्पर्यटीकादिव्याख्याग्रन्थानां समानतन्त्रसिद्धानां चोक्तलक्षणसम्पन्नानां प्राचीनमतत्वम् । तदेकदेशप्रमाण-व्याख्यानरूपाणान्तु तत्त्वचिन्तामण्यादीनां सव्याख्यानां निबन्धानां नव्यत्वमित्याहुः केचिदिति । परन्तु तन्मन्दमेव । तथा सति प्रमाणमात्रविवेचनापराणां जैनबौद्धादिग्रन्थानां प्राचीनानामपि नव्यत्वव्यवहार आपद्येत ।

अपरे तु बाहुल्येन नास्तिकत्वेनाभिमतानां चार्वाकबौद्धादीनामेव तत्त्वचिन्तामणिपूर्वकालीनेषु सूत्रभाष्यादिग्रन्थेषु खण्डनस्य उपलम्भात्तेषां पुराणत्वव्यवहारः, तत्त्वचिन्तामण्यादिषु त्वास्तिकत्वेन गृहीतानां मीमांसासांख्यादि-दर्शनानामेवाधिक्षेप इति नव्यत्वव्यपदेश इति वदन्ति ।

वस्तुतस्तु अलौकिकनूतनप्रतिभाशालिना विद्वद्वरेण गङ्गेशोपाध्यायेन भाष्यग्रन्थस्य मन्थनं विधाय तात्पर्यटीकादिङ्नागादिनिबन्धप्रग्रहैर्न्याय-वैशेषिकसूत्राम्बुधिं मथित्वा तत्सारभूतोऽयं तत्त्वचिन्तामणिर्नूतन एवोदपादीति तत्कालमारभ्य विनिर्मितस्य न्यायशास्त्रनिकरस्य नव्यत्वव्यवहार इति युक्तमिति ।

अपि च, केचित्तु विद्वांसोऽस्य न्यायशास्त्रस्य त्रिविधं विभागं कुर्वन्ति प्राच्यं नव्यं नव्यनव्यञ्चेति । तत्र प्रथमं तावत् सूत्रकारमारभ्योदयनात्पूर्वजातं प्राच्यम्, द्वितीयं तावत् उदयनाद्गङ्गेशाद्वा दीधितिकारात् प्राङ्नव्यम्, तृतीयञ्च शिरोमणिमारभ्य निबन्धं तु सर्वं न्यायशास्त्रं नव्यनव्यमिति तेषामाशयः। अत्र तृतीयविभागस्य मूलं विमृश्यमानमवच्छेदकादिप्रवेशनिबन्धनमेव प्रतिभासते, तच्च व्यभिचरितत्वादयुक्तमित्युक्तमेव । किञ्चैवं सति 'अतिजरतीनाम्' इति वाचस्पत्यवचनाच्चातुर्विध्यमप्यापद्येत । प्रदर्शितवचनबलेनोद्योत्कारान्तानां गौतमकणादीनामतिप्राचीनत्वमुद्योत्करभारद्वाजोत्तरकालवर्तिनां पुराणत्वं स्वस्य स्वसमानकालस्थितानामुदयनादीनां च नव्यत्वमाविष्कुर्वतां तदुत्तरसमयजातानां गङ्गेशोपाध्यायादीनां नव्यनव्यत्वस्य सम्भवदुक्तिकतया अतिप्राचीन-प्राचीन-नव्य-

नव्यनव्येति चतुर्धा विभागस्य वक्तुं शक्यत्वादिति। तस्माद् वस्तुतस्तु इत्यादिना प्रदर्शित एव प्राचीनार्वाचीनव्यपदेशः साध्विति कृतं वाग्विवादेन ।

अथ नव्यन्यायनभसि ये खलु आचार्याः स्वप्रतिभया विलसति तेषामाचार्याणां सतथ्यं व्यक्तिपरिचयं अधस्तात्क्रमानुसारमुपपादयिष्यामि । तथा चात्रेदं स्मरणीयं यत् केवलं येषामाचार्याणां मम शोधनिबन्धपत्रे परिचय आवश्यकोऽस्ति, तेषां ह्यालोचनां समासेनोपस्थापयामि –

## १.१) गङ्गेशोपाध्यायः -

नव्यन्यायतिलको गङ्गेशोपाध्यायो वङ्गीय आसीद् वङ्गीयानां समीपे, पुनरपि च स आसीन्मैथिलीति श्रूयते । वस्तुतस्तु तस्य महापादस्य सप्रमाणं जीवनचरितमधुनापि न प्राप्यते । यद्भवतु तत्सम्बन्धे कतिपयाः प्रवादाः समुपलभ्यन्ते । यथा –

बाल्यकाले श्रीगङ्गेशोपाध्यायः स्वीयमातुलगृहे निवसन्, गाश्च चारयन् स्वीयं जीवनं यापयन्नासीत् । अस्य मातुलानी सर्वदा चास्मै पर्युसितं भोजनभूतमन्नं कर्पहिकाख्यमददत् । एकस्मिन् दिवसे बुभुक्षित एवायं गाश्चारयितुं गतवान्, अथ च सायं कालेऽपि अयं महानुभावो गृहं नागतः। अयं वराको गङ्गेशः स्वीयसहाध्यायिषु सर्वाधिको मन्दमतिः प्राक् श्रूयते स्म, किन्तु सहैव सर्वथा पूर्णनिर्भिकोऽप्यासीदित्यपि श्रूयते । वारमेकस्य वराकस्य गङ्गेशस्य सहाध्यायिनो गङ्गेशं सर्वथा निर्भीकं मन्यमाना रात्रौ प्रेषितवन्तोऽग्निमानेतुं श्मशानघट्टे इति । सर्वमूर्तसंयोगित्वेन सर्वत्र विराजमाना श्रीजगज्जननी जगदम्बा पार्वती गङ्गेशस्य निर्भीकतां मतेश्चातिमन्दतां सन्निरीक्ष्य हर्षप्रकर्षवदना सती वरं ब्रुहीति प्रोवाच । ततश्च अयं गङ्गेशो न्यायशास्त्रस्य पूर्णवैदुष्यपरिपूर्णां न्यायविद्यां मे देहीति आह । 'तथास्तु' इति वरं प्रदाय माता पार्वती तत्रैवान्तर्दधे ।

तादृशजगद्वन्द्यमातृप्रदत्तवरप्रदानरूपकारणवशादेवश्रीगङ्गेशोऽलौकिकाद्भूत-पाण्डित्यप्राप्तिकरो जातः। तदनन्तरं भगवद्भास्करोदये जायमाने एव यदा गृहमागतवान् गङ्गेशः तदास्य मातुलो वदति 'त्वं गौः' इति । श्रीगङ्गेशो ब्रुते गोत्वावच्छिन्नो गौर्भवति, अर्थाद् गोत्वं यस्मिन्नधिकरणे वर्तते स एव गौः कथ्यते, 'गौ' -शब्दस्य प्रवृत्तिनिमित्तं तथा शक्यतावच्छेदकं यद् गोत्वं तदधिकरणं गौरित्यर्थः। तच्च गोपदस्य प्रवृत्तिनिमित्तं गोत्वं तदधिकरणं गौरित्यर्थः। तच्च गोपदस्य प्रवृत्तिनिमित्तं गोत्वं नास्ति मयीति नाहं गौः।

किन्तु ब्राह्मणत्वरूपस्य प्रवृत्तिनिमित्तस्य, मनुष्यत्वरूपस्य वा प्रवृत्तिनिमित्तस्य मयि सत्त्वेनाहं ब्राह्मणो वा मनुष्यो वास्मीत्युभयत्वावच्छिन्नो वेति। गौरिति शब्दप्रयोग औपचारिकश्चेत्तदा भवान्नपि गौः। तदुक्तम् –

**"किं गवि गोत्वं ? किमगवि गोत्वम् ?**
**यदि गवि गोत्वं मयि न हि तत्त्वम् ।**
**अगवि च गोत्वं यदि भवदिष्टम्,**
**भवति भवत्यपि सम्प्रति गोत्वम् ॥"**[33] इति ।

मातुलो भागिनेयस्य गङ्गेशस्येदञ्च श्लोकात्मकं सुयुक्तिपूर्णं वाक्यं निशम्य विस्मितवान्। मातुलेन चोक्तम्, 'किमवदः? पुनः वद' इति । श्लोकः पुनरुच्चारितः। एतच्छ्रुत्वा मातुलेन आसनं परित्यज्य भागिनेयस्य साश्रुनयनेन क्रोडे आलिङ्गनं कृतम्। किञ्च मातुलेन स्वीयविद्या गङ्गेशाय प्रदत्तोति गङ्गेशस्य वाल्यजीवनम् । वस्तुतस्तु कथेयं प्रवादत्वेन परिचितः।

किञ्च, अपरमेकं कथनं प्राप्यते यत् – अयं गङ्गेशः बाल्यकाले

---

33 व्या.प., सम्पा. राजेन्द्रनाथघोष, पृ. - ०४

मातुलविद्यालयेऽधीयान आसीत् । तत्र वारमेकं रात्रौ सर्वेषां छात्राणामध्ययनात्मक-व्यापारसमाप्तेः परमुपहासवशात् परामर्शोऽयं जातो यदिदानीं रात्रौ द्वादशवादनात्परं कश्चिच्छात्रः श्मशानं व्रजेच्चेत्, ततश्च प्रमाणभूतं तत्रत्यमग्निं तदभावे च भस्म वानयेत्तदा तं वयं परमधन्यवादपात्रं पुरस्कारार्हञ्च मन्यामहे ।

तदा गङ्गेशः प्रोवाच यद् 'अहं गन्तुं शक्नोमि गच्छामि च' । गच्छन्तं तमेकश्छात्रो व्याजहार यत् श्मशान इतोऽस्ति दैशिकपरत्वमापन्नो देशोऽतस्त्वं भगवत्याः 'तारा'-देव्या नाम वाचा समुल्लिखन् मनसा संस्मरंश्चेतः प्रयाहि । गङ्गेशोऽपि गच्छन् भगवत्याः तारादेव्या नामधेयं सम्यग् रटन् संस्मरंश्च तस्याश्चरणारविन्दयोस्तथा लीनोऽभद्येन स्वात्मानमपि विस्मृतवान् ।

श्मशानप्रदेशप्राप्यनन्तरकालावच्छेदेन किम्पश्यत्ययं गङ्गेशः यत् – साक्षात् पुरोवर्तिप्रदेशावच्छेदेन जगज्जननी भगवती जगदम्बा तारा तत्रैव चास्ति सन्तिष्ठमाना। जगदम्बायाः साक्षाद् दर्शनं विधाय महान्तं हर्षप्रकर्षं समुपागमत् श्रीगङ्गेशः।

जगदम्बा – वरं ब्रुहि वत्स !

गङ्गेशः – न्यायशास्त्रे पूर्णवैदुष्यपूर्णां विद्यां केवलं कामये ।

जगदम्बा – 'तथास्तु'। इत्युक्त्वा सा तत्रैवान्तर्दधे ।

एतेन वरस्वरूपपरमपवित्राशीर्वादेनायं श्रीगङ्गेशोपाध्यायोऽनुपमन्याय-वैदुष्यसम्पन्नो मतिनिष्ठं मान्द्यञ्च सर्वथा सर्वतोभावेन दूरीकुर्वाणोऽद्भुतं विलक्षणमलौकिकं न्यायशास्त्रीयं पूर्णं पाण्डित्यं समवाप्तवान् । तदानीं धरित्रीतलेऽस्मिन् स्वीये समयेऽयमेक एव विद्वानभूदतः अस्य प्रतिपक्षी नासीदन्यः कश्चिदिति संशयो नास्ति ।

प्रातः जायमाने एव सर्वे छात्राः शयानं श्रीगङ्गेशोपाध्यायं विलोक्याहुः – 'अयं

गौ ! समुत्तिष्ठ ।' 'गौ' इत्यस्य 'मूर्ख' इति प्रतिशब्दार्थः । यस्मात् गौरित्यत्र पशुः, पशुश्च मूर्खो भवत्येव । यथा – 'पश्वादिश्चाविशेषात्' इत्यादि । अस्य व्यङ्गस्योत्तरत्वेन गङ्गेशः प्रोवाच – यद् गोत्वावच्छिन्नत्वेन मां प्रति सम्बोधितवन्तो भवन्तः। तत्र मया पृच्छ्यन्ते सर्वेऽप्यन्तेवसन्तो जनः । भवतां सर्वेषामेव 'गौ'रिति कथनं मां प्रति सर्वथा निराधारमेव, यतो नाहमस्मि गौरिति गवि एव गोत्वस्य वर्तमानत्वात् । यदि च भवान् वदति 'अहं गौः', तर्हि भवान्नपि गौरिति । तथा चेदमेव पूर्वोक्तमनुवदति -

**"किं गवि गोत्वं ? किमगवि गोत्वम् ?**

**यदि गवि गोत्वं मयि न हि तत्त्वम् ।**

**अगवि च गोत्वं यदि भवदिष्टम्,**

**भवति भवत्यपि सम्प्रति गोत्वम् ॥"**[34] इति ।

यद्भवतु, एतद्व्यतिरिच्य गङ्गेशस्य स्वकृतग्रन्थात् तत्सम्बन्धे तत्परिचयो ज्ञायतेऽस्माभिः । यथाचार्यैस्तदीयग्रन्थादावात्मपरिचयः प्रदत्तः –

**"अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतम्**

**चिन्तादिव्यविलोचनेन च तयोः सारं विलोक्याखिलम् ।**

**तन्त्रे दोषगुणेन दुर्गमतरे सिद्धान्तदीक्षागुरुः,**

**गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम् ॥"**[35] इति ।

वाक्यमेनं प्रति मनोनिवेशे सति बुध्यते यत् – गङ्गेशेन न्यायशास्त्रस्य नानामतानि अवगतानि, प्रभाकरादिमीमांसकानां मतमपि सम्यक्त्वेनालोचितम् । अपि च, विविधचिन्तनात्परं तेन महापादेन ग्रन्थोऽयं विरचितः। श्लोकेऽस्मिन् 'दिव्यविलोचनेन'

---

34 व्या.प., सम्पा. राजेन्द्रनाथघोष, पृ. - ०४

35 तदेव, पृ. – ०५-०६

इति पदेन ज्ञायते यत् तं प्रति दैवप्रभावोऽभवत् । तथापि तेनाचार्येण बहुलपरिश्रमः कृत इति विषये नास्ति कोऽपि संशयः। वस्तुतस्तु आचार्येण न्यायसूत्रप्रणेतुः गौतमस्य प्रथमपदार्थप्रमाणमवलम्ब्य *'तत्त्वचिन्तामणिः'* इति नव्यन्यायग्रन्थो विरचितः। ग्रन्थोऽयं प्रत्यक्षानुमानोपमानशब्दप्रमाणचतुष्टयात्मकः। प्रत्येकं प्रमाणमवलम्ब्य अयं ग्रन्थो हि भागचतुष्टयात्मकः। तेषां भागानां नाम हि प्रत्यक्षचिन्तामणिः, अनुमानचिन्तामणिः, उपमानचिन्तामणिः, शब्दचिन्तामणिश्च ।

एष खलु नव्यनैयायिकतिलको दरभङ्गामण्डलान्तर्गते कमलारोधसि वर्तमाने कोरानग्रामे कस्यचित् श्रोत्रियस्य सदने समजनि । शैशवान्त एव चायं तर्कशास्त्रे निष्णातो महाकाल्युपासकश्चाभूत् । स च सप्तपदार्थीनिबन्धप्रणेतुः शिवादित्यस्योल्लेखात् वैशेषिकदर्शनावलम्बिनो रत्नकोशाख्यमहानिबन्धधृत-मतस्योट्टङ्कनाच्च पञ्चशताधिकैकादशशते स्वीयसंवत्सरादूर्धमासीद् भूमण्डल इत्यनुमीयते । यस्मात् चिन्तामणिग्रन्थे व्याघ्रशिशुकापराह्वयोरानन्दसूर्यपरचन्द्रसूर्योः बौद्ध-नैयायिकयोर्मतं सिंहव्याघ्राख्यव्याप्तिपूर्वपक्षलक्षणयोरपदेशेनोद्धृत्य निरस्तम् इति । खण्डनखाद्यमतखण्डनाच्च ११४६ ईसवीयाब्दे समये वर्तमानस्य कन्नौजाधिपतेः जयचन्द्रस्य राज्ञः सभापण्डितस्य श्रीहर्षस्य समकालीनोऽयमिति वदन्तीतिहासविज्ञाः। एवं चाद्यमतेन गङ्गेशोपाध्यायस्य समयस्त्रयोदशशताब्द्याः प्रथमभागोऽन्त्येन तु द्वादशशताब्द्या अन्तिमभाग इति विज्ञायते । किञ्च, तस्यैक पुत्रः आसीत् यः न्यायशास्त्रे व्युत्पन्नो बभूव । एष परिचयः गङ्गेशोपाध्यायपुत्रबर्धमानोपाध्यायेन कथितः न्यायलीलावत्याः प्रकाशटीकायाम् –

**"न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।**

**गङ्गेशस्य गुरवे पित्रेऽत्र भवते नमः॥"**[36] इति ।

[36] व्या.प., सम्पा. राजेन्द्रनाथघोष, पृ. - १६

## १.२) रघुनाथशिरोमणिः -

महामहोपाध्यायगङ्गेशोपाध्यायजीवनवृत्तवन्महामतिरघुनाथशिरोमणिमहापादस्य जीवनवृत्तमपि अद्यापि तमसाच्छन्नम् । वस्तुतस्तु यस्याविर्भावेन निखिलभारतवर्षस्य तथा वङ्गदेशस्य सम्मानं बर्धितम्, तस्य महामानवस्य हि जीवनकथा सर्वैः विस्मृता । तथाहि लोकमुखप्रवादैः रघुनाथजीवनवृत्तं ज्ञातुं बाध्याभवाम । तथापि स्मरणीयं यत् तेषु प्रवादेषु मतभेदो दरीदृश्यते । यथा वदन्ति स महामानवो नवद्वीपे जनिं लेभे, केऽपि वा श्रीहट्टे समजनि ।

यद्भवतु, रघुनाथसम्बन्धे प्रवादद्वयं प्रचलितमस्ति निखिलभूमण्डले । तद्धि – बाल्यकाले हि रघुनाथस्य पिता लोकान्तरमगमत् । जनन्या महता कृच्छ्रेण रघुनाथस्य पोषणं विहितम् । एकदा पञ्चवार्षिकोऽयं रघुनाथो मात्रादिष्टः – "रघुनाथ ! पण्डितप्रवरवासुदेवसार्वभौमस्य पाठशालातः पाकार्थमग्निः समानीयताम्" इति। मातुराज्ञां शिरसि धृत्वा रिक्तपाणिरेव रघुनाथबालोऽग्निमानेतुं तत्र गतः तत्रत्यांश्छात्रानग्निमयाचीद् – "दीयतां स्तोकं भो भ्रातरोऽग्निः" इति । ते छात्रा रिक्तहस्तं तमालोक्य च कथितवन्तः 'अस्मिन् रिक्तहस्ते हि !' तदा रघुनाथो मृत्तिकायुक्तहस्तं बर्धयित्वा प्रोवाच – "दीयतां मे हस्ते हुताशनः" इति । इदञ्च समस्तमपि दृश्यं निशाम्य आसनासीनः महामहोपाध्यायसार्वभौमस्तस्य बालस्यालौकिकीं प्रतिभां मनसा विचारयन् बालस्यानुगमनं चकार । बालस्य गृहगमनान्तरमाचार्यसार्वभौमस्तदीयां मातरं प्रत्युवाच – "हे मातस्तेऽयं बालकश्चास्ति महान् बुद्धिमान् प्रतिभावान् प्रत्युपन्नमतिमांश्चेति मे मतिः। अयञ्च बालो महानेव तार्किको भवितुमर्हति भवतीमं बालकं मह्यं चेद् दद्याद् दास्यति वेति । अयञ्च मत्तः सर्वमपि न्यायशास्त्रमधीत्य महांस्तार्किको भविष्यतीति मे सुदृढो विश्वासः" इति । रघुनाथस्य माता सादरं सविनयञ्च प्रोवाच – "यदयन्तु चास्ति मदीयसमुपकारः" इति।

ततश्च तदानीमेव बालकमात्मना सहैव स्वगृहमानीतवान् महान् विद्वान् सार्वभौमः। तथा 'क', 'ख' इत्यादिवर्णानामेव प्रारम्भिकीं शिक्षां प्रारब्धवान् । तत्र समये एकः प्रवादः प्रचलितोऽस्ति । यथा –

**रघुनाथः** – हे गुरो ! अस्यैवार्थात् 'क' इत्यस्यैव नामधेयं 'क' इति कथमस्ति कथं वोच्यते ? 'ख' इत्यस्य 'ग' इत्यस्य वा नामकरणं 'क' इति कथं न कृतमित्युच्यताम् ?

**सार्वभौमः** – 'क' इति चास्ति ब्रह्मा । ब्रह्मैव च सृष्टेः सर्वतः प्राक् समुत्पन्नो जातः। अत एव 'ब्रह्मा' इत्यस्य स्थानीयः 'क' एव सर्ववर्णेषु 'क' इति नाम्ना प्रोच्यते ।

एवम्भूतं समाधानं निशम्य श्रावणप्रत्यक्षविषयीकृतस्य बालकस्य महान् सन्तोषो जातस्तथा गौरवप्रयोज्यायाः गुरुभक्तेः श्रद्धायाश्च वास्तविकं गुरुवरं श्रीसार्वभौमं प्रति परमसंबर्धनमभूत् ।

किञ्च एकदा वासुदेवो रघुनाथं पूजनार्थं पुष्पाणि आनयितुमुवाच । रघुनाथोऽपि झटिति पुष्पाणामाहरणं कृत्वा प्रतिजगाम । कुसुमराशिं हस्तोपरि निशाम्य सार्वभौमो रघुनाथं प्रति समुवाच – "अरे निर्बोध ! हस्तेन पुष्पाणि आनेतुमस्ति वा?" रघुनाथेनापि तदैवाञ्जलेरुपरिस्थितपुष्पस्तवकः पुष्पपात्रे स्थापितः। वासुदेवसार्वभौमः रघुनाथस्य कार्यमिदं न बोधितम्, परन्तु विस्मितं भूत्वा जिज्ञासितम्, "किमभवत्?" तदा रघुनाथैः प्रत्युत्तरं प्रदत्तम्, "निम्नस्थपुष्प-राजिस्तूपरिस्थितपुष्पाणामाधार एव, तथाहि मया पुष्पपात्रे तत्स्थापित उपरिस्थितपुष्पस्तावकः" इति । वासुदेवेन रघुनाथस्योत्तरं निशम्याशीर्वचनं प्रदत्तमिति ।

तदनन्तरञ्च श्रीरघुनाथो महानैयायिकस्य श्रीवासुदेवसार्वभौमस्य पार्श्वे सकलं शास्त्रं समधीत्यान्ततो गत्वा विशेषजिज्ञासानिवृत्तये आहोस्वित् विद्यापरीक्षणं

कर्तुकामः श्रीपक्षधरस्य महान्यायशास्त्रविदुषः सकाशं गतवान् । अत्रेदमवधेयं यत् श्रीरघुनाथ एकाक्षिविहीनः 'काणः' आसीत् ।

तत्र पक्षधरमिश्रगृहं गत्वावलोकितम् – प्रथमे द्वारेऽष्टौ प्रकाण्डपण्डिताः, द्वितीये पञ्च, तृतीये त्रयो नियुक्ताश्च आसन् । तान् अविजित्य पक्षधरमिश्रदर्शनमेवासम्भवीति । तथाहि शिरोमणिस्तान् विजित्य पक्षधरमुपेयिवान् इति । तं नवागतं बालमालोक्य विलक्षणमेकाक्षं पक्षधरः प्रपच्छ –

**"आखण्डलः सहस्राक्षो, विरुपाक्षस्त्रिलोचनः ।**

**अन्ये द्विलोचनाः सर्वे, को भवानेकलोचनः ॥"**[37] इति ।

त्वरितं प्रत्युत्तरितं कल्पकशिरोमणिना –

**"आखण्डलः सहस्राक्षः, शङ्करस्तु त्रिलोचनः ।**

**यूयं विलोचनाः सर्वे, वयं न्यायैकलोचनाः॥"**[38] इति ।

'को भवानेकलोचनः' इत्यस्यान्यदप्युत्तरं दत्तं शिरोमणिना –

**"विदुषां निर्वहैरिहैकमत्या यददुष्टं निरटङ्कि यच्च दुष्टम् ।**

**मयि जल्पति कल्पनाधिनाथे रघुनाथे मनुतां तदन्यथैव ॥"**[39]

पुनर्मिश्रैरभिहितम् –

**"वक्षोजपानकृत्काण ! संशये जाग्रति स्फुटम् ।**

**सामान्यलक्षणा कस्मादकस्मादपलुप्यते ॥"**[40] इति ।

---

37 न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - ८४

38 द.शा.इ., पृ. - २९

39 प्रागेव, पृ. – ९०

40 तदेव, पृ. - ८५

अस्योत्तरं सामान्यलक्षणाग्रन्थे 'अत्र वदन्ति' कल्पे मिश्रमतदूषणावसरे सम्यक् प्रदत्तम्। पुनरपि दीधितिकृद्भिरभिहितम् –

**"कुशद्वीपनलद्वीपनवद्वीपनिवासिनः।**

**तर्कसिद्धान्तसिद्धान्तशिरोमणिमनीषिणः॥"**[41] इति ।

अत्रापरमेकमुत्तरं प्राप्यते, पक्षधरस्य वचनं श्रुत्वा रघुनाथो दुःखितो बभूव, परन्तु सोऽपि सविनयेन तथा श्लेषेणाह –

**"योऽन्धं करोत्यक्षिमन्तं यश्च बालं प्रबोधयेत् ।**

**तमेवाध्यापकं मन्ये तदन्ये नामधारिणः॥"**[42] इति ।

तथा च केऽपि वदन्ति कथोपकथनमिदं 'सामान्यलक्षणा' इति ग्रन्थविरचने काले सञ्जातम् ।

यद्भवतु तदाकर्ण्य विज्ञाय च कुशाग्रतरं तं मिश्राः सम्यगध्यापितवन्तः। एकदा काव्याद्यालोचनाप्रसङ्गे पक्षधरः तत्प्रियशिष्यं प्रति आह – "रघुनाथ ! त्वं काव्यादौ तादृशो नोत्तमः।" परन्तु रघुनाथस्यैतद्वचनं प्रियं नाभवत्, तदुत्तरतयेरितम् –

**"तर्केषु कर्कशधियो वयमेव नान्ये,**

**काव्येषु कोमलधियो वयमेव नान्ये ।**

**तन्त्रेषु यन्त्रितधियो वयमेव नान्ये,**

**कृष्णेषु संयतधियो वयमेव नान्ये ॥"**[43] इति ।

एतदुत्तरं निशम्य पक्षधर आह – "सत्यमेव, तव कवित्वशक्तिः विद्यते इति पश्यामि,

---

41 न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - ८५

42 तदेव

43 तदेव, पृ. - ८७

तथा काव्यरचनेयं कदा शिक्षिता ?" तदुत्तरे उवाच रघुनाथः –

**"कवित्वं कियदौन्नत्यं चिन्तामणिमणीषिणः।**

**निपीतकालकुटस्य हरस्येवाहिखेलनम् ॥"**[44] इति ।

किञ्च, एकदा पक्षधरेण कथोपकथने कथितम् – "केवलं नैयायिके सति काव्यरसैः कदापि तद्धृदयानि नाभिषिक्तानि। यथा वैयाकरणाः ख-फ-छ-ठ-इत्यादिवर्णेषु व्यस्ताः, नैयायिका अपि तद्वत् घट-पटादिषु व्यस्ताः" इति । तदुत्तरे रघुनाथशिरोमणिना निगदितम् –

**"पठन्तु कतिचिद्धठात् ख-फ-छ-ठेति वर्णाञ्छटा,**

**घटः पठ इतीतरे पटु रटन्ति नैयायिकाः।**

**वयं वकुलमञ्जरी गलदपार-माध्वीकधु-**

**र्धुरीनपदरीतिभिर्भणितिभिर्विनोदामहे ॥"**[45] इति ।

किञ्च, एकदा रघुनाथमुद्दिश्य पक्षधरेण वङ्गीयानामाचारव्यवहारनिन्दायाः पूर्वकं रघुनाथस्य कवित्वशक्तिं प्रति अवज्ञा प्रकाशिता । यतः तदुत्तरे रघुनाथेन किमुत्तरितमिति श्रोष्यति पक्षधरः। रघुनाथोऽपि गुरुदेवस्याभिप्रायमुपलभ्य मैथिलीवासिन् प्रति श्लेषात्मकभाषयोवाच –

**"अनासाद्य गौडीमनाराध्य गौरीं**

**विना तन्यमन्त्रैर्विना शब्दचौर्यात् ।**

**प्रबुद्ध-प्रसिद्ध-प्रबन्ध-प्रवक्ता,**

**विरञ्चि-प्रपञ्चे मदन्यः कविः कः॥"**[46] इति ।

---

44 न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - ८७

45 तदेव, पृ. - ८८

46 प्रागेव

क्रमेण रघुनाथस्य पाठकार्यं समाप्तं जातम् । रघुनाथायोपाधिः प्रदत्ता, प्रदेशश्च प्राप्य पाठशालायामुपाधिप्रदानेऽपि समर्थो रघुनाथ इति वचनमुद्घोषितम् ।

अथ रघुनाथः स्वगृहप्रत्यागमनार्थं पुस्तकानादाय गुरुं गतवान् आशीर्वचनप्राप्तये । परन्तु पक्षधर उवाच – "शिष्य ! पुस्तकानदाय न गन्तुमाप्नुहि, मिथिलाया नियमविरुद्धात्" इति । तदा रघुनाथस्य शिरसि वज्राघातोऽभवत् वचनेनानेन । तथाहि तेन निरुपायेन तत्कालात् समुदायशास्त्रान् कण्ठस्थीकृत्य गृहप्रत्यागमनं कृतम् । अत्रेदमवधेयं यत् समयेष्वेषु एकं जनप्रियवृत्तमस्ति । एकदा नैयायिकच्छात्रैः पण्डितैश्च भूयिष्ठे विद्वत्समाजे चतुष्पाठ्या अध्यापकः पक्षधरस्तर्कशास्त्रे व्युत्पन्नं रघुनाथशिरोमणिमन्यैर्मैथिलच्छात्रैः विवाद्य न ते विचारा ग्राह्या इत्यन्तेऽधिक्षिप्तवान् । तदसहमानेन शिरोमणिना पक्षधरमिश्रान् हन्तुं सासिना तद्गृहसमीपेऽपावृतशरीरेणास्थायि । निशि कान्तया सहेन्दोः सुषमां पश्यतो गवाक्षस्थितस्य पक्षधरमिश्रस्य शिरश्छेत्तुं यदा प्रवृत्तो रघुनाथस्तदेन्दोरप्यधिकं प्रकाशमानमेकं मुखं जगत्यस्मिन् वर्तते यदहमहोरात्रं चिन्तये यदाधारं नैयायिकप्रवरं मिथिलायामद्य जेतुं कोऽपि न क्षम इति पक्षधरवचनश्रवणमात्रेण तद्धस्तादसिर्भूमौ विग्रहश्च चरणयोः पपात इति ।

यद्भवतु प्रत्यावृत्य च मिथिलाया आचार्यवासुदेवसमीपे प्रणामं विधाय समवस्थिते रघुनाथे आचार्यपादा अपृच्छन् –

**"अयि दिवसमनैषीः पद्मिनीसद्मनि त्वम्,**
**रजनीषु निरतोऽभू कैरविण्यां रमण्याम् ।**
**कथय कथय भृङ्ग ! स्वच्छभावेन तावत्,**
**किमधिकसुखमैषीरत्र वा तत्र वेति ॥"**[47] इति ।

---

[47] न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - ८८

शिरोमणयः प्रत्यवोचन् –

> **"त्वं पीयूष दिवोऽपि भूषणमसि द्राक्षे परीक्षेत को,**
> **माधुर्यं तव विश्वतोऽपि विदितं साध्वी च माध्वीकता ।**
> **किन्त्वेकन्त्वपरन्त्वरुन्तुदमपि ब्रूमो न चेत्कुप्यसि,**
> **यः कान्ताधरपल्लवे मधुरिमा नान्यत्र कुत्रापि सः॥"**[48] इति ।

दुःखितः सार्वभौमपाद उवाच –

> **"यस्या जन्मान्यवंशे वसतिरपि सदा दूरदेशे पुरासीत्,**
> **सेषा भूत्वा वधूटी प्रकटितविनया वेश्ममध्ये प्रविश्य ।**
> **आजन्मप्राणतुल्यान् गुरुजनजननीसोदरान् बन्धुवर्गान्,**
> **दूरीकृत्य स्वगेहात् पतिमभिरमते धिग् गृहस्थाश्रमं तम् ।"**[49]

यद्भवतु रघुनाथैः नवद्वीपमागत्य चतुष्पाठी प्रतिष्ठापिता, परन्तु स विद्वान् धनहीन आसीत् । तथाहि तेन हरिघोषाभिधधनवन्तं प्राप्य गवालयस्य पार्श्वे चतुष्पाठीप्रतिष्ठापनाय प्रार्थितम् । हरिघोषोऽपि सम्मतिं दत्तवान् । रघुनाथैश्चतुष्पाठी उन्मोचिता । क्रमेण तत्र भारतवर्षस्य सर्वतः विद्यार्थिनः आगमनान्मिथिलायाः मानमतीव क्षीणं जातम् । अत्रैव तर्कवितर्कस्य तथा न्यायस्य भाषा बोधितुमशक्यत्वात् रघुनाथस्य चतुष्पाठी 'हरिघोषस्य गवालयः' इति उक्त्वोपहास्यताम् । अत्रैव नव्यन्यायस्य मूलभूतग्रन्थस्य चिन्तामणौ श्रीरघुनाथशिरोमणेः 'दीधिति'नाम्नी टीका प्रकाशिता । इमामेव टीकामाश्रित्य गादाधरटीकाजागदीशटीकादीनामपि निर्माणं जातम् ।

---

48 न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - ८७

49 तदेव, पृ. - ८९

अथेदं स्मरणीयं यदेतावज्ज्ञातं रघुनाथः पक्षधरस्य शिष्य आसीत् । परन्तु 'वङ्गे नव्यन्यायचर्चा' इति ग्रन्थे पण्डितमहाभागैः दीनेशचन्द्रभट्टाचार्यैः कतिपययुक्तिभिः प्रमाणं कर्तुं सचेष्टं रघुनाथः कदापि शिक्षणार्थं पक्षधरं निकषा नागतो मिथिलाम्, स तु विचारार्थं तत्र गतः। किञ्च रघुनाथः पक्षधरस्य शिष्यो नासीत् । तैः महाभागैः तदीये ग्रन्थे एवं लिखितं तद्धि तल्लिप्या प्रदत्तं मया –

"শ্রীরামপুরের পাদ্রী ওয়ার্ড সাহেব তাহার 'হিন্দু' গ্রন্থের প্রথম সংস্করণে (১৮১১খ্রী.) লিখিয়াছেন – **'Raghunatha-Shiromanee, another pandit, envied the fame of Pakshadhara and challenged him to a grand dispute, to try which was the most learned. The king commanded the meeting to take place. They meet at pakshadhara's school. For some days the disputation continued, but Raghunatha obtained no advantage over his adversary; till at length he thought of an expedient which gained him a dishonorable victory having obtained the affections of the daughter of Pakshadhara, he persuaded her to place herself in an indecent situation, in the midst of the dispute, in a place where her father would see her. She did so: as soon as her father glanced his eye on her, he was over whelmed with confusion and his adversary had the advantage over him in every succeeding argument. (The Hindus, 1st ed. Vol. I, P. 336)'**

এই গল্পে স্পষ্ট বোঝা যায়, শিরোমণি পক্ষধরের ছাত্র ছিলেন না | ওয়ার্ড সাহেব পরবর্তী সংস্করণগুলিতে এই অদ্ভূত অবিশ্বাস্য গল্পটি পরিত্যাগ করিয়া, নিম্নলিখিত মহামূল্যবান এবং মনোহর কাহিনী লিপিবদ্ধ করিয়াছেন –

**'The learned men of Bengal are proud of the honor of considering this philosopher, who born at Nadiya, as their countryman; the following legends are current respecting him : when arrived at Mithila to**

presents his studies under Vachaspatee Mishra, it is said that he attained at once the seat next to his teacher, rising over the heads of all the other students. Pakshadhara Mishra a very celebrated NaiyayikaPandit, after having overcome in argument all the learned men of Hindusthana, arrived with a great retinue, elephants, camels, servants etc. at Nadiya. The people collecting around him, he asked them who was the most learned man in those parts; they give the honor to Shiromanee, who was, in fact, at that moment performing ablutions in the Ganges; Paksha, on seeing him, pronounced this couplet:

How sunk in darkness Gour must be,
Whose sage is blind Shiromani.

(f.n. This Pandit had lost the sight of one eye)

He then sent to the raja, challenging all the learned men at his court to a disputation: but Shiromanee completely overcame his opponent and Mishra retired from the controversy acknowledgement the superiority of the blind Shiromanee.

(f. n. This letter story is sometimes related in terms different from these) (The Hindus, ed. London 1833. Vol. II, P. 225)'

এখানে অজ্ঞাতপূর্ব নূতন কথা লিপিবদ্ধ হইয়াছে যে, শিরোমণি পক্ষধর মিশ্রের ছাত্র নহেন, পরন্তু মৈথিল বাচস্পতি মিশ্রের ছাত্র। কিন্তু রঘুনাথের পঠদ্দশায় যজ্ঞপতি ও পক্ষধরের যুগে বাচস্পতির নিকট তাহার ন্যায়শাস্ত্রের পাঠগ্রহণ সম্ভবপর নহে। মিথিলায় রঘুনাথ মোটেই পড়েন নাই, উক্ত প্রবাদদ্বয়ে এইরূপ ধারণার বীজ রহিয়াছে।

শিরোমণিসম্বন্ধে পক্ষধরের উল্লিখিত পরিহসোক্তি – 'অভাগ্যং গৌড়দেশস্য যত্র কাণঃ শিরোমণিঃ' – পণ্ডিতসমাজে চিরপ্রসিদ্ধ আছে। প্রবাদ অনুসারে মিথিলায় তাহারা তিনজন একসঙ্গে গিয়াছিলেন – অধ্যয়নার্থ নহেন, পরন্তু বিচারার্থ নিমন্ত্রিত হইয়া। প্রবাদশ্লোকটি তাহা হইলেই সার্থক হয় –

**कुशद्वीप-नलद्वीप-नवद्वीपनिवासिनः।**

**तर्कसिद्धान्त-सिद्धान्तशिरोमणि-मनीषिणः॥"**[50] इति।

परन्तु मम मतं हि शिरोमणिर्यथा वासुदेवस्य छात्र आसीत्तथैव पक्षधरस्यापि। कारणं हि तदानीन्तनकाले नव्यन्यायस्य मूलं हि मिथिला। अत एव कोऽपि यदि नव्यन्याये निष्णातो भवितुमिच्छति तर्हि तस्य मिथिलागमनमावश्यकम्। यतः तदानीं वङ्गे यः खलु श्रेष्ठनैयायिक आसीत् स वासुदेवसार्वभौमः, तथापि प्रतिष्ठाप्राप्त्यर्थमधिकज्ञानार्थं शिरोमणेरिच्छा सदासीदिति तु वासुदेवेनापि स्वीकृतम्। वासुदेवेनैतदनुभूतं यत् शिरोमणिः अतीव मेधावी शिष्य आसीत्, तस्य जिज्ञासायारन्तो नासीत्। तथाहि तेन चिन्तितं मिथिलां गत्वा यदि पक्षधरमिश्रस्य समीपे तस्य प्रियशिष्येण पठनकार्यं समाप्यते तर्हि तस्य चिन्ता सफला भवतीत्येका युक्तिः। अन्या हि वासुदेवः स्वस्य श्रेष्ठत्वप्रतिपादनार्थं रघुनाथं मिथलायां प्रेरितवान्। किन्तु सा चिन्ता न सफला। कारणत्वेन वक्तुं शक्यते यदस्मिन् विषये वासुदेवेन कथितम् –

**"अयि दिवसमनैषीः पद्मिनीसद्मनि त्वम्,**
**रजनीषु निरतोऽभू कैरविण्यां रमण्याम्।**
**कथय कथय भृङ्ग! स्वच्छभावेन तावत्,**
**किमधिकसुखमैषीरत्र वा तत्र वेति॥"**[51] इति।

तदा शिरोमणिना भणितम्–

**"त्वं पीयूष दिवोऽपि भूषणमसि द्राक्षे परीक्षते को,**
**माधुर्यं तव विश्वतोऽपि विदितं साध्वी च माध्वीकता।**

---

50 व.न.न्या.च., पृ. – ९५-९६

51 न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - ८८

**किन्त्वेकन्त्वपरन्त्वरुन्तुदमपि ब्रूमो न चेत्कुप्यसि,**

**यः कान्ताधरपल्लवे मधुरिमा नान्यत्र कुत्रापि सः॥"**[52] इति ।

शेषोक्तश्लोकेन ज्ञायते यत् रघुनाथेन मनसि एव पक्षधरो गुरुत्वत्वेन विवेचितः। किञ्च वक्तुं शक्यते यत् तदानीं वङ्गदेशे नव्यन्यायस्य प्राथमिकपाठः प्रचलितः, मिथिलायान्तु नव्यन्यायस्य सम्पूर्णपाठः प्रचलितोऽभवत् । यथा वर्तमानकाले दृश्यते प्राथमिकपाठः ग्रामे भवति उच्चपाठस्तु नगरे एव ।

तेन महापादेन रचिता ग्रन्था हि – *तत्त्वचिन्तामणिदीधितिः*, पदार्थतत्त्वनिरूपणम्, आत्मतत्त्वविवेकटीका, प्रामाण्यवादः, नानार्थवादः, क्षणभङ्गुरवादः, आख्यातवादः, लीलावतीटीका, खण्डन-खण्डखाद्यटीका, गुणकिरणावलीप्रकाशदीधितिः, न्यायकुसुमाञ्जलिटीका, न्यायलीलावतीप्रकाश-दीधितिः, न्यायलीलावतीविभूतिः, ब्रह्मसूत्रवृत्तिः इति । परन्तु इदानीमेतेषु ग्रन्थेषु नैके ग्रन्था दुष्प्राप्या एव । अत्रेदमवधेयं यत् पदार्थतत्त्वनिरूपणम्, अवच्छेदकत्वनिरुक्तिः, नञ्वादः, आख्यानवादश्चेति चत्वारो मूलग्रन्थाश्च निर्मिता आचार्यैः।

अपि च, सामान्यलक्षणायाः, केवलान्वयिनः, केवलव्यतिरेकिणः, प्रागभावस्य, अभावविषयकबुद्धित्वावच्छिन्नं प्रति प्रतियोगिज्ञानस्य कारणतायाश्च खण्डनं कृतम् । इत्थञ्च नानाविधानां पदार्थानां खण्डनं विहितवान् श्रीशिरोमणिः। एवं स्थिते इदमेव निर्णीयते यदेवम्विधं खण्डनं मण्डनञ्च विदधानः तथा स्वीयबुद्ध्यपज-नूतनन्यायपदार्थकल्पनामाश्रित्यैव श्रीरघुनाथः 'शिरोमणिः' इति उपाधिभाजन-भूतोऽभूदित्यहं मन्ये ।

---

[52] तदेव, पृ. - ८९

सोऽयं शिरोमणिः अनुमितिग्रन्थे मङ्गलप्रकरणे सगर्वं सर्वान्नेव नैयायिकान् महानैयायिकान् वा निर्भत्सितवान् –

**“न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ।**

**अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः॥”**[53] इति ।

शिरोमणेराविर्भावकालविषये मतभेदो दरीदृश्यते पण्डितेषु । तथापि वक्तुं शक्यते यत् ई. १४७७ परिमितेऽब्दे श्रीमता रघुनाथशिरोमणिना नदियाशान्तिपुरे जनुर्गृहीता । परन्तु अत्र तद्विचारो न क्रियते बाहुल्यभयात् ।

## १.३) जगदीशतर्कालंकारः -

वङ्गविभूषणेन श्रीमता रघुनाथशिरोमणिना प्रणीतां नव्यन्यायशास्त्रप्रवर्तक-श्रीमद्गङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणिग्रन्थरत्नस्यातुलनीयां दीधितिव्याख्याम-वलम्ब्य दीर्घकालं व्याख्यानसहस्रधाराः प्रवहन्ति । तेषु महामहोपाध्यायजगद्गुरु-श्रीमद्जगदीशतर्कालंकारस्य दीधितिव्याख्यानमन्यतमं स्थानं प्रथते ।

पण्डितप्रवरोऽयं काश्यपगोत्रीययजुर्वेदशाखाध्यायिपाश्चात्यवैदिकमैथिलनैया-यिकविद्वद्वरश्रीमद्यादवचन्द्रविद्यावागीशतनुजोऽपि श्रीमान् जगदीशः शैशव एव पितृविहीनोऽग्रजस्य षष्ठीदासस्य शासनमुल्लङ्घ्य प्रायोऽनाप्ताक्षरपरिचयोऽना-विष्टोऽष्टादशवर्षं यावदभ्रमदसन्मार्गेण । ततश्च काचिद् घटनापरम्परा समबोधयेदेनमिति किंवदन्ती । सा चैवं हि कदाचित् पक्षिशावकाहरणमानसो महान्तं तालबृक्षमारुह्य पक्षिशावकानादातुं प्रसारितकरो विषमफणां विस्तीर्य दंशनार्थं कञ्चिद् विषधरं सर्पं विलोक्य प्रत्युत्पन्नमतिरगतिकोऽसौ जगदीशः सहसा दृढमुष्ठ्या तद्विषधरवदनं धृत्वा तालवृन्तस्य क्रकचाकारप्राप्तभागेन खण्डितं वदनं दूरे निक्षिप्तवान्। ततश्च क्रुध्यस्य सर्पस्य पश्चादर्धेन प्राक्संवेष्टितहस्तोऽसौ पश्चादर्धमपि तथैव खण्डशो विधाय भूमावपातयत् । तत्र समीपवर्तिना केनचित् सन्न्यसिना तस्य

---

53 न्या.प., पृ. - ०१

तादृशं प्रत्युत्पन्नमतित्वं साहसं तीक्ष्णबुद्धिं च समवलोक्य समीपमाहूय च जगदीशं सदुपदेशदानादिना प्रत्यबोधयत् । प्रतिबुद्धश्चासौ ततः प्रभृति निद्रामपि दूरीकृत्य द्युर्निशं महता प्रयत्नेनाध्यवसायेन च साहित्यव्याकरणादिकं तत्तदुपाध्यायेभ्यः सम्यगधिगत्य न्यायशास्त्रमपि कस्यचित् सार्वभौमोपाधिकस्य गुरोः सकाशादधीतवान्। तदुक्तं न्यायादर्शमङ्गलाचरणे –

**"यन्मादृशैः समुपदिष्टमजुष्टमन्यैः**
**श्रीसार्वभौमगुरुणा करुणामयेन ।**
**सिद्धान्तसारमिदमादरतस्तदद्य**
**विद्यार्थिनां गुणकृते प्रकृते वदामः॥"**[54] इति ।

किञ्च, एकः प्रचलितप्रवादोऽपि दृश्यते –

**"आदौ जगाजगुः पश्चाद्जगाजगुरनन्तरम् ।**
**अधुना ज्ञानसम्पत्या जगदीशायते जगा ॥"**[55] इति ।

लब्धतर्कालंकारोपाधिकोऽपि दारिद्र्याच्चतुष्पाठीं संस्थाप्याध्यापयितुं नाशकत् । तथापि अनुमानदीधितिटिप्पन्यां–

**"प्राच्यैरनुचितविविधक्षोदैः कलुषीकृतोऽप्यधुना ।**
**दीधितियुतमणिरेष श्रीजगदीशप्रकाशितः स्फरतु ॥"**[56] इति

स्वलिखितकारिकातो ज्ञायते तस्य दीधितिव्याख्यानं सुसङ्गतं समादृतञ्चासीदिति विद्यार्थिनस्तस्य समाकृष्टाः। किञ्च ज्ञायते दारिद्र्यमोचनाय सम्पादितास्तेन शूद्राः शिष्याः। तेषां प्रदत्तैर्वित्तैर्जीविकामर्जयन्निश्चिन्तमध्यापयामास विद्यार्थिनं, प्रणितवांश्च शब्दशक्तिप्रकाशिकातर्कामृतादिमूलग्रन्थान् प्रत्यक्षानुमानोपमानशब्दमयूखप्रत्यक्षानु-

---

[54] न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - १०४

[55] व.न.न्या.च., पृ. - १७१

[56] न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - १०४

मानलीलावतीदीधितिटीकाद्रव्यसूक्तिगुणसूक्तिन्यायादर्शमुक्तिविचारादिटीकाग्रन्थान्। पण्डितराजस्यास्याविर्भावकालोऽद्यापि सन्देहदोलामध्यास्ते । केचन १५४०-१५५० ईसवीयाब्दे जातोऽयं जातक इति प्राहुः। कैश्चिच्च –

> **"शाके रन्ध्राद्रिवाणक्षितिपरिगणिते माघमासे नवम्यां**
> **पक्षे चैवावलक्षे ग्रहपतिदिवसे जीवयुग्युग्मलग्ने ।**
> **न्यायालंकारधीरो निजगुरुरचितं पुस्तमेतत्समस्तं**
> **स्वीयं स्वीयाङ्गनस्थोव्यलिखदनलसोऽध्यापनार्थं सुखेन ॥"**[57]

इति श्लोकरचनाकाले (१५७६-१६५७ ई.) तस्यावस्थितिरनुमीयते । एवञ्च इमे महात्मनः शतायुरासन् न वेति गवेषणाविषयः।

अधुनाप्येतेषां वंशधरो नवद्वीपे वर्तते । तद्वंशीयपण्डितप्रवरश्रीयतीन्द्रनाथ-तर्कतीर्थमहोदयनिवासे संरक्षितस्य 'मुक्तिविचार' इति ग्रन्थस्यान्ते – **"इति गौडान्तर्गतनवद्वीपनिवासिवैदिकतार्किकचूडामणिश्रीयुक्तजगद्गुरुजगदीशतर्कालंकार-भट्टाचार्यमहामहोपाध्यायविरचितो मतभेदेन मुक्तिविचारः समाप्तः"**[58] इति । अत्र लिखनस्वरसादनुमीयते इमे तर्कालंकारपादा अनन्यलभ्यं सविशेषबहुमानज्ञापकं 'जगद्गुरु'रित्युपाधिं लब्धवन्तः।

तस्य रचिता ग्रन्था हि रघुनाथस्य दीधितिटीकोपरि जागदीशीव्याप्तिपञ्चकग्रन्थः, जागदीशीसिंहव्याघ्रग्रन्थः, जागदीशीव्यधिकरणग्रन्थः, *जागदीशीसामान्यनिरुक्तिग्रन्थः*, शब्दशक्तिप्रकाशिका, पक्षता, केवलान्वयिग्रन्थश्च । अन्ये ग्रन्था हि तर्कामृतम्, पदार्थचिन्तामणिः इत्यादयः।

## १.४) गदाधरभट्टाचार्यः -

नव्यन्यायशिरोमणिप्रणीतदीधितेर्याः खलु टीका जगति विराजते तासु 'गादाधरी'

---

57 तदेव, पृ. -१०१

58 व.न.न्या.च., पृ. - १७०

प्रथमं प्रधानञ्च स्थानं लभते । एतस्याः खलु निर्माता तर्ककर्कशप्रज्ञाप्रतिभाप्रभाप्रभावविहितानेकनिबन्धो वङ्गदेशीयविद्वन्मण्डलाभ्यर्हित-पादपीठः तार्किककुलनिकरकैरवकलाकरो बुधकुलकलापकमनीयावनितस्फुरन्मनीषा-विकाशित आगम इव सदा लोकहितपरायणः पुरन्दशेद्यानमिव विभत्सरः विदुरोऽपि धृतराष्ट्रपक्षगतः कुलाचारनिरतोऽपि कौलाचारविरतः कारुण्यकेदारङ्कारुण्य-कुङ्कुमस्य क्षीरसागरो विवेकरत्नविसरस्याप्रतिमप्रतिभाप्रसारविनोर्जितप्रति-पक्षाचार्यवर्यो श्रीजीवाचार्यतः प्राप्तजन्मा द्विजवरो नव्यनैयायिकानामग्रणीः गदाधरभट्टाचार्यः।

अयं भट्टाचार्यः श्रीजीवाचार्यस्यात्मजः सन् वङ्गनिवासी चापि श्रूयते । स गदाधरः पवनामण्डलान्तर्गतस्य 'पक्ष्मीपाशः' इति ग्रामस्य निवासी च श्रूयते । केचन 'बागुडा' स्थानीयामस्य जनिं वदन्ति ।

अत्रेदमवधेयं यत् गदाधरस्य पिता जनैकपण्डित आसीत्, तथा च तस्यार्थिकावस्थातीवोत्तमासीदिति । एकदा नवद्वीपप्रधाननैयायिकप्राध्यापकैः हरिरामतर्कवागीशमहापादैः निमन्त्रणोपलक्षे 'लक्ष्मीचायड' इति तथा 'बोगुडा' इति ग्राममुपस्थितं गदाधरस्य च पितुः श्रीजीवाचार्यस्यातिथ्यं स्वीकृतम् । तदा गदाधरो नवमवर्षीयो दशमवर्षीयो वा । तत्पित्रा गदाधरः तर्कवागीशमहापादपूजनाय पुष्पचयनं कर्तुं सचेष्टः। तैः पितुरादेशे पुष्पचयनं कृतम् । परन्तु पात्रव्यतिरेकेण पुष्पराशिमानेतुं दृष्ट्वा हरिराम उवाच – "बाल ! त्वं न जानासि, पात्रं विहाय पुष्पे आनयने तत्पुष्पमपवित्रं भवति । अत एव तव आनीतानि पुष्पाणि अपवित्राणि इति । तथाहि तत्पुष्पैर्न पूजनकार्यं भविष्यति ।" एतत् श्रवणमात्रं हि गदाधर आह – "पूजनीय ! उपरिस्थितपुष्पाणि निम्नस्थितपुष्पाणामुपर्यस्ति । अर्थान्निम्नस्थपुष्पाणि उपरिस्थपुष्पाणामाधारः। तथाहि हस्तसंलग्नपुष्पाण्यपवित्राणि न तु

तदुपरिस्थपुष्पाणि। अत एव उपरिस्थितपुष्पैः पूजनकार्यं भवेत् ।" एवमुत्तरं निशम्य हरिरामपादैः सन्तुष्टः विस्मयाविष्टश्च जातः। अत्रेदं स्मरणीयं यत् एवं कथा रघुनाथशिरोमणेरभिधानेऽपि श्रुता। या कथा मया पूर्वमेवालोचिता।

अथ गदाधरेण नदियाख्यं न्यायशास्त्रस्याद्यपीठं गत्वा हरिरामतर्कवागीशानां सविधे तर्कशास्त्रमधीतम्। श्रीहरिरामतर्कवागीशस्य युवावस्थायामेव स्वर्गगमनान्तरं तस्मिन्नेव स्थानेऽध्यापनकार्यार्थमस्य नियुक्तिर्जाता । परन्त्वस्य महानुभावस्याध्यापनकार्यतः सर्वथासन्तुष्टिं गतास्तेऽन्तेवसन्तोऽध्येतुमेव न हि कामयन्ते स्म।

अतोऽयं महानुभवो विद्वान् स्वीयाध्यापनस्य पदार्थतत्त्वज्ञानस्य वा सम्पुष्टिं कर्तुकामोऽरण्ये प्रान्तरे वापि गत्वा तत्र लतावृक्षादीन् सम्बोध्य पदार्थोपदेशमध्यापनदृष्ट्याहर्निशमनिशं विहितवन्त आसन् । तथा न्यायशास्त्रीयेषु कठिनस्थलेषु शास्त्रार्थरूपेण तैरेव लतावृक्षादिभिः सह विचारचर्चामपि विदधानः समये समये आसीदिति च गच्छन्तः समागच्छन्तश्च छात्रा अध्यापकाश्च तदीयान् विचारान् अध्यापनञ्च शृण्वन्त आसन्। ततश्च ते सर्वेऽपि न्यायशास्त्रपदार्थानां सद्रूपतां विज्ञाय पुनरस्याध्यापनकार्यतः सर्वथा समाकृष्टाः सन्तोऽस्य पार्श्वेऽध्येतुं समागतवन्तः। इत्थञ्चायं महानुभवः शतशोऽन्तेवासिनोऽध्यापयामास।

अस्य महापादस्यैका किंवदन्ती खलु एकदा तत्समकालीनस्य जगदीशतर्कालंकारस्य समीपं गदाधरभट्टाचार्याणां कश्चिच्छात्रः प्राप्तवान् । तर्कालंकारेण स्थलविशेषव्याख्यानार्थं पृष्टः स छात्रो गुरवे निवेदयति तमाक्षिप्तवान्। श्रुतवृत्तान्तास्तु गदाधरभट्टाचार्या स्वमतिवैभवेनासङ्गतस्यापि तस्य स्वव्याख्यानानुसारेण मूलपाठमपि संयोज्य लिखित्वा कस्यचिद्धस्तेन प्रेषितवन्तः। दृष्ट्वा तु तादृशं बुद्धिदार्ढ्यं चकितो जगदीशतर्कालंकारपादो मुग्ध इवाभूदिति।

किञ्चास्ति किंवदन्त्येका यत् एकदास्यात्मजाया विवाहः समुपस्थितो जातः। वरसहिता वरयात्रिणोऽपि समागताः। गोधूलीनामको वैवाहिको लग्नोऽपि समाप्तिं गतवान्। परन्त्वयं विद्वान् शौचालयस्थाने सन्तिष्ठमानः पदार्थमनुचिन्तयन् पङ्क्तिं वा

विचारयन्नेव सर्वमपि लग्नकालं व्यतीतवान् । छात्राश्च सर्वेऽपीतस्ततो गुरुस्वरं समन्वेष्टुकामाः परिभ्रमन्ति स्म । गुरुवरा इतो गता जनैः कथ्यमाने छात्रास्तस्यामेव दिशि गतवन्तः। कियद्दूरमेव गतास्ते छात्राः किं पश्यन्ति यद्गुरवः कस्मिंश्चिदेकान्तस्थाने वृक्षस्याधस्ताच्च सन्ति सन्तिष्ठमानाः, पुरीषञ्चोत्सृजन्ति । छात्रा अपि दर्शनानन्तरमेव दूरतः प्रोच्चारयन्ति – भो गुरवः! लग्नकालस्तु समाप्तिं गतवान् । गुरवो वदन्ति यत् – लग्नकालस्तु पुनरप्यागमिष्यति, परन्तु षड्भिर्मासैश्चिन्तितविषयतां गतेयं पङ्क्तिस्त्वद्यैव तथा इदानीमेव स्मृतिविषयतां गतेति महान् हर्षप्रकर्षः।

अत्रेदं वक्तव्यं यद् गदाधरेण शिरोमणिकृतस्य 'प्रत्यक्षचिन्तामणिदीधिति' ग्रन्थस्य भाष्यं कृतम् । तत्र एकः श्लोकः प्राप्यते –

**"नत्वा नन्दतनुज-सुन्दर-पदद्वन्द्वं गुरोरादरात्**
**उर्वीमण्डलमण्डनायित लसत्कीर्तेर्विदित्वा गुरुम् ।**
**संक्षिप्तोक्त्यतिदक्षदीधितिकृतः प्रत्यक्षचिन्तामणे-**
**र्व्याख्यां व्याकुरुते गदाधरवुधो मोदाय विद्यावताम् ॥"**[59] इति ।

श्लोकेनानेन केचित्तु गदाधरं शिरोमणेः छात्रत्वेन स्वीकुर्वन्ति । परन्तु तद्धि भ्रान्तः। कारणं शिरोमणिः गदाधरापेक्षया प्रायशः शतवर्षात् प्राक् वर्तमान आसीत् । वस्तुतस्तु शिरोमणिः नैयायिकसम्प्रदायस्य गुरुस्थानीयः तथाहि उक्तश्लोकेन गदाधरेण गुरुरूपेण पूजितः। अत एव गदाधरः शिरोमणेः छात्रो न भवेत् । किञ्च एकः प्रवादोऽपि अस्ति वङ्गभाषायाम् –

**"হরের গদা, গদার জয়।**
**জয়ার বিশু, লোকে কয়।"**[60] इति ।

---

[59] न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - १०९

किञ्च, गदाधरविषये ज्ञायते यत् – तस्य चत्वारः पुत्राः आसन् – रामचन्द्रः, रामदेवः, महादेवः, कृष्णदेवश्चेति। ते पुत्रास्तु पण्डिता आसन्।

तस्य विरचिता ग्रन्था हि तत्त्वचिन्तामणेरालोकटीका, तत्त्वचिन्तामणेस्तत्त्वप्रकाशिका, न्यायकुसुमाञ्जलिटीका, आत्मतत्त्वविवेकदीधितिटीका, *दीधितिटीकोपरि गादाधरीसामान्यनिरुक्तिग्रन्थः*, मुक्तावलीटीका, दुर्गासप्तशतीटीका, ब्रह्मनिर्णयः, प्रामाण्यवादः, व्युत्पत्तिवादः, शक्तिवादः इति।

---

[60] न.म., सम्पा. यज्ञेश्वरचतुर्धुरी, पृ. - ११०

# द्वितीयोऽध्यायः

# ॥ द्वितीयोऽध्यायः ॥

## सङ्गतिविवेकः

**'दृशिर् प्रेक्षणे'** (भ्वा. १०५७) इति ज्ञानार्थक-दृश्-धातोरुत्तरं करणे ल्युट्प्रत्यये दर्शनशब्दो निष्पन्नः। तस्माद् 'दृश्यते साक्षात्क्रियते परमतत्त्वं येन, तद् दर्शनम्' इति व्युत्पत्त्या तत्त्वज्ञानसाधनं शास्त्रं दर्शनमित्युच्यते । दर्शनशास्त्रं नाम विचारशास्त्रम् । विचारसमर्थकशब्दो व्यवहार इति भवितुमर्हति । यतो व्यवहारशब्दस्य विश्लेषणात्मकव्याख्या हि –

**"विनानार्थेऽवसन्देहे हरणं हार उच्यते ।**

**नानासन्देहहरणाद् व्यवहार इति स्मृतः॥"**[61] इति ।

अत्रेदं स्मरणीयं यद् भारतवर्षे कति दर्शनानि सन्तीति विषये विदुषां मध्ये नैकमत्यं दरीदृश्यते । यथा **'रुचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषाम्'**[62] इत्यत्र **पुष्पदन्तैः** समासेन दर्शनानां बहुत्वं प्रदर्शितम् । **भगवत्पादशङ्कराचार्याः** –

**"न सांख्यं न शैवं न तत्पाञ्चरात्रं ।**

**न जैनं न मीमांसकादेर्मतं वा ॥"**[63]

---

61 का.सं. – २६

62 म. स्तो. श्लोक-७

63 दशश्लोकः - ४

इत्यत्र सांख्य-शैव-पाञ्चरात्रागम-जैन-मीमांसकानां मतानि उल्लिख्यादिशब्दप्रयोगेण तेषामानन्त्यं प्रदर्शितवन्तः। **श्रीमाधवाचार्याः** सर्वदर्शनसंग्रहे चार्वाक-बौद्ध-जैन-रामानुज-पूर्णप्रज्ञ-नकुलीशपाशुपत-शैव-प्रत्यभिज्ञा-रसेश्वर-वैशेषिक-न्याय-जैमिनीय-पाणिनीय-सांख्य-योग-शाङ्करवेदान्ताख्यानां षोडशदर्शनानां परिगणना कृता ।

वस्तुतस्तु भारतीयविचारशास्त्रनामधेयदर्शनशास्त्रे द्विविधं मतं प्राप्यते । एकं हि आस्तिकमतं तथास्तिकदर्शनमतमपरं हि नास्तिकमतं तथा नास्तिकदर्शनमतम् । अत्रेदमवधेयं यत् नास्तिक-आस्तिकशब्दयोरर्थनिर्णयविधौ अपि पण्डितानां मध्ये वैमत्यं दृश्यते । भगवता पाणिनिना – **'अस्तिनास्तिदिष्टं मतिः'**[64] इति सूत्रेणास्तित्ववादिन आस्तिकाः, नास्तित्ववादिनश्च नास्तिका इत्यास्तिकनास्तिकशब्दयोर्निर्वचनं प्रदर्शितम् । तत्रास्तित्व-नास्तित्वशब्दाभ्यां यस्य पदार्थस्य सम्बन्धोऽस्ति तस्य विचारः परमावश्यकोऽस्ति, अन्यथा यस्यचित् कस्यचित्पदार्थस्य यस्मिन् कस्मिंश्चिद्रूपेऽस्तित्वाङ्गीकारे सर्वेषामास्तिकत्वापत्तौ नास्तिकसंज्ञाप्रयोगस्थलस्यैव दौर्लभ्यप्रसङ्गो भवेत् । ननु तत्र स पदार्थः कः? इति जिज्ञासायां 'अस्तिनास्तिदिष्टं मतिः' सूत्रस्य व्याख्यानावसरे वामन-कैयट-भट्टोजिदीक्षितादिभिः परलोकोऽस्तीति यस्य मतिरस्ति स आस्तिकः, तद्विपरीतो नास्तिक इति व्याख्यानद्वयं कृतम् । एवमेव श्रीमद्वीरराघवः – **"आस्तिक्यम्, अस्ति परलोक इति मतिर्यस्य स आस्तिकः, तस्य भाव आस्तिक्यम्"**[65] इति परलोकाङ्गीकारस्यैवास्तिकतां प्रतिपादयामास ।

आस्तिक-नास्तिकनिर्वचने भिन्नमतमपि प्राप्यते । यथा श्रीमाधवाचार्यैः –

---

64 अ. ४/४/६०

65 भा.पु. – ७/११/२३

**"नास्तिकशिरोमणे ! तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान्"**[66] इति जगत्स्रष्टृत्वेनेश्वरानङ्गीकर्तॄन् मीमांसकान् नास्तिकशब्देन सम्बोधितम् । एतेन निर्वचनेन एवमर्थो भवति ईश्वरोऽस्तीति मतिर्येषां त आस्तिकाः, ईश्वरो नास्तीति मतिर्येषां ते नास्तिका इति ।

पुनः वेदस्याप्रामाण्यपक्षेऽपि मतं प्राप्यते । यथा – तत्रभवान् मनु आह – **'नास्तिको वेदनिन्दकः'**[67] इति, एतन्मतानुसारेण 'अस्ति वेदः प्रमाणमिति मतिर्येषां त आस्तिकाः', 'नास्ति वेदः प्रमाणमिति मतिर्येषां ते नास्तिकाः' इति व्युत्पत्त्या वेदप्रामाण्यं ये दार्शनिकाः स्वीकुर्वन्ति त आस्तिकाः, तद्विपरीताश्च नास्तिका इति सिद्ध्यति ।

वस्तुतस्तु मोक्षलाभार्थं प्रत्येकं दार्शनिका भिन्नं भिन्नं मार्गं गृहीतवन्तः। तेषु दर्शनेषु षडास्तिकदर्शनानि सन्ति – न्यायदर्शनं, वैशेषिकदर्शनं, सांख्यदर्शनं, योगदर्शनं, पूर्वमीमांसादर्शनम्, उत्तरमीमांसादर्शनञ्च । एतेषु न्यायवैशेषिकञ्च समानतन्त्रदर्शनम्, सांख्ययोगदर्शनञ्च समानतन्त्रदर्शनम्, पूर्वमीमांसोत्तर-मीमांसादर्शनञ्च समानतन्त्रदर्शनम् । समानतन्त्रो नाम दर्शनसम्प्रदायरूपेण ते दार्शनिका भिन्नाः, परन्तु नैकानि मतानि तेषामनुरूपाणि ।

न्यायवैशेषिकदर्शनयोर्मध्ये न्यायदर्शने श्रेणीद्वयं वर्तते – प्राचीनन्यायदर्शनं नव्यन्यायदर्शनञ्च । न्यायो नाम नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति । न्यायशास्त्रं नाम न्यायविद्या, आन्वीक्षिकी इति । तथाहि न्यायसूत्रभाष्ये भाष्यकारेण वात्स्यायनेन भाषितम् – **"कः पुनरयं न्यायः? प्रमाणैरर्थपरीक्षणं न्यायः,**

---

[66] स.द.सं., सम्पा. वासुदेव शास्त्री अभ्यङ्कर, पृ. – ५१०

[67] म.स्मृ. – २/११

**प्रत्यक्षागमाश्रितमनुमानं, सान्वीक्षा, प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षा । तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या, न्यायशास्त्रम् । यत् पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः स इति ।"**[68] वस्तुतस्तु अनुमानं द्विविधं स्वार्थानुमानं परार्थानुमानञ्चेति । तत्र स्वार्थानुमानं नाम न्यायाप्रयोज्यानुमानम् । तत्प्रयोज्यानुमानं हि परार्थानुमानम् । न्यायत्वञ्च प्रतिज्ञाद्यवयवपञ्चकसमुदायत्वम् । अवयवत्वञ्च प्रतीज्ञाद्यन्यतमत्वम् । तदुक्तं विस्तरेण अन्नंभट्टेन विदुषा – **"अनुमानं द्विविधम् । स्वार्थं परार्थञ्चेति । स्वार्थं स्वार्थानुमितिहेतुः। तथा हि स्वयमेव भूयो दर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः, तद्गते च पर्वते धूमं पश्यन्नग्नौ सन्दिहानो व्याप्तिं स्मरति यत्र धुमस्तत्राग्निरिति । तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात् पर्वतो वह्निमान् इति अनुमितिरुत्पद्यते । तदेतत् स्वार्थानुमानम् । यत्तु स्वयमेव धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम् । यथा पर्वतो वह्निमान् धूमवत्त्वात्, यो यो धूमवान् स सोऽग्निमान् यथा महानसः, तथा चायम्, तस्मात्तथा इति । अनेन वाक्येन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते । प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि पञ्चावयवाः। 'पर्वतो वह्निमान्' इति प्रतिज्ञा । 'धूमवत्त्वादि'ति हेतुः। 'यो यो धूमवान् सोऽग्निमान् यथा महानस' इत्युदहरणम् । 'तथा चायमि'त्युपनयः। 'तस्मात्तथे'ति निगमनम् । स्वार्थानुमितिपरार्थानुमित्योः लिङ्गपरामर्श एव करणम् । तस्माल्लिङ्गपरामर्शोऽनुमानम्"**[69] इति ।

न्यायशास्त्रं तथा न्यायविद्येयं चतुर्दशविद्यास्वन्यतमा । तदुक्तम् –

---

68 न्या.द. (प्रथमखण्ड), सम्पा. फणिभूषणतर्कवागीश, पृ. - २९

69 त.सं., सम्पा. पञ्चानन शास्त्री, पृ. – १२७-१३२

**"पुराण-तर्क-मीमांसा-धर्मशास्त्राङ्गमिश्रिताः।**

**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥"**[70] इति ।

अन्यत्रापि एवं तथ्यं भणितम् -

**"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**

**पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥"**[71] इति ।

अत्र विद्यास्थानत्वं नाम चतुर्दशानां शास्त्राणां पुरुषार्थसाधनज्ञानोपायत्वमेवोच्यते । वेदनं नाम विद्या । तच्च न घटादिवेदनमपि तु पुरुषार्थवेदनम्, विद्यायाः स्थानमाश्रय उपाय इत्यर्थः। तच्च पुरुषार्थसाधनपरिज्ञानोपायत्वं कस्यचित् साक्षात्कारेण, कस्यचिदुपायद्वारेणेति । तानीमानि चतुर्दशविद्यास्थानानीत्याचक्षते । एतासु विद्यासु आन्वीक्षिकी नाम न्यायविद्या हि सर्वविद्यानां प्रदीपस्वरूपेति । तदुक्तं हि –

**"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।**

**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥"**[72] इति ।

वस्तुतस्तु प्रत्येकं दर्शनवन्न्यायदर्शनेऽपि मोक्ष एव मूल प्रतिपाद्यविषयः । मोक्ष इति शब्देन बुध्यते यद् इह खलु जगति मरणात् प्राग् यावत् सर्वे प्राणिनः सुखप्राप्तये दुःखनिवृत्तये च प्रवृत्ता भवन्ति । तत्रापि दृश्यते दुःखनिवृत्त्यर्थं मानवानां मध्येऽधिकः प्रयत्नः। तद्वन्न्यायसम्प्रदायमध्ये दुःखनिवृत्तये प्रत्येकं दार्शनिका यत्नशीला अभवन् । तत्तु केन प्रकारेण प्राप्तिर्भवतीति विषये विषयितं महर्षिगौतमेन तदीये न्यायसूत्रे –

**"दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायापवर्गः"**[73] इति ।

---

[70] या.सं. – १/३

[71] न्या.म., सम्पा. अमितभट्टाचार्य, पृ. - ०८

[72] अ.शा., सम्पा. मानवेन्दु बन्द्योपाध्याय, पृ. – ५८९

[73] न्या.सू. – १/१/२

ननु तत्त्वपरिज्ञानादव्यवहितोत्तरमपवर्ग उत क्रमेण व्यवहितमपवर्गः? न तावदाद्यः शास्त्रसम्प्रदायविच्छेदात् । न च द्वितीयोऽप्युपयुज्यते, प्रमाणादितत्त्व-ज्ञानान्निःश्रेयसाधिगम इति स्वसिद्धान्तविरोधादिति । तन्न पेशलम्, निःश्रेयसस्य परापरभेदभिन्नत्वात् । तथाहि न्यायवार्त्तिके कीर्त्तितम् – **"न तावत्तत्त्वज्ञानादपवर्ग उभयथा दोषात् । यदि तत्त्वपरिज्ञानान्तरमेवापवर्गः स्यात्तद्वतामवस्थानं न स्यात् । तद्वतां चावस्थानं दृष्टम्, कुतः? शास्त्रसम्प्रदायाविच्छेदात् । ...अथोत्पन्न-तत्त्वज्ञानोऽवतिष्ठते, न तत्त्वज्ञानं कारणम्, सत्यभावात् । ...न, निःश्रेयसस्य परापरभेदात्"**[74] इति ।

यत्तावदपरं निःश्रेयसं तत्त्वज्ञानान्तरमेव भवति । परं च निःश्रेयसं तत्त्वज्ञानात् क्रमेणोत्पद्यते । ननु कः स क्रम इति चेदुच्यते उक्तसूत्रम् । तदर्थो हि तत्त्वज्ञानान्मिथ्याज्ञानस्यापायस्ततश्च दोषस्य, ततश्च प्रवृत्तेः, ततो जन्मनस्ततश्च दुःखस्येति । अत एव उद्द्योत्कारेण एवं भणितं तदीये न्यायवार्त्तिके – **"क्रमप्रतिपादनार्थं चेदं सूत्रं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामित्येवमादि"**[75] इति ।

अत एव तत्त्वज्ञानेन निवृत्ते मिथ्याज्ञाने, तदभावाच्च गते दोषे रागद्वेषात्मके, तद्दोषापहृताच्च प्रवृत्तेरभावे, तदनुत्पत्तौ च जन्माभावस्ततश्च दुःखाभावादपवर्गः। तथा हि विश्वनाथेन वृत्तौ व्याहृतम् – **"तत्त्वज्ञानेन विरोधितयापहृते मिथ्याज्ञाने, कारणाभावाच्च निवृत्ते रागद्वेषात्मके दोषे, तदभावाच्च प्रवृत्तेर्धर्माधर्मात्मिकाया**

---

74 न्या.वा., पृ. – १५१-१५२

75 तदेव, पृ. - १५२

**अनुत्पत्तौ, तदभावाच्च जन्मनो विशिष्टशरीरसम्बन्धस्याभावाद् दुःखाभावादपवर्गः"**[76] इति।

तत्त्वसाक्षात्कारस्तावद् वासनाविपर्यासज्ञानतत्कार्यदोषतत्कार्यप्रवृत्तीनां निवृत्त्यैव प्रयतते, कारणनिवृत्त्यैवाप्रयत्नलक्ष्यत्वात् कार्यनिवृत्तेः। न हि कफोद्भव-ज्वरप्रशमनाय कफनिवृत्तौ सत्यां प्रयत्नान्तरमवतिष्ठते, तत एव तत्सिद्धेः। परं तु निःश्रेयसं न तावद् भवति, यावदुपभोगादुपात्तकर्माशयप्रचयो न क्षीयते, तस्मात्तत्त्वसाक्षात्काराधानप्रयत्नात्परस्तदुपभोगप्रयत्नश्चास्थेयः। अन्यथा तु निःश्रेयसद्वैविध्यशंकाप्यलीकैव । अत एव न्यायभाष्ये भाषितम् – **"यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति, तदा मिथ्याज्ञानापाये दोषमपैति, दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमपैति, दुःखापाये आत्यन्तिकोऽपवर्गो निःश्रेयसम्"**[77] इति।

यद्यपि अपरस्मिन्नपि निःश्रेयसे मिथ्याज्ञानदोषप्रवृत्तीनामपि समुच्छेदक्रमोऽस्ति, तथापि जन्मदुःखोच्छेदक्रमो नास्ति, पूर्वोपात्तकर्माशयप्रचयस्य तादवस्थ्यात् । तस्माज्जन्मदुःखोच्छेदक्रमसमभिव्याहृतो मिथ्याज्ञानाद्युच्छेदक्रमः परस्यैव निःश्रेयसस्यैवेति तदर्थमिदं सूत्रमुपस्थापितमाचार्यपादैः।

तत्र मिथ्याज्ञानं तावन्नैकप्रकारम् । तद्धि भाष्ये विस्तरेण भाषितम् – **"तत्रात्माद्यपवर्गपर्यन्तप्रमेये मिथ्याज्ञानमनेकप्रकारकं वर्तते। आत्मनि तावन्नास्तीति। अनात्मन्यात्मेति, दुःखे सुखमिति, अनित्ये नित्यमिति, अत्राणे त्राणमिति, सभये निर्भयमिति, जुगुप्सितेऽभिमतमिति, हातव्येऽप्रतिहातव्यमिति । प्रवृत्तौ नास्ति कर्म,**

---

[76] न्या.सू.वृ., सम्पा. शेख साविर आलि, पृ. - ४७

[77] न्या.द., सम्पा. अनन्तलालठक्कुर, पृ. - १५१

**नास्ति कर्मफलमिति । ... अपवर्गे भीष्मं खल्वयं सर्वकार्योपरमः, सर्वविप्रयोगेऽपवर्गे बहु भद्रकं लुप्यत इति कथं बुद्धिमान् सर्वसुखसुखाच्छेदमचैतन्यमपर्वगं रोचयेद्"**[78] इति ।

तस्माच्च मिथ्याज्ञानादनुकूलेषु रागः प्रतिकुलेषु द्वेषो जायते, रागद्वेषाच्च हिंसासत्येर्ष्यामिह लोभादयो दोषा भवन्ति । दोषैः प्रयुक्तः शरीरेण प्रवर्त्तमानो हि हिंसाप्रतिषिद्धमैथुनान्याचरति । वाचा च स पुरुषानृतवाक्यानि प्रयुञ्जत इत्येवं प्रवृत्तिरधर्ममूला जायते ।

क्वचिद्वा शरीरेण दानं परित्राणं परिचरणञ्चाचरति । वाचा च सत्यम् हितं प्रियं स्वाध्यायञ्च साधयति । मनसापि दयामस्पृहां श्रद्धाञ्च सम्पादयतीत्येवं धर्मजनिका प्रवृत्तिरुत्पद्यते । ततस्तस्या जायते जन्म । जन्म खलु शरीरेन्द्रियबुद्धिवेदनानां निकायविशिष्टः प्रादुर्भावः। तस्मिंश्च सति दुःखमुत्पद्यते । एवमेव मिथ्याज्ञानादिदुःखान्तचक्रभ्रम एव संसारः। स चानादिः पूर्वापरकालानियमात् । परन्तु यदा तत्त्वज्ञानान्मिथ्याज्ञानस्य निवृत्तिर्भवति, तदा क्रमेणापवर्गो जायते । तदुक्तं भाष्ये – **"यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति, तदा मिथ्याज्ञानापाये दोषा अपयन्ति, दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमपैति, दुःखापाये चात्यन्तिकोऽपवर्गो निःश्रेयसम्"**[79] इति । माधवाचार्येणापि निगदितम् सर्वदर्शनसंग्रहे – **"तस्मात् परिशेषात् परमेश्वरानुग्रहवशात् श्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवशतः पुरुषधौर्येरस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यम्"**[80] इति ।

ननु मोक्षस्वरूपं कीदृशं सम्भवतीति चेदुच्यते यत् च आत्यन्तिकं सुखं या

---

[78] न्या.द. (प्रथमखण्ड), सम्पा. फणिभूषणतर्कवागीश, पृ. – ६८-६९

[79] तदेव, पृ. - ७१

[80] स.द.सं., सम्पा. वासुदेव शास्त्री अभ्यङ्कर, पृ. - २५१

चात्यन्तिकी दुःखनिवृत्तिस्तयोर्मध्ये किंचिदेकमेव मोक्षशब्देनोच्यतेऽथ वा तदुभयं मिलितम् । एकमपि किमात्यन्तिकं सुखमेव मोक्ष उत आत्यन्तिकी दुःखनिवृत्तिरेव मोक्ष इति विकल्प इति त्रयः कल्पा भवन्ति । एतस्मिन्कल्पे आत्यन्तिकं सुखमेव केवलं मोक्ष इति कल्पो न कल्पयितुं शक्यते । आत्यन्तिकसुखसत्त्वेऽपि यदि तत्र आत्यन्तिकी दुःखनिवृत्तिर्नास्ति तर्हि यत्र लेशतोऽपि दुःखं विद्यते तत्र कथं सुखस्यात्यन्तिकत्वं स्यात् इति । यच्च निरतिशयं सुखं तदात्यन्तिकमित्युच्यते । दुःखासंस्पृष्टं हि सुखं दुःखसंयुक्तसुखापेक्षयातिशेत इति दुःखसंयुक्तं सुखं सातिशयं भवति न तु निरतिशयं तथा च तस्य कथमात्यन्तिकत्वम् ।

यदितरसर्वसुखापेक्षयाधिकं तत्र लेशतो दुःखसत्त्वेऽपि न तस्य सुखस्यात्यन्तिकत्वं हीयते । लेशतो विद्यमानं दुःखं च न सुखस्वरूपे कामपि न्यूनतां संपादयति किन्तु सुखसंवेदन इत्यभिप्राय इति । अनेन अभिप्रायेणेषद्दुःखसत्त्वेऽप्यात्यन्तिकसुखस्य मोक्षत्वं भाष्यते चेदस्तु नाम । नासौ मोक्षशब्दात् स्वारसिकोऽर्थः प्रतीयते । मोक्षो हि मुक्तता । दुःखलेशसत्त्वे कथं दुःखान्मुक्ततोच्यते । अथ यादृशो दुःखलेशः सन्नप्यनस्तिकल्पो या दुःखत्वेन न प्रतिभाति तत्र तादृशदुःखलेशसत्त्वेऽपि तस्य दुःखलेशस्य अप्रतिभासात्तस्मान्मुक्तता प्रतीयत एवेति यथाकथञ्चित्तत्र मोक्षशब्दोपपत्तिः इत्युच्यते चेदास्तां तावदात्यन्तिकदुःखनिवृत्त्यभावेऽप्यात्यन्तिकसुखस्य केवलस्य मोक्षत्वमिति । परन्तु एतादृशं मोक्षस्वरूपम् आत्मभेदवादिनां मत एव संगतं भवति । आत्मैक्यवादिनां नये त्वात्मभेदस्य लोके प्रतिभासमानस्यौपाधिकत्वाङ्गीकारावश्यम्भावेन मोक्षावस्थां च औपाधिकभेदस्य सुतरां वक्तुमशक्यत्वेन तदानीमेकस्यात्मनः सर्वनियन्तुरीश्वरस्य पूर्णस्वातन्त्र्यसत्त्वेनायोर्नियन्तृनियम्ययोभेदस्त्वास्तां नाम । न तेन केवलात्यन्तिकसुखस्वरूपाया मोक्षावस्थाया हानिः। प्रत्युतेदृशीं मोक्षावस्थामङ्गीकुर्वतां मते चिज्जडयोः भेदस्यावश्यकत्वमेव । अभेदे हि जडवस्तूनामारोपितत्वाङ्गीकारावश्यम्भावान्मोक्षावस्थायां चारोपितस्यानुपलम्भात् सुखोत्पत्तिरेव न सम्भवतीति तदानीमात्यन्तिकसुखस्वरूपं मोक्षावस्थाया न

सम्भवति। तथा चात्मानात्मनोर्भेदमात्मनां मिथो भेदं च ये मन्यन्ते तेषामेव मते केवलमात्यन्तिकं सुखं मोक्ष इति वक्तुं शक्यते न आत्मनात्मैक्यवादिनां नापि नानात्मवादमनङ्गीकुर्वतां मत इति।

अथ आत्यन्तिकी दुःखनिवृत्तिरात्यन्तिकं सुखं चेति मिलितं मोक्ष इति पक्षः कया विधया सम्भवतीत्युच्यते आत्यन्तिकी दुःखनिवृत्तिश्च यस्य पूर्णं स्वातन्त्र्यं तस्यैव सम्भवति। पारतन्त्र्यं हि दुःखवीजमिति परतन्त्र्यस्य लेशतोऽपि दुःखं नास्तीत्युक्तिर्नैव युक्तिसहा। पूर्णं स्वातन्त्र्यं ह्येकस्य परमेश्वरस्येव। तदपेक्षया मुक्तानां भेदे इति तेषामीश्वरपारतन्त्र्यमवश्यम्भावि भवति। यदि तेषां सर्वेषां मुक्तानां पूर्णस्वातन्त्र्यं स्यात्तर्हि जगद्व्यापारो नियमितो न भवेत्। पूर्णस्वातन्त्र्ये द्वयोरपि वैमत्यं दृश्यते किमुत बहूनाम्। यतश्च जगद्व्यापारो नियमितो दृश्यते ततः स एकतन्त्र एव नानेकतन्त्र इति मुक्ताः परतन्त्रा एव स्वीकार्या भवन्ति। पारतन्त्र्ये च कीदृशी आत्यन्तिकी दुःखनिवृत्तिः स्यात्। अतः एकात्मवादः स्वीकार्यो भवति। तथा हि सति मुक्तानामीश्वररूपत्वात्पूर्णस्वातन्त्र्यसद्भावादात्यन्तिकी दुःखनिवृत्तिः सिध्यति। तथात्यन्तिकं सुखं चात्मानात्मनोर्भेदे सत्येव आत्मनः सुखं च शरीरसंबन्धेन शब्दस्पर्शादिविषयसंबन्धेन च जायते। शरीरं शब्दस्पर्शादयो विषयाश्चानात्मभूता एवेति तेषां मोक्षावस्थायामस्तित्त्वं सुखोत्पादनाय स्वीकार्यमेव। अतो न ते मिथ्याभूताः किन्तु सत्या एव स्वीकार्या भवन्ति। तथा चात्मानात्मनोर्भेदमेकारात्मवादं च ये मन्यन्ते प्रत्यभिज्ञावादिनस्तेषां मत आञ्जस्येनायं पक्ष उपपन्नो भवति।

आत्यन्तिकं सुखं केवलं मोक्षस्तथात्यन्तिकदुःखनिवृत्तिरात्यन्तिकं सुखं चेति मिलितं मोक्ष इति पक्षद्वयमुक्तरीत्या सम्भवदुक्तिकमपि श्रुतेरभिमतमिति गम्यते। **'अशरीरं वावसन्तं न प्रियाप्रिये स्पृशतः'**[81] इतीमं मोक्षावस्थां प्रदर्शयन्ती श्रुतिदुःखजनकाप्रियस्पर्शमिव सुखजनकं प्रियस्पर्शमपि प्रतिषेधति। तथा च

---

[81] छा.उ. - ८/१२/१

मोक्षावस्थायां केवलात्यन्तिकी दुःखनिवृत्तिरेव च श्रुतेरभिमता भवति । न तत्र लेशतोऽपि दुःखं सुखं वा । एतादृशी मोक्षावस्था च विधाद्वयेन सम्भवति । मुक्तात्मानः पाषाणादितुल्या जडा इत्येका विधा । अपरा चात्मनः स्वाभाविकमभोक्तृत्वम् । यदि मुक्तात्मनो जडास्तर्हि कथं तत्र दुःखनिवृत्तिव्यपदेशः। न हि पाषाणो दुःखान्निवृत्त इति केनापि प्रेक्षावता व्यपदिश्यते । दुःखसम्भव एव दुःखनिवृत्तिर्निर्दिष्टमर्हति । स्यादियमाशङ्का यदि पाषाणावत्सर्वदैव जडा जीवा भवेयुः। कीदृशास्तर्हि ते । मोक्षावस्थातः पूर्वं चेतना मोक्षावस्थायां जडाः। चैतन्यं च ज्ञानमेवेति ज्ञानिनश्चेतना उच्यन्ते । बद्धावस्थायां ज्ञानसत्त्वेन सुखदुःखभागिनो भवन्ति । मोक्षावस्थायान्तु ज्ञानगुणस्यैव सर्वथोच्छेदे सति न लेशतोऽपि सुखं दुःखं वा । यद्यप्येवंरीत्या मोक्षावस्थायामात्यन्तिकी दुःखनिवृत्तिः केवलोपपद्यते तथापि नासौ मोक्षावस्था श्रुतेः सम्मता भवति । **'सर्वात्मैवाभुक्तत्वेन कं पश्येत्'**[82] इत्यादिना सर्वात्मैकदृष्टिमूलकं दर्शनादिज्ञानाभावं दर्शयति न पुनर्जडत्वप्रयुक्तम् । सर्वात्मैकदृष्टेश्च परस्यां काष्ठायां द्रष्टुर्द्रष्टृत्वेन प्रतिभासाभावे तथा दृश्यस्य दृश्यत्वेन प्रतिभासाभावे च दृष्टिः स्वरूपेण विद्यमानापि न दृष्टिशब्दव्यपदेश्या भवति इति त्वन्यत् । अत एव यत्र त्वस्य सर्वमात्मैवाभूदिति श्रुतावुक्तं न तु यत्र त्वस्य सर्वमात्मैव दृश्यत इति । एवञ्च मोक्षावस्थायां केवलात्यन्तिकी दुःखनिवृत्तिः 'आत्मनः स्वाभाविकमभोक्तृत्वम्' इत्येव मुक्तेन द्वितीयेनैव प्रकारेणोपासनीया भवति । अभोक्तृत्वे चात्मनः स्वाभाविकं स्वीक्रियमाण आत्मैक्यमस्त्वात्मनानात्वं वास्तु तथात्मानात्मनोरैक्यमस्तु भेदो वास्तु न तत्र कश्चिद्विशेषः। अभोक्तृत्वादेव न लेशतोऽपि दुःखं सुखं वेति केवलात्यन्तिकी दुःखनिवृत्तिरुपपादिता भवति ।

अथ दार्शनिकानां नये कीदृशं मोक्षस्वरूपं तन्मतभेदेन प्रदर्श्यते – स्वातन्त्र्यं मृत्युर्वा इति **चार्वाकाः**।[83] आत्मोच्छेदो भवति मोक्षो इति **बौद्धाः**।[84] कर्मकृतस्य

---

[82] वृह.उ. - २/४/४

[83] देहोच्छेदो मोक्षः। स.द.सं., सम्पा. वासुदेव शास्त्री अभ्यङ्कर, पृ. ०६

देहस्वरूपस्यावरणस्याभावे जीवस्य सततोर्ध्वगमनं मोक्ष इति **जैनाः**।[85] अशेषविशेषगुणोच्छेदो मोक्ष इति **वैशेषिकाः**।[86] आत्यन्तिकी दुःखनिवृत्तिरिति **नैयायिकाः**।[87] नैयायिकदेशिनस्तु न तत्र केवला दुःखनिवृत्तिः किन्तु सुखमप्यस्तीत्याहुः। स्वर्गादिप्राप्तिर्मोक्ष इति **मीमांसकाः**।[88] मूलचक्रस्थायाः परानामिकाया ब्रह्मरूपाया वाचो दर्शनं मोक्ष इति **पाणिनीयाः**।[89] प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं मोक्ष इति **सांख्याः**।[90] कृतकर्तव्यतया पुरुषार्थशून्यानां सत्त्वरजस्तमसां मूलप्रकृतावत्यन्तलयः प्रकृतेर्मोक्षः। चितिशक्तेस्तु निरुपाधिकस्वरूपेणावस्थानं मोक्ष इति **पातञ्जलाः**।[91] मूलाज्ञाननिवृत्तौ स्वस्वरूपाधिगमो मोक्ष इत्**यद्वैतवेदान्तिनः**।[92]

अत एव प्रत्येकं दार्शनिकानां तथा जीवानां परमपुरुषार्थो हि मोक्षः। तथा च न्यायजनकगौतमपादैः तदधिगमाय प्रमाणादीनां तत्त्वज्ञानमावश्यकमित्युक्तमादिमे

---

84 रागादिज्ञानसन्तानवासनोच्छेदसम्भवा ।
चतूर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता ॥

85 १) बन्धहेत्वभावनिर्जराभ्यां कृत्स्न्यकर्मविप्रमोक्षणं मोक्षः। २) तदनन्तरमूर्ध्वं गच्छन्त्या-लोकान्तात्। (तत्त्वार्थाधिगमसूत्रम्)

86 धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् । (वै.सू. – १/१/४) अथवा, तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः । (वै.सू. – ५/२/२८)

87 तदत्यन्तविमोक्षोऽपवर्गः। (न्या.सू. – १/१/२२)

88 दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः।
सुखस्य मनसा मुक्तिर्मुक्तिरुक्ता कुमारिलैः॥ - मा.मे.द., सम्पा. दीननाथ त्रिपाठी, पृ. २०१

89 तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते ॥ - वा.प.(ब्रह्मकाण्ड)-१३१

90 १) अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः (सा.सू. – १/१), २) यद्वा तद्वा तदुच्छित्तिः पुरुषार्थः (सा.सू. – ६/७०)

91 पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति । (यो.सू. – ४/३४)

92 अविद्यास्तमसो मोक्षः सा च बन्ध उदाहृतः।
निवृत्तिरात्मा मिहस्य ज्ञातत्वेनोपलक्शितः॥

**न्यायसूत्रे** ।[93] तैः प्रमाणानि चत्वारि स्वीकृतानि प्रत्यक्षानुमानोपमानशब्दभेदेन ।[94] एवञ्च प्रत्यक्षादीनां प्रत्येकशो ज्ञानमन्तरा प्रमाणसामान्यज्ञानं न सम्भवति तदन्तरा च न मोक्षाधिगम इति प्रत्यक्षादीनां प्रत्येकशो ज्ञानमपि परम्परया मोक्षोपयोगि हेतुः। प्रमाणेषु द्वितीयं खलु अनुमानमिति । अनुमानं नाम अनुमितेः करणम् । तन्निरूपणं मोक्षाधिगमे हेतुः। वस्तुतस्तु अत्रेदमवधेयं यत् अनुमाननिरूपणं हेत्वाभासनिरूपणमन्तरा न सम्भवति । अनुमितौ हेतौ व्याप्तिपक्षधर्मतावैशिष्ट्य-ज्ञानमिव तद्विपरीतहेतौ हेत्वाभासत्वज्ञानमप्युपयुज्यते । यस्माद्धि 'पर्वतो वह्निमान् धूमात्' इत्यनुमाने धूमहेतौ वह्निव्याप्तिमत्ताज्ञाने सति तद्विपरीतहेतौ जले वह्निविरोधिवह्न्यभावव्याप्यवत्ताज्ञानेऽप्रामाण्यज्ञानमावश्यकम् । तज्ज्ञानजनकञ्च विपरीतहेतौ हेत्वाभासत्वज्ञानम् । तथाहि पूर्वं श्रीमद्गङ्गेशोपाध्यायैः तदीये चिन्तामणिग्रन्थेऽवयवग्रन्थेन सद्धेतुनिरूपणं कृतम् । इदानीञ्च तत्त्वनिर्णयविजयरूपैक-कार्यानुकूलत्वसङ्गत्या दुष्टहेतुनिरूपणं दोषनिरूपणञ्च प्रतिजानीते **"अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते"**[95] इत्यनेन सामान्यनिरुक्ति-प्रकरणे । तदुक्तं दीधितिकृता रघुनाथशिरोमणिना – **"एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात्तत्त्वनिर्णयादिरूपतत्कार्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते 'अथ' इति ।"**[96]

---

[93] प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कबादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रह-स्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। (न्या.सू. – १/१/१)

[94] प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि । (न्या.सू. – १/१/३)

[95] सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०१

[96] तदेव, पृ. - ०२

## २.१) हेत्वाभासनिरुपणे सङ्गतिप्रदर्शनम् -

प्रत्येकं शास्त्रे सङ्गतिनिरूपणमतीव प्रयोजनीयो विषयः। कारणं हि निरूपणमात्रेष्वेव पूर्वग्रन्थेन सह तथा अव्यवहितपूर्वग्रन्थेन सह ग्रन्थस्यास्य सङ्गतिरस्ति न वेति जिज्ञासा स्वत एवोदेति । किञ्च शास्त्रेऽपि एवमनुरूपमुक्तम् –

१) **"शास्त्रे नासङ्गतं प्रयुञ्जीत ।"**[97]

२) **"असङ्गतं प्रयुञ्जानः प्रयोक्ता अवधीरितवचन उन्मत्तवदुपहस्यते"** चेति ।

तथा च सङ्गतिशब्दस्यार्थो हि पूर्वग्रन्थेन सह परग्रन्थस्य आकांक्षणीयसम्बन्धः। तद्धि न्यायभाषायां भाषितम् – **"अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयीभूतोऽर्थः"**[98] इति । इयं सङ्गतिश्च षड्विधा –

**"सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा ।**
**निर्वाहैककार्यत्वे षोढा सङ्गतिरिष्यते ॥"**[99] इति ।

अर्थात् षोढा सङ्गतिर्हि – प्रसङ्गसङ्गतिः, उपोद्घातसङ्गतिः, हेतुतासङ्गतिः, अवसरसङ्गतिः, निर्वाहकत्वसङ्गतिः, एककार्यत्वसङ्गतिश्चेति ।

तथा च प्रकृते अनन्तराभिधानं हेत्वाभासविषयकज्ञानानुकूलव्यापारात्मक-हेत्वाभासनिरूपणमेव, तत्प्रयोजिका जिज्ञासा च 'के हेत्वभासा' इति हेत्वाभासत्वा-वान्तरधर्मप्रकारकज्ञानं जायतामित्यर्थिका; तज्जनकज्ञानञ्च हेत्वाभासत्वज्ञानं तद्धर्मावान्तरधर्मप्रकारकज्ञानगोचरेच्छां प्रति तद्धर्मज्ञानस्य कारणत्वस्याङ्गीकारात् ।

---

[97] व्या.प., सम्पा. राजेन्द्रनाथ घोष, पृ. - ३०

[98] तदेव

[99] तदेव

एतदस्वीकर्तृमते तु इष्टसाधनताज्ञानञ्च हेत्वाभासत्वज्ञानं मे इष्टसाधनमित्याकरकम् । तथा च इष्टसाधनताज्ञानविशेष्यीभूतज्ञानांशे प्रकारतया भासमानस्य हेत्वाभासत्वस्य तादृशजिज्ञासाकाराणीयभूतेष्टसाधनताज्ञानविषयत्वमप्यक्षतम्, तदेव च हेत्वाभासत्वं सङ्गतिः।

**"अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते"**[100] इत्यत्र अथशब्दोऽन्यार्थमुपनीयमानोदकुम्भदर्शनवदानन्तर्यवाचकोऽपि स्वप्रयोगमात्रेण मङ्गलार्थमपि सूचयति । यतः शङ्खध्वनेरिव अथशब्दोच्चारणस्यापि माङ्गलिकत्वान्निम्नोक्तवचनस्मरणात् –

**"ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।**

**कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ॥"**[101] इति ।

न च ग्रन्थादावेव सम्भावितविघ्नविनाशाय मङ्गलाचरणसमुदाचार इति वाच्यम्, "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते" इत्यादिश्रुतेर्ग्रन्थमध्यभागेऽपि तदाचरणदर्शनाद्विशेषतोऽतिगहनस्य हेत्वाभास-निरूपणस्य कृच्छ्रसाध्यतया तन्निरूपणप्रारम्भे सम्भावितविघ्नाशङ्कया तदाचरणस्य न्यायत्वाच्च । 'अथ'शब्दस्यानन्तर्यार्थः। तच्च ध्वंसाधिकरणकालवृत्तित्वरूपम् । वस्तुतस्तु सद्धेतुनिरूपणानन्तरं वेत्यानन्तर्यार्थः। 'अथ हेत्वाभासास्तत्त्वनिर्णयविजय-प्रयोजकत्वान्निरूप्यन्ते' इति मूलमेव प्रतिज्ञा । सा च स्वाव्यवहितोत्तर-कालकर्तव्यप्रकारकबोधानुकूलव्यापारः। तत्र 'निरूप्यन्ते' इत्यत्र वर्तमानसामीप्यार्थ-कलट्प्रत्ययस्य वर्तमानकालाव्यवहितोत्तरकालीनत्वमर्थः, तस्य च निरूपण-पदार्थेऽन्वयः। 'तत्त्वनिर्णयविजयप्रयोजकत्वाद्' इत्यत्र तज्ज्ञानजन्यजिज्ञासाधीनत्वं

---

[100] सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०१

[101] मी.द., सम्पा. भूतनाथ सप्ततीर्थ, पृ. - ०५

पञ्चम्यर्थः। 'निरूप्यन्ते' इत्यत्र कर्मवाच्यविहितलट्प्रत्ययस्य विषयत्वरूपं कर्मत्वमर्थः। शिष्यसमवेतज्ञानानुकूलव्यापारो निपूर्वरूपधात्वर्थः। व्यापारस्य निर्विषयकत्वेऽपि शिष्यसमवेतज्ञानविषयतापन्नेषु हेत्वाभासेषु याचितमण्डनन्यायेन निरूपणघटकशिष्यसमवेतज्ञानीयविषयतामादाय तत्र तदनुकूलव्यापारस्यापि निरूपितत्वसम्बन्धेनान्वयो बोध्यः। मयेति कर्तृपदमूह्यमत्र, तत्र तृतीयार्थः कृतिः। तथा च मत्समवेतवर्तमानकालोत्तरकालवृत्तिकृतिप्रयोज्यसद्धेतुनिरूपणानन्तरकालीनतत्त्व-निर्णयविजयप्रयोजकत्वज्ञानजन्यजिज्ञासाधीनशिष्यसमवेतबोधानुकूलव्यापारविषयता-वन्तो हेत्वाभासा इति समुदितशाब्दबोधः। वलदेवाचार्या विषयेऽस्मिन् समुपस्थापितवन्तः— **"तत्वनिर्णयविजयप्रयोजकत्वादिति पञ्चम्यर्थस्तज्ज्ञानजन्य-जिज्ञासाधीनत्वं, नारूप्यन्त इत्यत्र नीपूर्वकरूपधातोः प्रतीत्यनुकूलव्यापारोऽर्थः तत्रोक्तपञ्चम्यर्थस्यान्वयः। प्रचीनमते कर्मख्यातार्थस्थले व्यापारो धात्वर्थः कर्मप्रत्ययार्थः फलमिति द्वितीयाव्युत्पत्तिवादे भट्टाचार्येणोक्तम् । तथा चाख्यातार्थः प्रतिपत्तिः वर्तमानसामीप्ये लट् वर्त्तमानकालोत्तरकालवृत्तित्वमर्थः तस्य मणिकारसमवेतकृतान्वयः। कृतेस्तु जन्यतासम्बन्धेन व्यापारेऽन्वयः, व्यापारस्य जन्यतासम्बन्धेन प्रतिपत्तावन्वयः, तस्याः विषयतया हेत्वाभासेऽन्वयः, तथा च सद्धेतुनिरूपणोत्तरकालीनतत्त्वनिर्णयविजयप्रयोजकत्वज्ञानजन्यजिज्ञासाधीनमणिकार-समवेतवर्त्तमानकालोत्तरकालवृत्तिकृतिजन्यव्यापारजन्यप्रतिपत्तिविषयतावन्तो हेत्वाभासा इत्यन्वयवोधः लडर्थस्य वर्त्तमानकालोत्तरकालवृत्तित्वस्य तृतीयार्थकृतावन्वयो न सम्भवति प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधजनकत्वस्य नियमात्, एवम् प्रत्ययार्थे न सम्पन्नान्वेति, अन्वयश्च तिङर्थेन समं न तु तिङर्थस्य सुवर्थेन सममन्वयः न च लडर्थस्य वर्त्तमानकालोत्तरकालवृत्तित्वस्य धात्वर्थव्यापारेऽन्वय इति वाच्यम्, पाकजनकचरमकृतेर्नाशदशायां व्यापारसत्त्वात् पचतीत्यापत्तेः अस्मन्मते पाककजनककृतेरसत्त्वेनापत्तिविरहात् । न च**

**व्यापारविशेष्यकवर्त्तमानकालवृत्तित्वप्रकारकशब्दबुद्धिम्प्रति पचतीति ज्ञानस्य न कारणत्वमपि तु तादृशकृतिविशेष्यकबुद्धिम्प्रत्येव, तथा च तादृशबोधकारणत्वविरहेणापत्तिविरहादिति वाच्यम्, अथेत्यादिनिरूप्यन्त इति ग्रन्थस्य प्रतिज्ञापरदीधितिकारसम्मतत्वेन तदसङ्गतेः। प्रतिज्ञा च स्वोत्तरकालीनकृतिजन्यत्वप्रकारकबोधानुकुलो व्यापारस्तत्र तावेव वर्त्तमानकालोत्तरकालवृत्तित्वस्यान्वयः। न चैवम् प्रागुक्तव्युत्पत्तिविरोध इति वाच्यम्, तादृशव्युत्पत्तिवैचित्र्यस्वीकारात् । अन्यथा तस्मात् पततीति प्रयोगे न स्यात् इति, यथा पञ्चम्यर्थस्य ज्ञानज्ञाप्यत्वस्य पाकानुकूलकृतावन्वयः स्वीकार्यः, तथा तिङर्थस्य सुबर्थेन सममन्वयस्य स्वीकार इति भावः।**

**...अवयवान्ताभिन्नग्रन्थाभिन्नव्याप्तिपक्षधर्मताविशिष्टहेतुविषयकप्रतिपत्त्यनुकूलीभूतव्यापारोत्तरकालीनव्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपितप्रसङ्गसङ्गतिज्ञानजन्यिजज्ञासाधीनतत्त्वनिर्णयादिरूपसपरिकरहेतुप्रयोज्यकार्यकारित्वज्ञानजन्यजिज्ञासाधीनहेत्वाभासविषयकप्रतिपत्यनुकूलव्यापारविशेष्यकस्वोत्तरकालीनकृतिजन्यत्वप्रकारताशालिशाब्दबोधानुकूलकृतिमान मणिकार इति शाब्दबोधः।”**[102] इति ।

‘अथ’शब्दार्थविषये कलाविलासे विलसति एवं तत्त्वम् –

**“आनन्तर्यमथशब्दार्थः। आनन्तर्यञ्च ध्वंसकालीनत्वमवयवग्रन्थध्वंसकालीनत्वमिति यावत् । अन्वयश्चास्य ‘निरूप्यन्ते’ इत्यत्र निपूर्वकरूपधात्वर्थे ज्ञानानुकूलव्यापारे। मयेत्वमध्याहार्यम् । अध्याहृततृतीयार्थः कृतिजन्यत्वम् । तदेकदेशीभूतायां कृतौ समवायावच्छिन्नाधेयतासम्बन्धेन मदर्थस्यान्वयः। कृतिजन्यत्वस्यापि तादृशधात्वर्थे ज्ञानानुकूलव्यापारेऽन्वयः। तत्त्वनिर्णयविजयप्रयोजकादित्यत्र पञ्चम्यर्थो ज्ञानजन्यजिज्ञासाधीनत्वम्, तत्र ज्ञाने प्रकृत्यर्थस्य**

---

[102] सा.नि., सम्पा. श्रीरूपनाथशर्मा, पृ. ०१-०२

**तादृशप्रयोजकत्वस्य स्वप्रकारकत्वसम्बन्धेनान्वयः। निरुक्तपञ्चम्यर्थस्यापि निपूर्वकरूपधात्वर्थे ज्ञानानुकूलव्यापारेऽन्वयः। कर्मविहिताख्यातार्थः विषयत्वं, तस्य च प्रथमान्तपदोपस्थाप्य हेतुवदाभासन्त इति व्युत्पत्त्या हेत्वाभासशब्दप्रतिपाद्ये दुष्टहेतुस्वरूपे स्वरूपसम्बन्धेनान्वयः। तथा च अवयवग्रन्थध्वंसकालीनो यो मत्समवेतकृतिजन्यः तत्त्वनिर्णयविजयप्रयोजकत्वप्रकारकज्ञानजन्यजिज्ञासाधीनः ज्ञानानुकूलव्यापारस्तद्विषयतावन्तो दुष्टहेतव इत्यन्वयबोधः पर्यवसितः।**

**यद्यपि ज्ञानेच्छादेरेव सविषयकतया ज्ञानानुकूलव्यापारस्य शब्दात्मकत्त्वाद् विषयत्वाप्रसिद्धा कर्मविहिताख्यातार्थस्य विषयतात्मकत्वाभिधानमययुक्तमित्युच्यते, तथापि याचितमण्डनन्यायेन ज्ञानविषयत्वमादायैव व्यापारस्य सविषयकत्वमिति प्राचीनसिद्धान्तमभिप्रेत्यैव व्यापारविषयताया हेत्वाभासशब्दार्थेऽन्वयः"**[103] इति ।

शिष्यो हि द्विविधः तत्त्वबुभुत्सुर्विजिगीषुश्च । तयोरुभयोरेव प्रयोजनं प्रदर्शयन्नाह – **"तत्त्वनिर्णयविजयप्रयोजकत्वात्"**[104] इति । एतेन शास्त्रस्य सम्बन्धप्रयोजनोऽपि प्रदर्शितः । न ह्यविदितसम्बन्धप्रयोजनः कोऽपि शास्त्रे प्रवर्तते इति। तदुक्तं कुमारिलभट्टैः –

**"ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।**
**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"**[105] इति ।

तत्त्वनिर्णयविजयप्रयोजकत्वादित्यत्र स्वमतव्यवस्थापनरूपे स्वार्थे तत्त्वबुभुत्सुकथारूपे च वादे तत्त्वनिर्णयः। अवास्तवकोटिनिश्चायकहेतौ दुष्टत्वज्ञाने वास्तवकोटिनिश्चयो भवतीति हेत्वाभासस्यापि तत्त्वनिर्णयप्रयोजकत्वमिति । जल्पश्च वास्तवकोटिकनिश्चयपूर्वकपरमतनिराकरणम्, परमतनिराकरणमात्रञ्च वितण्डेति ।

---

[103] सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ. – ०१-०२

[104] सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०१

[105] श्लोकवार्तिक, श्लो. – ११, सू. - १

तथा चोक्तम् –

**"स्वपक्षस्थापनहीना विजिगीषोः कथा तु या।**

**सा वितण्डा समाख्याता वादनिग्रहकारिणी ॥"**[106] इति।

तदेतयोरुद्भावनद्वारा परोक्तहेतौ दुष्टत्वोद्भावने परस्य निग्रहाद्दोषस्य विजयप्रयोजकत्वमिति। केषाञ्चिद्वासिनां 'के हेत्वाभासाः' इति जिज्ञासया, केषाञ्चिच्च 'के तत्त्वनिर्णयप्रयोजका' इति जिज्ञासया हेत्वाभासनिरूपणहेत्वाभासत्वरूपप्रसङ्गस्य तत्त्वनिर्णयरूपैककार्यकारित्वरूपैककार्यानुकूलत्वस्य चानन्तराभिधानप्रयोजक-जिज्ञासाजनकज्ञानविषयत्वादत्र मूले एव सङ्गतिः प्रदर्शिता इति। अपि च वलदेवाचार्यैर्भणितम्— **"हेत्वाभासनिरूपणे इत्यत्र प्रयोजकत्वं सप्तम्यर्थः तस्य स्वरूपेण सङ्गतित्वैकदेशे जिज्ञासायामन्वयः। तथा च हेत्वाभासनिरूपणप्रयोजक-जिज्ञासाजनकज्ञानविषयत्वरूपसङ्गतित्वं प्रसङ्गनिरूपिताधेयतावदित्यर्थः। आधेयत्वं सम्भवपदार्थः निरूपितत्वं षष्ठ्यर्थः हेत्वाभासपदार्थत्वं प्रसङ्गपदार्थः। तथा च तादृशसङ्गतित्वं प्रसङ्गनिरूपिताधेयतावत् दुष्टहेतोरस्मरणात् स्मरणञ्च प्रकारतासम्बन्धेन हेतुः। अथवा अनन्तराभिधानप्रयोजकजिज्ञासाजनक-स्मरणप्रयोजकनिरूप्यनिष्ठसङ्गतिः, तथा च प्रकृतेर्व्याप्तिपक्षधर्मत्वाभाव एव सङ्गतिः, स एव प्रसङ्गपदार्थः। प्रसङ्गत्वञ्चोपोद्घातादिपञ्चकभिन्नत्वे सति अनन्तराभिधानप्रयोजकजिज्ञासाजनकस्मरणप्रयोजकसम्बन्धत्वमिति, तादृश-सङ्गत्याहेत्वाभासनिरूपणम् सुसङ्गतमिति भावः। ननु सप्तम्यन्तार्थहेत्वाभास - निरूपणप्रयोजकत्वस्य सङ्गतित्वैकदेशेऽनन्तराभिधानप्रयोजकजिज्ञासायामन्वये अनन्तराभिधानप्रयोजक इत्यनेन हेत्वाभासनिरूपणप्रयोजकत्वस्य द्विधा भानप्रसङ्ग**

---

106 सा.नि.जा., पृ. – २३

**इति चेन्न, विशिष्टवाचकपदानां सति पृथक्विशेषणवाचकपदमभिधाने विशष्यमात्रपरत्वनियमेन दोषाभावात् ।"**[107] इति ।

## २.२) सङ्गतिप्रदर्शने दीधितिकारमतम् –

नव्यन्यायशिरोभूषणेन दीधितिकारेण सङ्गतिप्रदर्शने स्वाभिमतं व्यक्तम् – **"एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात् तत्त्वनिर्णयादिरूपतत्कार्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते 'अथे'ति ।"**[108]

'एतावता प्रबन्धेन' इत्यत्र एतावत्पदोत्तरं तृतीयार्थः प्रबन्धपदार्थावयव-ग्रन्थान्वयोऽभेदः, प्रबन्धपदोत्तरं तृतीयार्थोऽप्यभेदः, तस्य निरूप्य इत्यत्र निपूर्वकरूपधात्वर्थीभूते ज्ञानानुकूलव्यापारेऽन्वयः।

ननु प्रबन्धस्याभेदेन निरूपणक्रियायामन्वये कथं न द्वितीया ? क्रियाविशेषणानां कर्मत्वमित्यनुशासनादिति चेन्न, अजहल्लिङ्गस्य क्रियाविशेषणत्वे तद्वाचकपदात् तृतीयैव, जहल्लिङ्गस्य क्रियाविशेषणत्वे तद्वाचकपदाद् द्वितीया तत्रैवोक्तानुशासनप्रवृत्तेः, अन्यथा अनुमितिं जानातीति प्रयोगापत्तेः। वस्तुतो यत्राभेदसम्बन्धेन धात्वर्थेऽन्वयः तत्रैव द्वितीया यत्राभेदस्यापि धात्वर्थे प्रकारतया भानं तत्र तृतीयापीति कलापे उक्तम् । अयन्तु विशेषः। क्रियाविशेषणस्य द्वितीयान्तस्य तृतीयान्तस्य वा सर्वत्राभेदो विभक्तेरर्थः। द्वितीयार्थाभेदस्य संसर्गविधया तृतीयार्थस्य च प्रकारविधया भानमिति ।

---

[107] सा.नि., सम्पा. श्रीरूपनाथशर्मा, पृ. ०५

[108] सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०२

सपरिकरं हेतुं नाम व्याप्तिपक्षधर्मताविशिष्टम्, सद्धेतुमिति यावत्। द्वितीयार्थोऽभेदः, तस्य हेतावन्वयः। हेतुमित्यत्र द्वितीयार्थो विषयित्वम्, तस्य निरूप्येत्यत्रत्यधात्वर्थनिरूपणघटकज्ञानेऽन्वयः। निरूपणञ्च शिष्यसमवेतज्ञानानुकूलो व्यापारः, आनन्तर्यं ल्यवर्थः, तच्च ध्वंसाधिकरणकालवृत्तित्वम्, तस्याग्रिमनिरूपणेऽन्वयः। तत्प्रसङ्गादिति तस्य प्रसङ्गः तत्प्रसङ्गः, तस्मादिति । तत्पदं सपरिकरहेतुपरम्, निरूपितत्वं षष्ठ्यर्थः सम्बन्धो वा, प्रसङ्गो नाम सङ्गतिः। पञ्चम्यर्थो हि ज्ञानजन्यजिज्ञासाधीनत्वम् । तस्य निरूपणेऽन्वयः। तत्कार्येत्यत्रापि तत्पदं पूर्ववत् । सपरिकरहेतुप्रयोज्यकार्येत्यर्थः। एककार्यकारित्वं नाम सङ्गतिः। प्रकृते एककार्यं हि तत्त्वनिर्णयो विजयश्च, तत्प्रयोजकत्वं सद्धेतौ हेत्वाभासे चेत्यर्थः। पञ्चम्यर्थः ज्ञानजन्यजिज्ञासाधीनत्वम् । तदाभासेत्यत्र तत्पदं हेतुमात्रपरम्, हेत्वाभासेत्यर्थः। अतः तदाभासनिरूपणशब्दोत्तरं द्वितीयार्थो विषयत्वं विषयित्वं वा तस्य चाव्यवहितोत्तरकालकर्तव्यत्वप्रकारकशिष्यसमवेतबोधानुकूलव्यापारात्मकप्रति-पूर्वकज्ञाधात्वर्थप्रतिज्ञैकदेशे बोधेऽन्वयः। निरुक्तप्रतिज्ञायाश्चाख्यातार्थकृतावनुकूलत्व-सम्बन्धेन अन्वयः।

तथा च एतावदभिन्नप्रबन्धाभिन्नं यत्सपरिकरहेतुविषयकज्ञानानुकूल-व्यापारात्मकं निरूपणं तद्ध्वंसकालीनो यः सद्धेतुनिरूपितप्रसङ्गसङ्गतिज्ञान-जन्यजिज्ञासाधीनस्तत्त्वनिर्णयविजयरूपतत्कार्यकारित्वसङ्गतिज्ञानजन्यजिज्ञासाधीनो दुष्टहेतुविषयकज्ञानानुकूलव्यापारस्तदविषयकाव्यवहितोत्तरकालकर्तव्यत्वप्रकारकशि-ष्यसमवेतबोधानुकूलव्यापारानुकूलकृतिमान् मूलकारस्तथा मणिकार इत्यन्वयबोधः। तदुक्तं वलदेवीटीकायाम् – **“अवयवान्ताभिन्नग्रन्थाभिन्नव्याप्तिपक्षधर्मताविशिष्टहेतु-विषयकप्रतिपत्त्यनुकूलीभूतव्यापारोत्तरकालीनव्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपितप्र-सङ्गसङ्गविज्ञानजन्यजिज्ञासाधीनतत्त्वनिर्णयादिरूपसपरिकरहेतुप्रयोज्यकार्यकारित्व**

**-ज्ञानजन्यजिज्ञासाधीनहेत्वाभासविषयकप्रतिपत्त्यनुकूलव्यापारविशेष्यकस्वोत्तरकालीनकृतिजन्यत्वप्रकारताशालिशाब्दबोधानुकूलकृतिमान् मणिकार इति शाब्दबोधः।"**[109] इति ।

## २.३) 'सपरिकर'पदविवेकः—

सपरिकरं हेतुमित्यत्र द्वितीयार्थो विषयता । अत्र सपरिकरहेतुमित्यनुक्त्वा सपरिकरं हेतुमिति व्यासेन लिखनं तदाभासनिरूपणमित्यत्र तत्पदेन केवलहेतोः परामर्शकत्वसम्पादनाय, अन्यथा समस्तपदैकदेशपरामर्शकत्वेनैकदेशान्वयापत्तेः। समस्तपदपरामर्शकत्वे च सपरिकरहेतोराभासत्वासम्भवादसङ्गतिः प्रसज्येति तात्पर्यम् ।

निरूप्येत्यत्र यत्प्रत्ययस्यानन्तर्यमर्थः। तत्प्रसङ्गादित्यत्र तत्त्वनिर्णयरूपतत्कार्यकारित्वादित्यत्र च स्वज्ञानजन्यजिज्ञासाधीनत्वं पञ्चम्यर्थः। निरूपणमित्यत्र द्वितीयार्थो विषयता । प्रतिजानीते इत्यत्र प्रतिपूर्वज्ञाधातोरुत्तरकालकर्तव्यत्वप्रकारकबोधानुकूलव्यापाररूपोऽर्थः। तथा चावयवान्तग्रन्थाभिन्नसपरिकरहेतुविषयकनिरूपणानन्तरमिति मूलवाक्यनिष्ठतदकथनज्ञानज्ञाप्यतदज्ञानवत्पुरुषोच्चरितरूपन्यूनतापरिहारसामर्थ्यम् इति शिरोमणेः।

गदाधरभट्टाचार्यनये परिकरो नाम व्याप्तिपक्षधर्मते इति । तदुक्तं – **"परिकरो व्याप्तिपक्षधर्मते"**[110] इति । 'यद् यन्निरूपणानन्तरं निरूपणीयं तत् तन्निरूपितसङ्गतिमदि'ति नियमात्, निरूपणीयतावच्छेदकावच्छेदेन सङ्गतिमत्त्वमावश्यकम्, एवं चात्र परिकरपदेन व्याप्तिमात्रोपादाने ह्रदो वह्निमान्

---

[109] सा.नि., सम्पा. श्रीरूपनाथशर्मा, पृ. ०२

[110] सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०४

धूमादित्यादिबाधितहेतौ निरूपणीयतावच्छेदकाक्रान्ततया “तद्विरहवतो दुष्टहेतोः स्मरणादि”त्यत्र तत्पदेन व्याप्तिमात्रपरामर्शात् तत्पदोपस्थाप्यस्वस्ववृत्तिव्याप्त्यभावरूपसङ्गतिविरहेण व्यभिचारः स्यात् । परिकरपदेन पक्षधर्मतामात्रोपादने ह्रदो वह्निमान् जलादित्यादौ स्ववृत्तिपक्षधर्मताभावविरहेण व्यभिचारो दुर्वारः, अतो व्याप्तिपक्षधर्मतयोरुभयोः उपादानम् ।

ननु उभयोपादानेऽपि उत्पत्तिकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्याद्यसङ्कीर्णबाधे पृथिवीत्वे व्याप्तिपक्षधर्मत्वोभयोः सत्त्वेन स्ववृत्तिव्याप्तिपक्षधर्मत्वाभावरूपसम्बन्धस्यासत्त्वात्तादृशहेतौ सङ्गतिमत्त्वानुपपत्त्या व्यभिचारो दुर्वार एव, अतो यो यन्निरूपितसङ्गतिमान् स तन्निरूपणाव्यवहितोत्तरनिरूपणविषय इत्येव नियमः स्वीकार्यः एवं च निरूपणीयतावच्छेदकावच्छेदेन सङ्गतिमत्त्वस्यानपेक्षिततया परिकरपदेन व्याप्तिपक्षधर्मत्वयोरुभयोरुपादानं व्यर्थमिति चेन्न, गदाधरभट्टाचार्यैरसङ्कीर्णबाधो नाभ्युपगम्यते परन्तु यद्देशकालावच्छेदेन साधनं तद्देशकालावच्छेदेन साध्यमिति व्याप्तेः कारणत्वस्य सत्प्रतिपक्षग्रन्थे उक्ततया तादृशव्याप्त्यभावरूपसङ्गतिसत्त्वेन व्यभिचाराभावात् । अपि चात्र वलदेवाचार्याणां मतं स्मरणीयम्— **“परिकरपदेन व्याप्तिमात्रोपादानेऽवच्छेदकावच्छेदेन निरूपमाणम्प्रत्यवच्छेदकावच्छेदेन सङ्गतिसत्त्वमावश्यकम् । एवञ्च यन्निरूपणानन्तरं यो निरूपणीयो भवति स तन्निरूपितसङ्गितिमानिति नियमात्, तथा च तदभाववतो दुष्टहेतोः स्मरणादित्यत्र तत्पदेन व्याप्तिमात्रपरामर्शेति, ह्रदो वह्निमान् जलादित्यादौ हैतौ पक्षधर्मत्वाभावविरहेण व्याभिचारो दुर्वार इति व्याप्तिपक्षधर्मत्वोभयोपादानम् । ननूभयोपादानोऽपि उत्पत्तिकालावच्छिन्नो घटः गन्धवान् पृथ्वीत्वादित्यादौ पृथ्वीत्वे व्याप्तिपक्षधर्मत्वोभयसत्वेन व्याभिचारो दुर्वार इति चेन्न, यो यन्निरूपितसङ्गतित्वात्**

**स तन्निरूपणाव्यवहितोत्तरनिरूपणविषय इति नियमस्यैव स्वीकारात् । एवञ्चावच्छेदकावच्छेदेन निरूपणम्प्रत्यवच्छेदकावच्छेदेन सङ्गतेः कारणत्वमिति नियमो नाङ्गीकर्त्तव्य इति । न चैवं व्यप्तिपक्षधर्मत्वोपादानम् अनर्थकमिति वाच्यम्, परिकरपदस्य व्यप्तिपक्षधर्मत्वोभयत्वावच्छिन्ने शक्तिः, प्रत्येके च लक्षणा, तथा च शक्त्यानिर्वाहे लक्षणाऽदरो न करणीय इति । केचितु असङ्कीर्णबाधस्याऽस्वीकारात् प्रागुक्तनियम एव सम्यगित्यपिवदन्ति । अपरे तु असङ्कीर्णबाधस्थले नोक्तव्यभिचारसम्भावना, यद्देशकालावच्छेदेन साध्यसिद्धेरुद्देश्यत्वं ताद्दशदेशकालाद्यवच्छेदेन साध्यं साधनञ्चेत्याकारकव्याप्तेरेव कारणत्वमिति सत्पतिपक्षग्रन्थे भट्टाचार्येणोक्तत्वात् । तथा चोक्तस्थले व्यभिचारस्यैव सत्त्वेनोक्तव्याप्त्यभावरूपसङ्गतेरक्षतत्वात्, आचार्येण जगदीशेन तु व्याप्तिपक्षधर्मत्वादिरित्यत्रादिपदेनाबाधितत्वासत्प्रतिपक्षितत्वयोः परिग्रहः कृतः, तस्याभिप्रायस्तु अवच्छेदकावच्छेदेन निरूपणप्रत्यवच्छेदकावच्छेदेन सङ्गतेः कारणत्वमेवञ्च यो यन्निरूपणानन्तरनिरूपणीयस्तन्निरूपितसङ्गतिमानित्येव नियमः स्वीकार्य इति । तथा च तत्मते यद्देशकालावच्छेदेन इत्यादिव्याप्तेरस्वीकारात् सङ्गतिसम्पादनायादिपदमुपात्तम् । तथा चोक्तस्थलेऽप्यवाधितत्वाभावरूप-सङ्गतिरस्त्य एवातो नोक्तव्याभिचार इति भावः।"**[111] इति ।

परन्तु जगदीशैरुक्तम् – **"परिकरः सहकारी । स च व्याप्तिपक्षधर्मत्वादिः"** [112] इति । यो यन्निरूपणानन्तरं निरूपणीयः स तन्निरूपितसङ्गतिमानिति नियमात् निरूपणीयतावच्छेदेकावच्छेदेन सङ्गतेरावश्यकत्वे उत्पत्तिक्षणावच्छिन्नघटो गन्धवान् पृथिवीत्वादित्यादौ हेतौ व्याप्तिपक्षधर्मत्वसत्त्वात् तस्योक्तक्रमेण व्याप्तिपक्षधर्मता-विरहात्मकसङ्गतिविरहेण तत्स्मरणानुपपत्तिरुक्तनियमभङ्गप्रसङ्गश्चातो व्याप्तिपक्ष-

---

[111] सा.नि., सम्पा. श्रीरूपनाथशर्मा, पृ. – ०७

[112] सा.नि.जा., पृ. – ०३

धर्मतादिरित्यत्रादिपदेनाबाधितत्वादि विवक्षितम् । तथा च निरुक्तहेतोः व्याप्तिपक्षधर्मत्ववत्त्वेऽपि अबाधितत्वाभावरूपसङ्गतेस्तत्रापि सत्त्वान्नोक्तदोष-द्वयावकाशः। परिकरो व्याप्तिपक्षधर्मते इत्यर्थवादिनान्तु निरूप्यतावच्छेदकावच्छेदेन सङ्गतिमत्त्वस्याप्रयोजकत्वात् तत्सामानाधिकरण्येन सङ्गतिसत्त्वेऽपि निरूपणोपपत्तिरिति भावः। अवयवान्तग्रन्थाभिन्नसपरिकरहेतुविषयकनिरूपणानन्तरं तत्प्रसङ्गज्ञानजन्यजिज्ञासाधीनहेत्वाभासनिरूपणविषयकोत्तरकालकर्तव्यत्वप्रकारक-बोधानुकूलव्यापाराश्रयो मूलकार इति प्रतिजानीते इत्यन्तशाब्दबोधः। न च उत्पत्तिक्षणावच्छिन्नघट इत्यादिप्रागुक्तस्थले पृथिवीत्वत्य गन्धव्यभिचारित्वमेवेति आदिपदमनर्थकमिति शङ्क्यम्, जगदीशमते प्रतियोगिव्यधिकरणसाध्याभावघटित-व्याप्तेरेवानुमित्यौपयिकतया तादृशाभावघटितव्यभिचारज्ञानस्यैव निरुक्तव्याप्तिधी-विरोधितया पृथिवीत्वे तादृशव्यभिचारासम्भवादिति । गदाधरनये निरुक्तहेतोरपि व्यभिचरित्वं सम्भवति । यद्देशकालावच्छेदेन साध्यसिद्धेरुद्देश्यत्वं तद्देशकालावच्छेदेन साधनं तद्देशकालावच्छेदेन साध्यमिति देशकालघटितव्याप्तेरेवानुमितिप्रयोजकत्वेन सत्प्रतिपक्षेऽभिहितत्वादुत्पत्तिकालावच्छेदेन तादृशव्याप्तिविरहात्मकसङ्गतेस्तत्र सत्त्वान्नोक्तदोष इति मतद्वयेऽप्यवच्छेदकाच्छेदेन सङ्गतिरिति ।

जगदीशास्तु परिकरपदस्य व्याप्तिपक्षधर्मत्वावच्छिन्ने शक्तिः, प्रत्येकस्मिन् लक्षणा । एवं च शक्त्या निर्वाहसम्बन्धे लक्षणादरो न युक्तः। तर्कालङ्कारमतेऽनन्यगतिकतया लक्षणादरो युक्त इति वदन्ति ।

## २.४) 'तत्त्वनिर्णय'पदविवेकः –

तत्त्वनिर्णयपदविचारे गदाधरेणोक्तम् – **"तत्त्वनिर्णयो नाम प्रमितकोटिनिश्चयः । तत्र व्याप्तिपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानमिव तद्विपरीतकोटिसाधकस्य हेत्वाभासत्व-ज्ञानमप्युपयुज्यते, प्रतिबन्धकीभूतविपरीतकोटिव्याप्यवत्ताज्ञानेऽप्रामाण्यग्राहकत्वादि-**

**त्युभयोस्तत्त्वनिर्णयप्रयोजकत्वम् ।"**[113] इति ।

अस्याशयो हि पर्वतो वह्निमान् इत्यनुमितौ वह्निव्याप्यधूमवत्तापरामर्शः कारणम्, परामर्शे व्याप्तिपक्षधर्मताविशिष्टहेतुविषयकत्वेन मानसं प्रमात्वज्ञानम्, ततश्चेदं साध्यवत्ताज्ञानं प्रमा स्वविषयसाध्यनिरूपितव्याप्तिपक्षधर्मताविशिष्ट-हेतुज्ञानजन्यज्ञानत्वादिति रीत्या सद्धेतुत्वज्ञानस्य प्रमात्वानुमितावुपयोगः। एवं वह्न्यभावव्याप्यजलवान् पर्वत इदं ज्ञानम् अप्रमा स्वविषयसाध्यव्याप्ति-पक्षधर्मत्वाभावविशिष्टहेतुविषयकत्वे सति स्वीयसाध्यविषयतानिरूपित-व्याप्तिविषयत्वादिनिरूपितप्रकृतहेतुविषयकत्वादिति रीत्या अप्रामाण्यग्राहकत्वं बोध्यम् इति ।

'तत्त्वं ब्रह्मणि याथार्थ्ये' इति कोशात्तत्त्वशब्दस्य प्रमात्वशक्ततया प्रमितिकोटिनिश्चये लक्षणापत्तिरत एवाह गदाधरभट्टाचार्यः – **"अथवा तत्त्वनिर्णयः साध्यवत्ताज्ञाने प्रमात्वनिश्चयः। तत्रानुमापकहेतोर्व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्व-ज्ञानमिव विपरीतकोटिसाधकहेतोर्दुष्टत्वज्ञानमप्युपयुज्यते, प्रकृतसाध्यग्रहाप्रामाण्य-ग्राहकविपरीतकोटिसाधकहेत्वदुष्टत्वग्रहविघटकत्वात्"**[114] इति । अर्थाद् यत्र वह्निव्याप्यधूमवान् पर्वत इति परामर्शाद् वह्न्यनुमितिः, ततो वह्न्यभावव्याप्यजलवान् पर्वत इति परामर्शाद् वह्न्यभावानुमितिः, तत्र जलहेतौ अदुष्टत्वग्रहे सति वह्न्यभावानुमितौ सल्लिङ्गकपरामर्शाजन्यत्वज्ञानं, तदधीनस्तत्र प्रमात्वनिश्चयः, तदधीनं पूर्वोत्पन्नानुमितावप्रामाण्यज्ञानं ततस्तत्र प्रमात्वाभावनिश्चयः।

एवं च पर्वतो वह्निमानित्यनुमितिः भ्रमः "वह्न्यभाववति वह्निप्रकारिका"

---

113 सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०६

114 तदेव, पृ. – ०७

वह्न्यभावव्याप्यजलवान् पर्वत इति परामर्शीयनिरूप्यनिरूपकभावापन्न-विषयताघटितधर्मावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयत्वावच्छिन्नप्रतिब-न्धकतानिरूपितप्रतिबध्यतावत्त्वादित्यनुमानेन इदं ज्ञानमप्रमा स्वविरोध्यनुमिति-जनकहेत्वदुष्टत्वग्रहकालीनत्वादित्यनुमानेन वाप्रामाण्यग्रहे तदुपयोगिनो विपरीतहेतुत्वदुष्टग्रहस्य प्रतिबन्धको दुष्टत्वग्रहः। स्वरूपासिद्धत्वरूपदुष्टत्वग्रहे तु वह्न्यभावानुमितौ न सल्लिङ्गकपरामर्शजन्यत्वज्ञानं तद्विरहे च न वह्न्यभावानुमितौ प्रमात्वनिश्चयः, प्रमात्वनिश्चयविरहे सति पूर्वोत्पन्नवह्न्यनुमितौ अप्रमात्वज्ञानानुत्पत्तिः, तथा च न प्रमात्वाभावनिश्चयः, ततश्च प्रमात्वाभावनिश्चयरूपप्रतिबन्धकनिवृत्त्या तादृशवह्न्यनुमितौ प्रमात्वनिश्चयो जायते, तथा च प्रमात्वाभावनिश्चयाभावरूपप्रतिबन्धकाभावसम्पादनद्वारा साध्यवत्ताज्ञाने प्रमात्वनिर्णयसम्पादकत्वं हेत्वाभासत्वज्ञानस्येति।

अपि च विपरीतकोटिसाधकहेतौ अदुष्टत्वग्रहे जाते अदुष्टविषयक-परामर्शजन्यत्वेन हेतुना विपरीतकोटौ प्रमात्वनिश्चयो जायते, ततश्च प्रमात्मकज्ञानीयप्रकारतानिरूपितविशेष्यतानिरूपितप्रकृतसाध्यप्रकारताकत्वेन हेतुना साध्यवत्ताज्ञाने तद्वति तत्प्रकारकत्वाभावरूपप्रामाण्याभावप्रकारको ग्रहो भवेत्, तत्र दुष्टत्वग्रहे जाते तु विपरीतकोटिज्ञानधर्मिकप्रमात्वविधेयकानुमितिसम्पादको यस्तादृशपरामर्शजन्यत्वरूपो हेतुः स एव न सम्भवति, अतो विपरीतकोटौ प्रमात्वनिश्चयो न जायते, ततश्च प्रकृतसाध्यवत्ताज्ञाने प्रमात्वाभावग्रहो नैव जायते, तत्साधकस्य "प्रमात्मकज्ञानीयप्रकारते"त्याद्युक्तहेतोरसत्त्वात्, किन्तु प्रकृतानुमापकहेतोः व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्वज्ञानादुक्तरीत्या साध्यवत्ताज्ञाने प्रमात्वनिश्चयो जायते इत्यनयैव रीत्या सर्वेषां दुष्टत्वग्रहाणामुपयोगिता बोध्या।

## २.५) 'विजयप्रयोजकत्व'पदविवेकः –

विजयश्च पराहङ्कारखण्डनम् । अहङ्कारश्चाहमुत्कृष्ट इति संस्कारः, तत्खण्डनं तन्नाशानुकूलो व्यापारः। यद्वायमुत्कृष्ट इति मध्यस्थज्ञानानुकूलो व्यापारो विजयः। सुखविशेष इत्येके । तत्त्वनिर्णयपदोपादानेनैव एककार्यानुकूलत्वरूपसङ्गतेर्लाभसम्भवे विजयपर्यन्तानुसरणं वादजल्पभेदेन प्रयोजनप्रदर्शनार्थम् । वस्तुतस्तु तत्त्वनिर्णयार्थं गुरुशिष्ययोर्यो विचारश्चलति, स 'वाद' इत्याख्यां लभते । तत्र कस्यापि विजिगीषा न वर्तते, तत्र तत्त्वनिर्णय एव मुख्योद्देश्यरूपेण प्रतीयते । अतः यावन्न सद्युक्तिप्रतियुक्तिभिस्तत्त्वनिर्णयो जायते तावत् पर्यन्तं वादः करणीयः। यत्र तु वादीजिगीषुर्भवति, प्रतिवादी अपि जिगीषुर्भवति तत्र तयोः न्यायानुगतयुक्ति-प्रतियुक्तिभिर्यो विचारात्मकवाक्यसमुदायः स जल्पो वितण्डा चेति नामभ्यामभिहितो भवति ।

अत एव स्वकीयहेतौ सन्न्यायप्रयोगे तत्त्वनिर्णयो विजयश्च यथा भवति तथैव परकीयहेतौ दुष्टत्वप्रतिपादनेनापि तत्त्वनिर्णयो विजयश्च भवतीति ।

# तृतीयोऽध्यायः

# ॥ तृतीयोऽध्यायः ॥

## प्रथमहेत्वाभाससामान्यलक्षणविवेकः

गङ्गेशोपाध्यायैस्तदीये तत्त्वचिन्तामणिग्रन्थे हेत्वाभासस्य प्रथमसामान्यलक्षणं लक्षितम् – **"तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्"**[115] इति ।

तत्र इत्यस्यार्थो हि निरूपणे, सप्तम्यर्थो विषयत्वं हेत्वाभासत्वान्वये, तथा च निरूपणविषयीभूतं हेत्वाभासत्वं च । अनुमितौ कारणीभूतो योऽभावस्तस्य प्रतियोगि यद् यथार्थज्ञानं तद्विषयत्वमित्यर्थः। धूमाभाववद्वृत्तिवह्निरूपव्यभिचारे लक्षण-समन्वयः, तथाहि – पर्वतो धूमवान् वह्नेरित्यनुमितौ कारणीभूतो योऽभावः 'धूमाभाववद्वृत्तिर्वह्निरि'त्याकारकव्यभिचारनिश्चयाभावः, तस्य प्रतियोगि यद् यथार्थज्ञानं धूमाभाववद्वृत्तिर्वह्निरिति निश्चयः तद्विषयत्वस्य तत्र सत्त्वात् ।

न चानुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वमित्येवास्तु किं कारणीभूताभाव-प्रतियोगित्वनिवेशेनेति वाच्यम् । प्रतिबन्धकत्वं हि द्विविधम् – कारणीभूताभावप्रति-योगित्वं, प्रयोजकीभूताभावप्रतियोगित्वं च । अत्र तु कारणीभूताभावप्रतियोगित्वमेव निविष्टमिति सूचनाय तदुपादानात्, अन्यथा वह्निव्याप्यधूमवान् ह्रद इति परामर्शे अतिव्याप्तेः, तादृशपरामर्शधर्मिकाप्रामाण्यनिश्चयाभावस्यापि ह्रदो वह्निमानित्यनु-

---

[115] सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०९

मितौ प्रयोजकत्वात्, तत्प्रतियोगियथार्थज्ञानविषयत्वस्य तत्र सत्त्वात् ।

ननु अनुमितिकारणाभावप्रतियोगियथार्थज्ञानविषयत्वमित्येवोच्यतां किं भूतपदेनेति चेन्न, अनुमितिकारणस्याभाव इति षष्ठीतत्पुरुषभ्रमनिरासाय तदुपादानात्। तथा चानुमितिकारणपरामर्शस्याभावप्रतियोगिपरामर्शविषये वह्निव्याप्यधूमवत्पर्वते नातिव्याप्तिः। तेनानुमितिकारणीभूतश्चासौ अभावश्चेति कर्मधारयलाभ इति ध्येयम् ।

नन्वेवमपि अनुमितिकारणीभूतो यस्तत्प्रतियोगियथार्थज्ञानविषयत्वमित्येव उच्यतां किमभावपदोपादानेनेति चेन्न, पर्वतो वह्निमानित्यत्र घटवद्भूतलेऽतिव्याप्तिः, स्वावच्छिन्नभिन्नभेदस्य स्वस्वरूपतया परामर्शावच्छिन्नभेदस्य परामर्शरूपतया पर्वतो वह्निमानित्यत्र अनुमितिकारणीभूतो यः परामर्शः तत्प्रतियोगि यत्स्वावच्छिन्नभिन्नं 'घटवद्भूतलमि'ति ज्ञानं तद्विषयत्वस्य तत्र सत्त्वात् । न चाभावपदोपादानेऽपि तद्दोषतादवस्थ्यम्, परामर्शस्य स्वाभावाभावरूपत्वेनाभावरूपत्वादिति वाच्यम् । अभावपदस्य भावप्रधाननिर्देशतया अनुमितिनिष्ठकार्यतानिरूपितकारणतावच्छेदकं यदभावत्वरूपानुयोगित्वं तन्निरूपितप्रतियोगिताश्रययथार्थज्ञानविषयत्वस्य विवक्षणीयत्वात् । तथा च नोक्तातिव्याप्तिः, परामर्शस्य परामर्शावच्छिन्नभिन्नभेदत्वेन परामर्शाभावाभावत्वेन वा न कारणत्वम्, अपि तु परामर्शत्वेनैव, परामर्शत्वं तु नानुयोगितारूपमिति अनुमितिकारणतावच्छेदकीभूतानुयोगिताविरहादिति ।

अत्रेदमवधेयं यत् केचित्तु अभावपदानुपादाने अयमात्मा आत्मप्रकारकज्ञानप्रतियोगिकसमवायादित्यत्र ज्ञायमानलिङ्गस्य कारणत्वमते आत्मत्वेऽतिव्याप्तिः। न चानुमितिकारणीभूतो यस्तन्निरूपितयत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताश्रययथार्थज्ञानविषयत्वमिति निवेश्यम्, समवायनिरूपितसांसर्गिकप्रतियोगितायां सम्बन्धाव-

च्छिन्नत्वविरहेणातिव्याप्त्यभावात्, एतेन निरूपितत्वस्य प्रतियोगिस्वरूपतयानुमिति-कारणीभूतो यः परामर्शः तत्प्रतियोगित्वस्य व्याप्तिज्ञाने सत्त्वेन व्याप्त्यादावतिव्याप्तिः, कार्यतानिरूपितत्वस्य कारणतायां सत्त्ववत्, कार्यनिरूपितत्वस्य कारणे सुलभत्वादिति निरस्तम्, निरूपितत्वस्य प्रतियोगिरूपत्वे तस्य सम्बन्धानवच्छिन्नत्वादिति वाच्यमिति । सांसर्गिकप्रतियोगितायां सम्बन्धाव-च्छिन्नविरहेऽपि तत्सम्बन्धावच्छिन्नाधेयतायाः तत्संसर्गीयप्रतियोगितारूपत्वेन सम्बन्धावच्छिन्नत्वस्य सुलभत्वात् । न च ज्ञायमानलिङ्गस्य कारणत्वस्वीकारेऽभावपदोपादानेऽपि आत्मत्वप्रकारकज्ञानाभावहेतुके आत्मत्वेऽति-व्याप्तिर्दुर्वारैवेति तत्पक्षो न युक्त इति । तावतापि अनुमितिकारणीभूतो यो बाधनिश्चयाभावस्तस्य घटानुयोगिकस्वरूपेण स्वावच्छिन्नाभेदस्वरूपतया घटवद्भूतले अतिव्याप्तिः, अत एव अभावपदं प्रागुक्तार्थकमिति । वस्तुतस्तु अनुमितिनिष्ठकार्यतानिरूपितकारणताश्रयपरामर्शप्रतियोगिव्याप्तिज्ञानविषये वह्नि-व्याप्यधूमेऽतिव्याप्तिः, व्याप्तिज्ञानस्य कारणत्वमते तस्य परामर्शसम्बन्धेन तथात्वात्, परामर्शसम्बन्धप्रतियोगित्वमित्याहुः ।

न च तथापि ज्ञानपदं किमर्थमिति वाच्यम् । पर्वतो वह्निमानित्यत्र कामिनीज्ञानेऽतिव्याप्तेः, कामिनीजिज्ञासायाः कामिनीज्ञानान्यज्ञाने प्रतिबन्धकतया कामिनीजिज्ञासाभावस्य च कामिनीज्ञानान्यज्ञाने कारणतया अनुमितिकारणीभूतो यः कामिनीजिज्ञासाभावः तत्प्रतियोगिनी या यथार्था कामिनीजिज्ञासा तद्विषयत्वस्य तत्र सत्त्वात् । न च पर्वतो वह्निमानियं कामिनीति समूहालम्बनानुमितावपि निरुक्तानुमितित्वसत्त्वेन तत्र च निरुक्तेच्छाप्रतिबध्यताया असत्त्वान्नातिव्याप्तिरिति वाच्यम् । यादृशस्थलविशेषे कामिनीविषयिणी पक्षे साध्यानुमितिः कस्यापि न जाता तत्रातिव्याप्तेर्दुर्वारत्वादिति ।

ननु तथापि पर्वतो वह्निमानित्यत्र साध्यवत्पक्षेऽतिव्याप्तिः

अनुमितिकारणीभूतो यः सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तत्प्रतियोगियथार्थ-ज्ञानविषयत्वस्य साध्यवत्पक्षे सत्त्वादिति चेन्न, अभावपदस्य सिषाधयिषाविरहविशिष्टसिद्ध्यभावातिरिक्ताभावपरत्वात् । वस्तुतस्तु तद्विधेयकानु-मितावेव सिद्धेः प्रतिबन्धकत्वेन पर्वतत्वावच्छिन्नविशेष्यतानिरूपितस्य वह्निनत्वावच्छिन्नप्रकारताशाल्यनुमितित्वस्य वह्निमत्पर्वतो घटवानित्यनुमितावपि सत्त्वेन तत्र निरुक्तसिद्धिप्रतिबन्धकताविरहेणानुमितित्वव्यापकप्रतिबध्यतानिरूपित-प्रतिबन्धकतायाः सिद्धावसत्त्वात्, बाधादिनिश्चयस्तु तत्प्रकारताशालिबुद्धिं प्रतिबध्नातीति ।

## ३.१) 'अनुमिति'पदविवेकः –

**"अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्"**[116] एतल्लक्षणघटकं अनुमितिपदं यदि अनुमितिसामान्यपरं तदा अनुमितित्वव्यापककार्यतानिरूपित-कारणतावान् योऽभावस्तत्प्रतियोगियथार्थज्ञानविषयत्वं, यथार्थज्ञाननिष्ठा या अनुमितित्वव्यापकप्रतियोगिप्रतिबध्यतानिरूपिता प्रतिबन्धकता तदवच्छेदक-विषयताश्रयत्वं वा हेत्वाभासत्वमित्यस्यैव प्रथमलक्षणार्थतायाः पर्यवसिततया असम्भवापत्तेः, ह्रदादिपक्षकवह्न्यादिसाध्यकस्थले वह्न्याद्यभावविशिष्टह्रदादि-निश्चयात्मकयथार्थज्ञानाभावकार्यताया निरुक्तनिश्चयप्रतिबध्यताया वा अनुमितित्वाव्यापकत्वात् । अनुमितित्वस्य घटाद्यनुमितावपि सत्त्वेन तत्र तादृशनिश्चयप्रतिबध्यताविरहात् । यादृशयथार्थज्ञानप्रतिबध्यता अनुमितित्वव्यापिका तादृशयथार्थज्ञानविषयस्यैव हेत्वाभासतायाः पर्यवसितत्वात् ।

यदि च तादृशानुमितिपदं यत्किञ्चिदनुमितिपरं, तदा यथार्थज्ञाननिष्ठा या

---

116 सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०९

यत्किञ्चिदनुमितिव्यक्तिनिष्ठप्रतिबध्यतानिरूपिता प्रतिबन्धकता तदवच्छेदक-विषयताश्रयत्वस्य लक्षणार्थतया ह्रदविशेष्यकवह्निसाध्यकामुमितिरेव यत्किञ्चिदनुमितिपदेन धर्तुं शक्यत्वेन तादृशानुमितिप्रतिबन्धकीभूतवह्न्यभाव-विशिष्टह्रदादिनिश्चयविषयत्वमादाय ह्रदादौ वह्न्यादिसाध्यकस्थले लक्षणसमन्वयसम्भवादसम्भवाभावेऽपि 'पर्वतो वह्निमान् धूमाद्' इत्यादौ वह्न्यभावविशिष्टह्रदादावतिव्याप्तिः स्यात् यत्किञ्चिदनुमितिपदेन तत्र ह्रदधर्मिकवह्न्याद्यनुमितिमादाय तत्प्रतिबन्धकयथार्थज्ञानविषयताया वह्न्यभाव-विशिष्टह्रदादौ सत्त्वाद् इति अकामेनापि तादृशानुमितिपदं प्रकृतहेतु-प्रकारकनिश्चयोत्तरजायमानप्रकृतपक्षकप्रकृतसाध्यकानुमितिपरमवश्यं वक्तव्यं, तथा सति नासम्भवो न वातिव्याप्तिः। प्रकृतपक्षीभूतह्रदादिनिश्चयस्य प्रतिबन्धकत्वात् तथाविधपर्वतादिधर्मिकवह्न्याद्यनुमितौ च तादृशनिश्चयस्य अप्रतिबन्धकत्वादिति । तदुक्तं गादाधर्याम् – **"अनुमितिपदस्यानुमितिसामान्यपरत्वेऽसम्भवात्, यत्किञ्चिद-नुमितिपरत्वेऽतिप्रसङ्गात् प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकम्"**[117] इति । अर्थात् पर्वतादिपक्षकवह्न्यादिसाध्यकस्थले यत्किञ्चिद्ध्रदो वह्निमानित्यनुमिति-प्रतिबन्धकयथार्थज्ञानविषयताया वह्न्यभावविशिष्टह्रदादौ सत्त्वात् तस्य पर्वतपक्षकवह्न्यादिसाध्यकधूमादिहेतुकस्थले दोषतापत्तिरिति ।

अनुमितिपदस्य प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुप्रकारकनिश्चयोत्तरजायमान-प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकानुमितिपर-त्वेऽपि न निस्तार इति ।

वस्तुतस्तु पर्वतो वह्निमान् इत्यनुमितौ वह्न्यभाववद्ध्रदेऽतिव्याप्तिवारणाय प्रकृतपक्षकेति । तत्रैव घटाभाववत्पर्वतेऽतिव्याप्तिवारणाय प्रकृतसाध्यकेति । नन्वत्र प्रकृतहेतुकत्वनिवेशो व्यर्थः, प्रकृतपक्षसाध्यकानुमितिप्रतिबन्धकेत्यादिलक्षणस्यैव

---

117 सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – १५

सम्यक्त्वादिति चेन्न, प्रकृतहेतुकत्वं हि प्रकृतहेतुप्रकारकत्वं, तच्च धूमवान् ह्रदो वह्निमान् इति अनुमितौ एवास्ति, एवं च स्वरूपासिद्धिसङ्ग्रहायैव तदपादानम्, धूमाभाववान् ह्रद इति निश्चयस्य प्रकृतपक्षसाध्यकानुमित्यप्रतिबन्धकत्वात् । व्यभिचारादावव्याप्तिरित्यत्र आदिपदेन विरोधस्यैव उपादानादिति । वस्तुतस्तु प्राचीनमते तद्धेतुकानुमितौ तद्धेतुधर्मिकव्यभिचारज्ञानाभावस्य कारणत्वम्, एवं च प्रकृतपक्षसाध्यकानुमितिप्रतिबन्धकज्ञानविषयत्वाभावाद् व्यभिचारेऽव्याप्तिरतः प्रकृतहेतुकत्वनिवेशः, तन्निवेशे च प्रकृतहेतुकानुमितिप्रतिबन्धकत्वस्य व्यभिचारनिश्चये सत्त्वान्न अव्याप्तिः। नव्यमते च ग्राह्याभावानवगाहितया व्यभिचारनिश्चयस्य अप्रिबन्धकतया तादृशकार्यकारणभावे मानाभावात् तन्मताभिप्रायेण, तथा च व्यभिचारादवव्याप्तिरिति ।

नव्यास्तु प्रकृतहेतुकत्वं न प्रकृतहेतुप्रकारकत्वं, "लक्षणयानुमितिजनक-ज्ञानमात्रपरत्वे च बाधादौ अव्याप्तिः, बाधादिज्ञानस्य परामर्शे अप्रतिबन्धकत्वाद्" इति परामर्शस्याप्रतिबध्यत्वं वदता ग्रन्थकारेण पूर्वकल्पे स्वरूपासिद्धसङ्ग्रहस्य अप्यभिप्रेतत्वात्, किन्तु प्रकृतहेतुकपरामर्शाव्यवहितोत्तरत्वं तत् ।

ननु एवं कथं स्वरूपासिद्धिसङ्ग्रहः, प्रकृतहेतुकपरामर्शाव्यवहितोत्तरत्वं हि ह्रदो वह्निमान् इत्यनुमितौ एवास्ति तत्र च स्वरूपासिद्धिनिश्चयप्रतिबध्यता नास्ति आचार्यव्यतिरिक्तमते पक्षांशे हेत्वनवगाहित्वादिति प्रकृतहेतुकत्वनिवेशो व्यर्थ इति चेन्न, पर्वतो वह्निमान् महानसीयवह्नीतरवह्न्यभाववत्पर्वतकालीनधूमाद् इत्यत्र महानसीयवह्नीतरवह्न्यभाववत्पर्वतरूपबाधेऽव्याप्तिः, प्रकृतपक्षसाध्यकानुमितित्वस्य पर्वतो महानसीयवह्निवान्, वह्निमान् पर्वतश्चेति अनुमितिद्वये सत्त्वादनुमितित्व-व्यापकप्रतिबध्यत्वाप्रसिद्धेरतस्तन्निवेशः, तन्निवेशे च वह्निव्याप्यमहानसीयवह्नीतर-

वह्न्यभाववत्पर्वतकालीनधूमवान्पर्वत इति परामर्शस्येतरविशेषबाधनिश्चयरूपतया तदव्यवहितोत्तरजायमानानुमितिः 'पर्वतो महानसीयवह्निमान्' इत्येव, महानसीय-वह्नीतरबाधसत्त्वात्, तस्याश्च बाधनिश्चयप्रतिबध्यत्वात्तत्सङ्ग्रहः।

न च साध्यतावच्छेदकस्येतरवारकन्यूनवारकपर्याप्तिनिवेशस्यावश्यकता तादृशसाध्यतावच्छेदकगतरूपवृत्तिविधेयताशालित्वस्य महानसीयवह्निमान् इति अनुमितौ विरहात्, वह्निमान् इत्यनुमितौ च तत्सत्त्वेऽपि तत्र तादृशपरामर्शोत्तरत्वविरहात्, एवं च तादृशानुमित्यप्रसिद्ध्याव्याप्तितादवस्थ्यमिति वाच्यम् । यद्धर्मावच्छिन्नव्याप्यवत्ताज्ञानोत्तरमनुमितिस्तद्धर्मे एव विधेयतावच्छेद-कत्वम्, इतरबाधसहकारपरधर्मे प्रकारतावच्छेदकत्वमेव न तु विधेयतावच्छेदकत्वमिति मते महानसीयवह्निमान् इत्यनुमितौ वह्नित्वमात्रस्यैव विधेयतावच्छेदकतया साध्यतावच्छेदकगतरूपवृत्तिविधेयताशालितादृशानुमितित्व-व्यापकप्रतिवध्यतामादाय लक्षणसमन्वयात् ।

ननु महानसीयवह्न्यभाववत्पर्वतस्य बाधत्वे साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्यनुमितित्वव्यापकप्रतिवध्यतेत्यादि सिद्धान्तकल्पेऽपि निरुक्तानुमितित्व-व्यापकप्रतिबध्यत्वाप्रसिद्ध्या तद्दोषतादवस्थ्यम् अत एव तस्यालक्ष्यत्वमेव स्वीकरणीयमिति चेन्न, बाधनिश्चयस्य कार्यकालविधया प्रतिबन्धकतया तादृशसमूहालम्बनानुमितौ महानसीयवह्नीतरवह्नेर्बाधनिश्चयसत्त्वेन तादृशानुमितौ शुद्धवह्नित्वावच्छिब्बप्रकारताभाने तस्याहार्यत्वापत्तेः। एवम् इतरबाध-निश्चयाभावस्य कार्यसहभावेनापि कारणतया तत्क्षणे महानसीयवह्निमान् इत्यनुमितिरिति नानुपपत्तिः।

न च तथापि यत्र वह्निव्याप्यमहानसीयवह्निभिन्नवह्न्यभाववत्पर्वत-कालीनधूमवान् पर्वत इति परामर्शः ततः तत्पूर्वं वा महानसीयवह्न्यभाववान् पर्वत इति बाधनिश्चयः तदुत्तरं वह्निमान् इत्येवानुमितिर्जायते, तथा च

तादृशपरामर्शोत्तरानुमितित्वव्यापकप्रतिबध्यत्वाप्रसिद्ध्या पुनः अव्याप्तितादवस्थ्यमिति वाच्यम् । पर्वतपक्षकवह्निसाध्यकमहानसीयवह्निमन्महानसीयवह्नीतरवह्न्यभाववत्पर्वतकालीनधूमहेतुकस्थले तद्धेतुकपरामर्शोत्तरं महानसीयवह्न्यभाववान् पर्वत इति बाधनिश्चय एव न सम्भवति, तादृशबाधनिश्चयं प्रति तद्धेतुकपरामर्शस्यैव प्रतिबन्धकतया तद्धेतुकपरामर्शोत्तरं महानसीयवह्निमान् इत्यनुमितिरेव जायते तादृशानुमितिप्रतिबध्यत्वमादाय उक्तबाधेऽतिव्याप्तिवारणाय प्रकृतहेतुकत्वनिवेशव्यावृत्तिसम्भवात् ।

न च वह्निव्याप्यमहानसीयवह्निमन्महानसीयवह्नीतरवह्न्यभाववत्पर्वतकालीनधूमवान् पर्वत इति परामर्शोत्तरं लौकिकसन्निकर्षजन्यं दोषविशेषजन्यं वा महानसीयवह्न्यभाववान् पर्वत इति बाधनिश्चयः, "लौकिकसन्निकर्षजन्यस्य दोषविशेषजन्यस्य वा ज्ञानस्याप्रतिबध्यत्वात्" तदुत्तरं वह्निमान् इत्येवानुमितिर्जायते, तथा च निरुक्तपरामर्शोत्तरजायमानानुमितित्वव्यापकप्रतिबध्यत्वाप्रसिद्ध्याव्याप्तितादवस्थ्यमतोऽलक्ष्यत्वमेव तस्य स्वीकरणीयमिति प्रकृतहेतुकत्वनिवेशो व्यर्थ इति वाच्यम् । ज्ञानं विषयतासम्बन्धेन वह्निमद् वह्न्यभाववद्ध्रदधूमवत्कालीनमहानसीयवह्नीतरवह्न्यभाववत्तज्ज्ञानकालीनधूमाद् इत्यत्र महानसीयवह्न्यभाववद्ज्ञानरूपबाधेऽव्याप्तिवारणाय प्रकृतहेतुकत्वनिवेशस्य आवश्यकत्वात्, अन्यथा ज्ञानं वह्निमदित्याकारकानुमितेरपि प्रकृतपक्षसाध्यकानुमितितया तत्र बाधनिश्चयप्रतिबध्यत्वाभावात्, प्रकृतहेतुकत्वनिवेशे तु वह्निव्याप्यतादृशधूमवज्ज्ञानमिति परामर्शोत्तरं ज्ञानं वह्निमदित्यनुमितिर्न जायते तादृशपरामर्शस्य 'धूमवान् वह्न्यभाववानि'त्याकारकधूमावच्छेदेन वह्न्यभावावगाहिनिश्चयविशिष्ट'महानसीयवह्नीतरवह्न्यभाववत्तज्ज्ञानकालीनधूमवद्ज्ञानमित्याकारकप्रकृतपक्षे धूमविशेषावगाहि'निश्चयरूपतया ज्ञानं वह्निमदित्यनुमिति-

प्रतिबन्धकत्वात्, किन्तु महानसीयवह्निप्रकारकानुमितिरेव जायते तत्र च बाधनिश्चयप्रतिबध्यतासत्त्वात्तत्सङ्ग्रहः। न च विषयितासम्बन्धेन वह्नेः साध्यत्वानुसरणं किमर्थमिति वाच्यम् । संयोगेन वह्नेः साध्यत्वे धूमावच्छेदेन संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावावगाहिनिश्चयविशिष्टपक्षे तादृश-धूमावगाहिपरामर्शकाले संयोगादिसम्बन्धेन वह्निसामान्यानुमितेरिव वह्निविशेषानुमितेः अप्यसम्भवात्, विषयितया साध्यत्वे तु तादृशपरामर्शस्य विषयितया वह्निसामान्यानुमितिं प्रति एव प्रतिबन्धकतया महानसीयवह्न्यनुमितेः सम्भवादिति ध्येयम् ।

न च यत्रोक्तपरामर्शकाले धूमवति वह्न्यभावोऽव्याप्यवृत्तिरित्या-कारकाव्याप्यवृत्तित्वज्ञानं ततो ज्ञानं महानसीयवह्न्यभाववदिति बाधनिश्चयः तदुत्तरं वह्निमानित्यनुमितिर्जायते, तथाहि – तादृशानुमितिं प्रति वह्निव्याप्यवह्न्यभाव-वद्धूमवत्कालीनमहानसीयवह्नीतरवह्न्यभाववत्तज्ज्ञानकालीनधूमवद्ज्ञानमितिपरा-मर्शस्य धूमवान् वह्न्यभाववान् तादृशधूमवच्च ज्ञानमित्येतादृशनिश्चयविशिष्ट-निश्चयत्वेन प्रतिबन्धकत्वेऽपि प्रतिबन्धकतायां व्यापकांशेऽव्याप्यवृत्तित्वज्ञानस्य उत्तेजकतया तत्सत्त्वेन चोक्तनिश्चयस्याप्रतिबन्धकत्वात् । एवं च तादृशपरामर्शोत्तरं जायमाना या पर्वतो वह्निमानिति अनुमितिः तादृशानुमितित्व-व्यापकप्रतिबध्यत्वाप्रसिद्ध्या तादृशस्थले तादृशबाधस्याप्यलक्ष्यत्वमेव स्वीकर-णीयमिति प्रकृतहेतुकत्वनिवेशो व्यर्थ इति वाच्यम् । यस्य तादृशस्थले तादृशहेतुमति साध्याभावेऽव्याप्यवृत्तित्वज्ञानं नास्ति महानसीयवह्न्यभाववज्ज्ञानमिति बाधनिश्चयश्च नास्ति तस्य तदा निरुक्तपरामर्शोत्तरं जायमाना ज्ञानं महानसीयवह्निमदित्येवानुमितिः तादृशानुमितित्वव्यापकप्रतिबध्यतामादाय महानसीयवह्न्यभाववज्ज्ञानरूपोक्तबाधे लक्षणसमन्वयार्थं प्रकृतहेतुकत्व-निवेशस्यावश्यकत्वादिति ।

यद्वा यन्मते निरवच्छिन्नस्वरूपेण तदभाववत्तानिश्चयस्य तद्वत्ताबुद्धिं प्रति

प्रतिबन्धकत्वम्, तन्मते नाव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वम्, तथा च निरवच्छिन्न-स्वरूपेण व्यावर्त्तकधर्मदर्शनविधया वह्न्यनुमितिं प्रति तादृशपरामर्शस्य प्रतिबन्धकत्वान्न तदुत्तरं वह्न्यनुमितिस्तत्र धूमवति वह्न्यभावोऽव्याप्यवृत्तिरिति अव्याप्यवृत्तित्वज्ञानमेव न भवति, तद्धर्मिकाव्याप्यवृत्तित्वज्ञानं प्रति तद्धर्मिकव्याप्य-वृत्तित्वज्ञानस्येव तत्प्रतियोगिकसम्बन्धांशे निरवच्छिन्नत्वज्ञानस्यापि प्रतिबन्धकत्वात्। एतेन लौकिकसन्निकर्षजन्याव्याप्यवृत्तित्वज्ञानस्य अप्रतिबध्यत्वात्तत्सत्त्वे बाधकाभाव-इत्यपि परास्तम् । तन्मते अव्याप्यवृत्तित्वज्ञानसत्त्वेऽपि निरवच्छिन्नस्वरूपेण तदभाव-वत्तानिश्चयस्य प्रतिबन्धकत्वात् ।

न च अव्याप्यवृत्तित्वज्ञानस्यासम्भवेऽपि धूमवान् वह्न्यभाववान् इति ज्ञानमप्रमेत्यप्रामाण्यज्ञानसम्भवाद् वह्न्यनुमितौ बाधकाभावात्पूर्वोक्तदोषतादवस्थ्यम् इति वाच्यम् । तादृशाप्रामाण्यज्ञानस्य परामर्शांशेऽप्युत्तेजकतया तादृशाप्रामाण्यज्ञान-सत्त्वेऽनुमितिरेवासम्भवात्, अप्रामाण्यज्ञानाभावविशिष्टपरामर्शस्यैव कारणत्वमिति ।

न चैवम् ईदृशप्रकृतहेतुकत्वनिवेशे तत्पक्षकत्वतत्साध्यकत्वयोर्वैयर्थ्यम्, ह्रदो वह्निमान् पर्वतो घटवान् चेत्यनुमित्योः प्रकृतहेतुकपरामर्शजन्यत्वविरहेण प्रकृतहेतुका-नुमित्यनन्तर्गततया वह्न्यभाववद्ध्रदे घटाभाववत्पर्वते चातिव्याप्तिविरहादिति वाच्यम्। पर्वतो वह्निमान् धूमाद् इत्यादौ पर्वते महानसीयवह्नीतरवह्न्यभाव-विषयकबाधज्ञानकालेऽनुमितेर्महानसीयवह्निविषयकत्वे लाघवमिति लाघवज्ञानकाले वा वह्निव्याप्यधूमवत्तापरामर्शात् पर्वतो महानसीयवह्निमान् इत्यनुमितिर्जायते, तथा च तादृशानुमितेरपि तद्धेतुकत्वेन तादृशानुमितिप्रतिबन्धकज्ञान-विषयमहानसीयवह्न्यभाववत्पर्वतेऽतिव्याप्तिवारणाय प्रकृतसाध्यतावच्छेदकाव-च्छिन्नसाध्यकत्वनिवेशसार्थक्यात् । न हि तादृशानुमितिस्तादृशलाघवादिज्ञान-त्वावच्छिन्नजनकतानिरूपितजन्यताशालितया न निरुक्ततद्धेतुकत्वमिति वक्तुं शक्यम्, लाघवज्ञानादिविशिष्टपरामर्शकारणतायां लाघवज्ञानादेरवच्छेदकत्वात्, एवं तत्रैव

सुन्दरपर्वतविषयकत्वे लाघवमिति लाघवज्ञानसहकारेण जायमानतद्धेतुकत्वात् कान्तसुन्दरपर्वतो वह्निमान् इत्यनुमितिप्रतिबन्धकज्ञानविषयवह्न्यभाववत्सुन्दर-पर्वतेऽतिव्याप्तिवारणाय प्रकृतपक्षतावच्छेदकतापर्याप्तावच्छेदकताकोद्देश्यताकत्वरूप-तत्पक्षकत्वनिवेशोऽप्यावश्यक इति प्राहुः।

परन्तु जगदीशाः प्रकृतहेतुकत्वानिवेशे "लक्षणया तादृशानुमितिकारणज्ञान-मात्रपरत्वे च बाधादावाव्याप्तिः" इति अग्रिमग्रन्थस्यासङ्गतिः स्यात्, तत्र असम्भवदानस्य एवोचितत्वात्, तादृशानुमितीत्यत्र तत्पदस्य पूर्वपरामर्शकतया प्रकृतपक्षसाध्यकानुमितिपरतया तादृशानुमितिकारणत्वस्य नानाहेतुकपरामर्शे सत्त्वेन तादृशानुमितिकारणत्वव्यापकव्यभिचारनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यत्व-स्याप्रसिद्धत्वात्, यत्किञ्चिदनुमितिकारणपरत्वेऽसम्भववारणेऽपि अतिव्याप्तिदानस्यैव औचितत्वात्, बाधादावव्याप्तिरित्युत्तरग्रन्थविरोधापत्तितादवस्थ्यात्, अत एव प्रकृतहेतुकत्वनिवेशः। न चाग्रे प्रकृतहेतुकतादृशानुमितिकारणज्ञानमात्रपरत्वे इति कथनेनापि उपपत्तौ परकल्पाभिप्रायेण पूर्वं तन्निवेशो नोचित इति वाच्यम् । हेतौ प्रकृतस्य पक्षादौ च प्रकृतत्वस्य द्विधानिवेशे गौरवात्, मन्मते चैकेन प्रकृतत्वनिवेशेन निर्वाहात्, द्वन्द्वात्पर इत्यादिन्यायादिति प्राहुः।

तथा च तत्पक्षसाध्यहेतुकानुमितिप्रतिबन्धकज्ञानविषयस्तत्पक्षसाध्यहेतुका-नुमितौ दोष इत्यवश्यं वक्तव्यमिति । वस्तुतस्तु अनुमितौ कारणीभूतो योऽभावः, इत्यनेन व्यभिचारनिश्चयाभावो ग्रहीतुं नैव शक्यते व्यभिचारनिश्चयस्य व्याप्तिज्ञानं प्रति प्रतिबन्धकतया तदभावस्य तत्रैव कारणत्वेनानुमितिं प्रति अजनकत्वादिति । तथा च व्याप्तिज्ञानप्रतिबन्धकव्यभिचारादाव्याप्तिरिति । तदुक्तं गदाधरैः, **"तथा च व्यभिचारादौ अव्याप्तिः, वह्निर्धूमव्यभिचारीतिज्ञानाभावस्य पर्वतो धूमवानित्यनु-मित्यजनकत्वात्, लक्षणया तस्य तादृशानुमितिजनकज्ञानमात्रपरत्वे च**

**बाधादावव्याप्तिः, बाधादिज्ञानस्य परामर्शाप्रतिबन्धकत्वादतोऽनुमितिपदमजहत्स्वार्थ-लक्षणया तदुभयपरतया व्याचष्टे (दीधितिकारः) – 'तत्रानुमितिपदम् अनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेन अनुमितितत्कारणज्ञानपरम्"**[118] इति । अत्र अनुमितिनिष्ठकार्यतानिरूपकत्वम्, तादृशकार्यतासम्बन्धित्वं च द्वयमनुगमकरूपम् । तत्राद्ये अनुमितिनिष्ठकार्यतानिरूपकग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालि-यथार्थज्ञानविषयत्वं लक्षणम् । अत्र अनुमितिः 'ह्रदो वह्निमान्' इत्याकारिका, तन्निष्ठा या 'वह्निव्याप्यधूमवान् ह्रद इति परामर्शनिरूपिता कार्यता तादृशकार्यतानिरूपकत्वमनुमितौ परामर्शे चास्तीति तादृशकार्यतानिरूपको ग्रहः अनुमित्यात्मकः परामर्शात्मकश्च, तन्निष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालि-यथार्थज्ञानविषयत्वं बाधे व्यभिचारे चास्तीति लक्षणसमन्वयः।

अथ अनुमितिपदस्य अनुमितिसामान्यपरत्वेऽसम्भवः, अनुमितित्वव्यापक-कार्यत्वाप्रसिद्धेः। यत्किञ्चिदनुमितिपरत्वेऽतिप्रसङ्गः। प्रकृतपक्षतावच्छेदकाद्यनिवेशे वक्ष्यमाणरीत्या काञ्चनमयत्वाभाववत्पर्वतादावतिप्रसङ्गः। अनुगमकरूपान्तरे अवतरणिकामुच्यते भट्टाचार्यैः, **"निरूपकत्वं चात्र यदि प्रतियोगित्वं, तदा कार्यस्य कार्यताप्रतियोगित्वाभावादनुमित्यसंग्रहः, अतः सम्बन्धिपदं सम्बन्धिद्वयसाधारणस्य तत्साक्षात्कारजनकसाक्षात्कारविषयतात्मकनिरूपकत्वस्य लाभाय"**[119] इति । अत्र तत्साक्षात्कारेत्यत्र तत्पदं प्रकृतपक्षसाध्यहेतुकानुमितिनिष्ठकार्यतापरम्, तादृशकार्यता-साक्षात्कारेत्यर्थः। कार्यतासाक्षात्कारं प्रत्यनुमितिसाक्षात्कारः परामर्शसाक्षात्कारश्च कारणम् ।

---

118 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५८१

119 तदेव

ननु परामर्शानुमितिसाक्षात्कारयोः कार्यतासाक्षात्कारजनकत्वं कथं सम्भवेत्, क्रमेण जायमानपरामर्शानुमित्योरेकदा क्रमेण वा साक्षात्कारासम्भवात् अनुमितिद्वितीयक्षणे परामर्शरूपविषयस्यैव असत्त्वात्, अनुमित्युपरागेण कार्यतासाक्षात्कारसमये अनुमितेरपि नाशादिति चेन्न, घटादिरूपविषयस्य कार्यकालवृत्तितया कारणत्वनियमेऽपि ज्ञानस्थले नायं नियमः, तस्य तु स्वप्रत्यक्षे पूर्वकालवृत्तितयैव कारणतास्वीकारात्तयैवानुभवात् । 'सम्बन्धं वर्तमानं च गृह्यते चक्षुरादिना' इत्यस्य स्वसाक्षात्काराव्यवहितपूर्वक्षणे सम्बन्धमित्यर्थ इति न विरोधः। तथा च परामर्शतृतीयक्षणे एकदैवानुमितिपरामर्शयोः साक्षात्कारस्ततोऽनुमितौ कार्यतासाक्षात्कार इति ।

जगदीशास्तु अपेक्षाबुद्ध्यात्मकयोः परामर्शानुमित्योः साक्षात्कार-सम्भवान्नाप्रसिद्धिः। न च ज्ञानादीनां क्षणिकत्ववारणाय योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नविशेषगुणनाश्यत्वनियमादपेक्षाबुद्धितृतीयक्षणे एव विशेषगुणोत्पत्तिः स्वीकार्या, एवं चोक्तानुपपत्तिर्दुर्वारैवेति वाच्यम् । अनुभवानुरोधेन ज्ञानादीनां तत्तत्क्षण एव नाशक इति स्वीकृत्यापेक्षाबुद्धिद्वितीयक्षणे विशेषगुणोत्पत्तेरभ्युपगमादिति वदन्ति ।

वस्तुतस्तु परामर्शात्मकानुमितिद्वितीयक्षणेऽपि तत्साक्षात्कारसम्भवात्तत एव कार्यतासाक्षात्कार इति न कोऽपि दोष इति ध्येयम् ।

अथ किञ्चित्प्रतियोगिककिञ्चिदनुयोगिकसम्बन्धसाक्षात्कारं प्रति प्रतियोग्य-नुयोगिनोः साक्षात्कारस्य कारणत्वमिति सर्ववादिसिद्धम्, संयोगादिवत् कार्यतया अपि सम्बन्धत्वात्, तस्याः प्रतियोगी परामर्शः, अनुयोगी अनुमितिः, परामर्शः कार्यतासम्बन्धेनानुमितौ वर्तते ।

तथा च प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्न-

साध्यकप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षा-त्कारविषयताश्रयग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्व-मिति पर्यवसितम् । वस्तुतस्तु प्रकृतह्रदपक्षकप्रकृतवह्निसाध्यकप्रकृतधूमहेतुकानु-मितिः ह्रदो वह्निमान् इत्याकारिका तन्निष्ठा या कार्यतावह्निव्याप्यधूमवान् ह्रद इति परामर्शनिरूपिता कार्यता तादृशकार्यतासाक्षात्कारः ह्रदो वह्निमान् इत्यनुमितिः वह्निव्याप्यधूमवान् ह्रद इति परामर्शकार्येत्याकारकः, तत्साक्षात्कारजनको यः साक्षात्कारः ह्रदो वह्निमान् इत्यनुमितिमान् इत्यनुमितिसाक्षात्कारः, वह्निव्याप्यधूमवान् ह्रद इति परामर्शवान् इति परामर्शसाक्षात्कारः, तदीयविषयता अनुमितौ, परामर्शे च तादृशविषयताश्रयोऽनुमित्यात्मको ग्रहः परामर्शात्मको ग्रहश्च तन्निष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य बाधव्यभि-चारादौ सर्वत्र सत्त्वाल्लक्षणसमन्वय इति ।

अत्रानुमितिनिष्ठकार्यतानिवेशे पर्वतो वह्निमान् इत्यत्र पर्वतो वह्निमान् ह्रदश्च तथेति समूहालम्बनानुमितिनिष्ठह्रदपक्षकवह्निसाध्यकानुमितित्वावच्छिन्न-कार्यताम् आदाय वह्न्यभाववद्ध्रदेऽतिव्याप्तिः, तादृशानुमितित्वव्यापककार्यताप्रवेशे नानाविधव्याप्त्यवगाहिपरामर्शजन्यानुमितिनिष्ठैककार्यताविरहादसम्भवः, अत एव प्रकृतपक्षसाध्यकानुमितित्वावच्छिन्नकार्यता निवेश्या, तथा च प्रकृतपक्षकत्वप्रकृतसाध्यकत्वप्रकृतहेतुकत्वानुमितित्वैतद्धर्मचतुष्टयावच्छिन्नकार्यतासा-क्षात्कारेत्यादिलक्षणम् ।

अत्र प्रकृतपक्षकत्वानिवेशे पर्वतो वह्निमान् इत्यत्र वह्न्यभाववद्ध्रदे अतिव्याप्तिर्बोध्या । एवं प्रकृतसाध्यकत्वानिवेशे तत्रैव घटाभाववत्पर्वतेऽतिव्याप्तिः। न च प्रकृतहेतुकत्वनिवेशेऽतिव्याप्तिः प्रकृतपक्षकप्रकृतसाध्यकानुमितित्वावच्छिन्ना या 'वह्निव्याप्यघटवान् पर्वत इत्याकारकपरामर्शोत्तरजायमान' पर्वतो वह्निमान्

इत्यनुमितिनिष्ठा कार्यता तत्साक्षात्कारजनकसाक्षात्कारविषयताश्रयवह्निव्याप्य-घटवान् पर्वत इत्येतादृशग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालि यद् यथार्थज्ञानं वह्न्यभाववद्वृत्तिर्घट इत्याकारकं घटाभाववान् पर्वत इत्याकारकं च तद्विषयत्वस्य तत्र सत्त्वात्, तन्निवेशे तु न दोषः, धूमलिङ्गकानुमितिप्रयोजकत्वं धूमपरामर्शस्यैव न तु घटपरामर्शस्येति, उक्तपरामर्शस्य धूमलिङ्गकानुमिति-निष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयताश्रयत्वाभावादिति ध्येयम्।

ननु परस्परपरामर्शजन्यानुमितौ व्यभिचारवारणाय कार्यतावच्छेदककोटाव-व्यवहितोत्तरत्वनिवेशस्यावश्यकत्वे प्रकृतपक्षसाध्यविषयकत्वस्यानुमितित्वस्य कार्यतावच्छेदककोटौ प्रवेशे प्रयोजनाभावेन तदवच्छिन्नकार्यताघटितलक्षणस्य असम्भवः। न च परामर्शाव्यवहितोत्तरत्वावच्छिन्नं प्रति समवायेन परामर्शस्य कारणत्वे परामर्शाव्यवहितोत्तरोत्पन्ने घटात्मगतद्वित्वे व्यभिचारः, तादृशद्वित्वस्य समवायेन घटेऽपि सत्त्वात्तत्र समवायेन परामर्शविरहादिति वाच्यम् । क्रियासंयोगकार्यकारणभावोक्तरीत्या व्यभिचारस्य वारणात् । अथवा उक्तव्यभिचारवारणाय ज्ञानत्वस्य अनुमितित्वस्य वा कार्यतावच्छेदककोटौ निवेशनीयतया पक्षसाध्यविषयितायाः कार्यतावच्छेदकत्वे मानाभावात् । न च पक्षकधर्मिकसाध्यव्याप्यवत्तानिश्चयोत्तरानुमितिं प्रति साध्यव्याप्यवत्तानिश्चयत्वेन न हेतुत्वम्, तथा सति साध्यव्याप्त्यंशे, साध्यव्याप्यहेत्वंशे वा अप्रामाण्यग्रहास्कन्दितपरामर्शादनुमित्यापत्तेः, परन्तु परामर्शोऽव्यवहितोत्तरानुमितौ अप्रामाण्यज्ञानानास्कन्दितपरामर्शस्यैव कारणतया यत्र प्रथमं भाविज्ञानं धूमाभाववति धूमप्रकारकमित्यप्रामाण्यज्ञानं ततो वह्निव्याप्यधूमवान् घटव्याप्यपटवांश्चेति समूहालम्बनपरामर्शः, ततो घटानुमितिः ततो वह्न्यनुमितिः, तत्र घटानुमितिक्षणे वह्न्यनुमितिवारणाय निरुक्ताप्रामाण्यज्ञानव्यक्तेरुत्तेजकत्वस्य आवश्यकतया घटानुमितौ व्यभिचारात्पक्षसाध्यविषयतायाः कार्यतावच्छेदककोटौ

प्रवेश आवश्यक इति वाच्यम् । अप्रामाण्यज्ञानधर्मिकाप्रामाण्यज्ञानसत्त्वेऽनुमितिः भवति पुनस्तद्धर्मिकाप्रामाण्यज्ञानसत्त्वे नोत्पद्यते इत्यप्रामाण्यज्ञानानां तत्तद्व्यक्तित्वेनाभावः कार्यतावच्छेदककोटौ निवेशनीयः। एवं चोक्तस्थलीयाप्रामाण्यज्ञानव्यक्तेरभावस्य कारणतावच्छेदकेऽनिवेशादेवोक्तव्यभिचार-वारणात् । घटानुमितिक्षणे वह्न्यनुमित्यापत्तिदानं च न सम्भवति, वह्न्यनुमितित्वस्योक्तपरामर्शकार्यतावच्छेदकत्वविरहात्, उक्तपरामर्शाव्यवहितोत्त-रानुमितित्वावच्छिन्नं तु जायते एवेति । न च तथापि यत्र प्रथमं घटाभाववद्भूतलमिति बाधनिश्चयः, ततो घटव्याप्यवद्भूतलमिति परामर्शः, ततोऽप्रामाण्यज्ञानस्कन्दितवह्निव्याप्यधूमवान् इति परामर्शः, ततो घटवद्भूतलमिति अनुमितिः, ततः अनुमितिवारणाय निरुक्ताप्रामाण्यज्ञानव्यक्तेरुत्तेजकत्वमावश्यकमिति घटानुमितौ पुनर्व्यभिचारोऽतः पक्षसाध्यविषयतायाः कार्यतावच्छेदककोटौ प्रवेश आवश्यक इति वाच्यम् । कार्यतावच्छेदककोटौ अपि अप्रामाण्यज्ञानाभावस्य निवेशनीयत्वात्, तथा च तत्तदप्रामाण्यज्ञानव्यक्त्यभवकूटविशिष्टपरामर्शाव्यवहितो-त्तरानुमितिं प्रति तादृशविशिष्टपरामर्शस्य कारणत्वेनैव निर्वाहे पक्षसाध्यविषयतायाः कार्यतावच्छेदककोटौ निवेशेऽनावश्यक इति चेन्न, अनन्ताप्रामाण्यज्ञानव्यक्तीनाम् अभावसमुदायस्य कार्यतावच्छेदककोटौ निवेशे महागौरवमत एव लाघवात्पक्षसाध्यविषयतायाः कार्यतावच्छेदककोटौ निवेश उचितः, तथा च नासम्भव इति ।

अत्र कार्यतासाक्षात्कारकल्पे पर्वतो वह्निमान् इत्यत्र वह्न्यभाव-वद्ध्रदेऽतिव्याप्तिः, पर्वतपक्षकवह्निसाध्यकधूमहेतुकानुमितिनिष्ठकार्यताविषयको यः साक्षात्कारः 'पर्वतो वह्निमान् इत्यनुमितिः परामर्शकार्या ह्रदो वह्निमान् इत्यनुमितिश्च परामर्शकार्येति समूहालम्बनरूपः' तज्जनकः पर्वतो वह्निमान्

इत्यनुमितिसाक्षात्कार इव ह्रदो वह्निमान् इत्यनुमितिसाक्षात्कारोऽपि तदीयविषयताश्रयः ह्रदो वह्निमान् इति ग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य वह्न्यभाववद्ध्रदे सत्त्वात्, एवं तादृशकार्यतासाक्षात्कारजनकीभूतसमूहालम्बनसाक्षात्कारीयविषयतामादायापि तद्दोषतादवस्थ्यमतः तादृशकार्यताविषयकसाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकसाक्षात्कारीयविषयताश्रयग्रहनिष्ठप्रतिबध्यता निवेशनीया, तथा च नोक्तातिव्याप्तिः।

अथ एवं प्रथमसाक्षात्कारपदं किमर्थं तादृशकार्यताविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतानिवेशेनैव उपपत्तेरिति चेन्न, पर्वतो वह्निमान् इत्यत्र घटाभाववद्भूतलेऽतिव्याप्तिः, पर्वतपक्षकवह्निसाध्यकधूमहेतुकानुमितिनिष्ठकार्यताविषयकत्वावच्छिन्ना या जन्यता 'पर्वतो वह्निमान् इत्यनुमितिः परामर्शकार्या घटवद्भूतलविषयकज्ञानाद्' इति कार्यताविषयकानुमितिनिष्ठा जन्यता तन्निरूपितजनतावच्छेदिका या तादृशकार्यताव्याप्यघटवद्भूतलविषयकज्ञानवती अनुमितिरिति साक्षात्कारात्मकपरामर्शीयहेतुविषयता तदाश्रयहेतुभूतलघटवद्भूतलमिति ग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य तत्र सत्त्वात् । साक्षात्कारत्वनिवेशे तु नोक्तातिव्याप्तिः, परामर्शजन्यतायाः कार्यताविषयकत्वावच्छिन्नत्वेऽपि अनुमितित्वावच्छिन्नत्वेन साक्षात्कारत्वानवच्छिन्नत्वात् ।

ननु द्वितीयसाक्षात्कारपदं किमर्थं, तादृशकार्यताविषयकसाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयताश्रयग्रहनिष्ठप्रतिबध्यतानिवेशेनैवोपपत्तेरिति चेन्न, द्वितीयसाक्षात्कारनिवेशेऽपि पर्वतो वह्निमान् इत्यत्र घटाभाववद्भूतलेऽतिव्याप्तिः, पर्वतो वह्निमान् इत्यनुमितित्वेन घटवद्भूतलावगाहिज्ञानसाक्षात्कारस्यापि तादृशकार्यतासाक्षात्कारजनकतया तदीयानुमितित्वनिष्ठप्रकारतानिरूपितविशेष्यताया ऐक्यात्तदाश्रयो घटवद्भूतलमिति ग्रहोऽपि

तत्प्रतिबन्धकयथार्थज्ञानविषयत्वस्य तत्र सत्त्वात् । यद्धर्मावच्छिन्नविषयकसाक्षात्कारीयविषयता तादृशकार्यतासाक्षात्कारजनकतावच्छेदिका तद्धर्माश्रयग्रहनिष्ठप्रतिबध्यतानिवेशे परामर्शघटकज्ञानत्वमादाय स एव दोषः। अत एव यद्धर्मावच्छिन्नविषयताशालिसाक्षात्कारत्वव्यापिका तादृशकार्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकता तद्रूपाश्रयग्रहनिष्ठप्रतिबध्यतेत्यादिक्रमेण वक्तव्यम्, एवं च द्वितीयसाक्षात्कारत्वानिवेशेऽसम्भवः, तथा च सति यद्धर्मावच्छिन्नविषयताशालिग्रहत्वव्यापिकेत्याद्यर्थः स्यात्, एवं चानुमितित्वावच्छिन्नविषयताशालिग्रहत्वस्य अनुमितिविषयकानुमितिशब्दादौ सत्त्वात्तत्र तादृशजनकताविरहादिति ।

## ३.२) 'यथार्थ'पदविवेकः –

**"अनुमितिकरणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्"**[120] इत्यत्र यथार्थपदानुपादाने 'पर्वतो वह्निमान्' इत्यत्र वह्न्यभाववत्पर्वतरूपबाधभ्रमविषये वह्न्यभावादौ अतिव्याप्तिः। तथा हि अनुमितिः 'पर्वतो वह्निमान्' इति, तत्कारणीभूताभावो 'वह्न्यभाववान्', 'पर्वत' इति भ्रमाभावः, तत्प्रतियोगिज्ञानविषयत्वस्य वह्न्यभावादौ सत्त्वादिति । यथार्थपदोपादाने तु वह्न्यभाववान् पर्वत इति ज्ञानस्य यथार्थत्वमिति न दोषः। चन्द्रकलाटीकायामेवमाटीकितम् – **"यथार्थपदानुपादाने पर्वतो वह्निमान् धूमादित्यादौ पर्वतादौ वह्न्यभावादौ चातिव्याप्तिः, पर्वतो वह्निमान् इत्यनुमितौ पर्वतो वह्न्यभाववानित्याकारकभ्रमात्मकनिश्चयाभावस्यापि कारणतया अनुमितिकारणीभूताभावप्रतियोगितादृशभ्रमविषयतायाः पर्वतादौ सत्त्वात् । एवं वह्न्यभाव-**

---

[120] सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०९

**वद्वृत्तित्वादावप्यतिव्याप्तिः प्रकृतानुमितेर्व्याप्त्यादिविषयकत्वेन व्याप्तिविषयकानुमितिप्रतिबन्धकवह्न्यभाववद्वृत्तिर्धूम इत्याकारकभ्रमविषयताया वह्न्याद्यभाववद्वृत्तित्वादावनपायात् न केवलं व्यतिरेकिसाध्यस्थल एवातिव्याप्तिः केवलान्वयिसाध्यकप्रमेयमभिधेयत्वादित्यादावपि मेयत्वाभिधेयत्वादावतिव्याप्तिः, घटत्वाद्यभावादौ प्रतियोगितासम्बन्धेन मेयत्वभ्रमात्मकमेयत्वाभाववद्वृत्त्यभिधेयत्वम् इत्याकारकज्ञानस्यापि मेयत्वव्याप्तिविषयकानुमितिप्रतिबन्धकतया तद्विषयत्वस्य मेयत्वादौ सत्त्वात्, यथार्थपददाने तु न तत्रातिव्याप्तिः, पर्वतादौ वह्न्यभावादेर्ज्ञानस्य भ्रमात्मकतया यथार्थत्वासम्भवाद्"**[121] इति ।

अत्र दीधितिकारो भ्रमत्रयं प्रदर्श्य यथार्थपदं सार्थकयति, तथा हि १) पर्वतो वह्न्यभाववान्, २) धूमो वह्नेर्व्यभिचारी, ३) अभिधेयत्वं प्रमेयत्वस्य व्यभिचारि – **"पर्वतो निर्वह्निर्धूमो वह्नेरभिधेयत्वं मेयत्वस्य व्यभिचारीत्याभ्रमाद् अनुमितिप्रतिबन्धादाह यथार्थेति"**[122] इति । अत्र प्रथमोऽनुमितौ साध्यवत्तांशे प्रतिबन्धकः, द्वितीयतृतीयौ च साध्यव्याप्यवत्तांशे विरोधिनौ । तत्रापि द्वितीये जलादौ प्रसिद्धस्य वह्निनर्व्यभिचारित्वस्य धूमे भ्रमः। तृतीये तु कुत्राप्यप्रसिद्धस्यैव प्रमेयत्वव्यभिचारित्वस्य अभिधेयत्वे भ्रम इति वैलक्षण्याद् भ्रमत्रयप्रदर्शनमिति । तदुक्तं गदाधरभट्टाचार्यैः –

**"पर्वतो वह्निमानित्यादिसद्धेतुस्थले बाधादिभ्रमविषयेऽतिव्याप्तिवारकतया यथार्थपदं सार्थकयति पर्वतो निर्वह्निरिति । अत्र इतिपदस्य त्रितयस्थले सम्बन्धाद् भ्रमत्रयलाभः। प्रत्येकभ्रममादायातिप्रसङ्गसम्भवात् समूहालम्बनभ्रमपर्यन्तानुधावनवैफल्यात् तत्परत्वासङ्गतिरिति ध्येयम् ।**

---

121 सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसमेत), पृ. - ५५

122 तदेव

**प्रथमभ्रमोऽनुमितौ विरोधी अन्त्यौ च तज्जनकज्ञाने तथा, तयोरपि अन्यत्र प्रसिद्धस्य साध्याभाववद्वृत्तित्वस्य धूमाद्यंशे भ्रमत्वम्, अन्त्ये च प्रमेयत्वाभाववद्वृत्तित्वस्याप्रसिद्ध्या न तद्भ्रमत्वं, किन्तु अभावांशेऽनुयोगिताविशेष-सम्बन्धेन साध्यस्य भ्रमत्वमित्येतादृशविशेषमाहृत्य शिष्यव्युत्पादनायानेकविध-भ्रमकथनम्"**[123] इति।

ननु एकत्र प्रसिद्धस्यैव अन्यत्र भ्रम इति नियमात् तृतीयस्थलेऽभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्यत्र भ्रमत्वमेव कथम् ? इत्याशङ्क्य प्रमेयत्वाभावा-धिकरणनिरूपितवृत्तित्वमित्यत्र अभावांशेऽनुयोगित्वविशेषसम्बन्धेन प्रमेयत्वस्य भ्रम इति। तदुक्तं गदाधरभट्टाचार्येण – **"अभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्यत्र स्वरूपस-म्बन्धावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रमेयत्वभ्रमो वाच्यः"**[124] इति।

ननु साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्न-साध्यतावच्छेदकमात्रावच्छिन्नप्रकारतानिरूपिताभावविषयतानिरूपिताधिकरणविष-यतानिरूपितवृत्तित्वविषयतानिरूपिताभावविषयतानिरूपितहेतुविषयतानिरूपितप-क्षविषयताशालिनिश्चयत्वेनानुमितिहेतुत्वोक्तौ भ्रमस्य नानुपपत्तिः, स्वरूपसम्बन्धाव-च्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रमेयत्वस्य अभावांशे भ्रमत्वसम्भवादिति चेन्न, एवं सति गुणकर्मान्यत्वोपलक्षितसत्ताभाववदवृत्तित्वज्ञानात् शुद्धसत्तात्वावच्छिन्न-विधेयताकानुमित्यनुपपत्तेः, उपलक्षणीभूतधर्मस्यापि प्रकारतावच्छेदकत्वात्, अतः प्रतियोगितायामेव साध्यतावच्छेदकमात्रावच्छिन्नत्वं देयमुपलक्षणीभूतधर्मस्य प्रतियोगितानवच्छेदकत्वेन तादृशानुपपत्तिवारणसम्भवादिति।

---

123 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५८५

124 तदेव, पृ. – १५८५-१५८६

अथ व्युत्पत्तिवादे संसर्गतावच्छेदकांशे भ्रमत्वं भट्टाचार्येणैव स्वीकृतं व्याप्तिपञ्चके च जगदीशेन संसर्गप्रकारसाधारणविशेष्यविशेषणभावस्य भ्रमत्वघटकत्वादित्युक्तम् उभयत्र का युक्तिरिति चेन्न, संसर्गतावच्छेदकांशे भ्रमत्वमङ्गीकुर्वतामयमाशयः, संसर्गांशे भ्रमत्वानभ्युपगमे प्रमात्वस्यापि तत्रास्वीकारापत्तेः, निर्विकल्पकान्यज्ञानस्य भ्रमत्वप्रमात्वान्यतरनियमेन संसर्गांशे तत्स्वीकारेऽनुभवविरोधात्, अत एव संसर्गांशे प्रकारविशेष्यभावविरहेऽपि विशेष्यविशेषणभावोऽस्ति, परन्तु संसर्गतावच्छेदकीयविषयताया विशेषणज्ञान-जन्यतानवच्छेदकत्वेन तत्र प्रकारत्वं नाभ्युपगम्यते, एवञ्च तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठविशेषणताकज्ञानत्वमेव भ्रमत्वं पर्यवसितम् । संसर्गांशे भ्रमत्वमनभ्युपगच्छतां तावदयमाशयः, संसर्गांशे विशेष्यविशेषणभावोऽपि नास्त्येव, संसर्गतावच्छेदकत्वेनैव संसर्गगतधर्माणां भानं न तु विशेषणत्वेन, विशिष्टबुद्धावपि संसर्गांशे प्रमात्वं किमपि नास्तीत्यभिप्रेत्य भट्टाचार्येणात्र भ्रमत्वं खण्डितम्, परन्तु प्रकारांशे प्रमानिरूपितसांसर्गिकविषयत्वमेव संसर्गेऽभ्युपगम्यत इति ध्येयम् – **"अभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्यत्र स्वरूपसम्बन्धावच्छिन्नप्रमेयत्वा-वच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रमेयत्वभ्रमो वाच्यः, प्रतियोगितांशे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकावच्छिन्नतयोः साध्याभाववद-वृत्तित्वरूपव्याप्तिघटकतया तदंशे तदुभयावगाहिव्यभिचारज्ञानस्यैव व्याप्तिज्ञान-विरोधित्वात्, एवञ्च भेदादौ प्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वस्य प्रसिद्धावपि स्वरूपसम्बन्धावच्छिन्नतादृशप्रतियोगिताकत्वाप्रसिद्ध्या तादृशसम्बन्धेन भ्रमत्वानु-पपत्तिः। प्रतियोगितांशे सम्बन्धविशेषावच्छिन्नत्वस्य भ्रम इत्यपि न युक्तम् । तस्य सम्बन्धघटकतया तत्प्रकारकत्वघटिततद्भ्रमत्वानुपपत्तेः। न च तेन रूपेण**

**प्रतियोगिताप्रकारक एवात्र भ्रमो विवक्षितः न तु तदवच्छिन्नप्रतियोगितासंसर्गक इति वाच्यम्"**[125] इति ।

ननु प्रतियोगिताप्रकारकज्ञानस्य एवानुमितिहेतुत्वे लाघवम्, साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताघटितधर्मेण तद्धेतुत्वे तु साध्यतावच्छेदकस्य द्विधा प्रवेशेन गौरवम् । न च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नप्रकारतात्वेनैव प्रकारतायाः कारणतावच्छेदककोटौ प्रवेशो न तु साध्यतावच्छेदकावच्छिन्नत्वेनेति वाच्यम्, वह्नित्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन घटाभाववदवृत्तिधूमवान् पर्वत इति परामर्शात्पर्वते वह्न्यनुमित्यापत्तेरिति चेन्न्, प्रतियोगिताप्रकारकज्ञानस्य अनुमितिकारणत्वे प्रतियोगित्वनिष्ठसांसर्गिकविषयतायाः प्रतियोगिताकुक्षिप्रविष्टसाध्यतावच्छेदकधर्मावच्छिन्नत्वादिनिष्ठप्रकारताया अपि किञ्चित्सम्बन्धावच्छिन्नतया तत्सम्बन्धनिष्ठसांसर्गिकविषयतायाः च अनुमितिजनकतावच्छेदककोटौ प्रवेशे महागौरवात् ।

अथैवं महानसीयवह्निमानित्यनुमितौ तद्व्याप्यवत्ताज्ञानस्य केन रूपेण कारणता ? यदि वह्नित्वमहानसीयत्वधर्मद्वयनिष्ठप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यताघटितधर्मेण, तदा क्वचित् महानसीयवह्निमान् क्वचित् वह्निमहानसीयवान् इत्यनुमितिभेदो न स्यादिति चेन्न, परामर्शांशे यत्र अभावविशेषणतापन्नवह्न्यंशे वह्नित्वं धर्मितावच्छेदकीकृत्य महानसीयत्वं भासते तत्र धर्मिपारतन्त्र्येण सामानाधिकरण्यसम्बन्धेन महानसीयत्वस्य वह्नित्वेऽपि भानात् महानसीयत्वावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकत्वसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रका

---

125 सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ७२-७५

-रतानिरूपिताभावत्वावच्छिन्नविशेष्यताघटितधर्मेण महानसीयवह्निमानित्यनुमि-तिकारणत्वम्, एवं यत्र महानसीयत्वं धर्मितावच्छेदकीकृत्य वह्नित्वं भासते तत्र महानसीयाभाववदवृत्तिधूमवानितिपरामर्शस्य वह्नित्वावच्छिन्नमहानसीयत्वनिष्ठाव-च्छेदकताकप्रतियोगिताकत्वसम्बन्धावच्छिन्नमहानसीयनिष्ठप्रकारतानिरूपिताभाव-त्वावच्छिन्नविशेष्यताघटितधर्मेण वह्निमहानसीयवान् इत्यनुमितौ कारणत्वमिति न काप्यनुपपत्तिः।

विशेष्यताविशिष्टप्रकारत्वानिरूपकत्वमेव सर्वांशे भ्रमभिन्नत्वम्, वैशिष्ट्यञ्च स्वनिरूपितत्वस्वाश्रयनिष्ठाधिकरणतानिरूपिताधेयतावदन्यत्वोभयसम्बन्धेन इति । आधेयतावत्त्वं च स्वानवच्छेदकानवच्छिन्नत्वस्वसामानाधिकरण्यस्वावच्छेदक-सम्बन्धावच्छिन्नत्वस्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन । स्ववृत्तित्वञ्च स्वानवच्छेदकानव-च्छिन्नत्वसम्बन्धेनेति तु तत्त्वमिति ।

ननु प्रकारान्तरानुसरणे इत्यस्य यद्रूपावच्छिन्नविषयत्वं प्रकृतानुमिति-प्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपत्वमित्यर्थकताया वक्तव्यतया तादृशयद्रूपावच्छिन्न-विषयतायाः संशयादौ सत्त्वेन प्रकृतानुमितिप्रतिबन्धकतातिरिक्तवृत्तितया असम्भववारणाय एव यथार्थपदसार्थक्यसम्भवे कथं तस्य व्यर्थत्वमभिहितमिति चेन्न, जलं वह्न्यभावविरोधीतिज्ञानकालीनस्य ह्रदो जलवान् वह्न्यभाववान् वेत्यादिज्ञानस्य संशयत्वात्तस्य च सर्वांशे यथार्थतया तदीयविषयिताया अनुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वेन असम्भववारणाय यद्रूपावच्छिन्नविषयितायां निश्चयवृत्तित्वविशेषणस्य आवश्यकतया संशयमादाय दोषासम्भवेन यथार्थपदस्य सुतरां वैयर्थ्यात् । न चाहार्याप्रामाण्यज्ञानास्कन्दितज्ञानवारणाय तत्सार्थक्यमिति वाच्यम्, वह्निमान् ह्रद इति ज्ञानोत्तरं यत्रेच्छाप्रयोज्यं वह्न्यभाववान् ह्रद इतिज्ञानं जातं तादृशज्ञानस्यापि सर्वांशे यथार्थात्मकताहार्यतया तद्वारणाय अनाहार्यत्वस्य, यत्र भाविज्ञानम् अप्रमेत्यप्रामाण्यज्ञानं ततो वह्न्यभाववान् ह्रद

इतिनिश्चयस्ततोऽतीतज्ञानमप्रमेतिज्ञानं तत्राप्रामाण्यज्ञानद्वयपुटितबाधनिश्चयस्य यथार्थस्य वारणायाप्रामाण्यज्ञानानास्कन्दितत्वस्यापि निश्चयविशेषणताया आवश्यकत्वात् तद्वारणायापि तत्सार्थक्यासम्भवादिति ध्येयम् ।

अत्र स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन वह्नित्वादिगतैकत्ववृत्तिर्या विशेष्यता तन्निरूपितदोषपदप्रयोज्यप्रकारतायां प्रमानिरूपितत्वापत्तिरिति पर्यवसितार्थः। आपत्त्याकारस्तु तादृशविशेष्यतानिरूपित-दोषपदप्रयोज्यप्रकारत्वं यद्यनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वाव-च्छिन्नं स्यात् तदा प्रमानिरूपितं स्यादिति ।

ननु अखण्डाभावघटकतयैव सार्थक्यसम्भवे कथं तस्य वैयर्थ्याभिधानमिति चेन्न, प्रकृतानुमितिप्रतिबन्धकतावृत्तिर्योऽभावस्तदीया या अवच्छेदकत्वनिष्ठा प्रतियोगिता तन्निरूपितप्रतियोगितात्वावच्छिन्नावच्छेदकतानिरूपितभेदत्वावच्छिन्ना-वच्छेदकतानिरूपिताधेयतात्वावच्छेदकतानिरूपिता या याथार्थ्यसमानाधिकरणा निश्चयत्वावच्छिन्नावच्छेदकता तन्निरूपितविषयितात्वावच्छिन्नावच्छेदकतानिरू-पितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावद्धर्मवत्त्वं हेत्वाभासत्वमेतादृशलक्षणा-नुसारेण वैयर्थ्यम् आशंकितं न तु अभावप्रतियोगितावच्छेदकतया याथार्थ्यस्य निवेशानुसारेणेति । तदुक्तं **दीधिति**कृता – **"अथ विशिष्टविषयकं ज्ञानं प्रतिबन्धकम्, तद्घटकं च न विशिष्टमिति चेत्, तर्हि यथार्थेति व्यर्थं भ्रमविषयविशिष्टस्याप्रसिद्धत्वादित्यनुशयेनाह यदिति ।"**[126]

जगदीशास्तु संशयान्यत्वस्य अनाहार्यत्वस्य अप्रामाण्यज्ञानानास्कन्दितत्वस्य च तत्तद्व्यक्तित्वेनाभावप्रवेशे गौरवमतोऽभावविशिष्टान्यत्वमेव यद्रूपावच्छिन्नविषयक-निश्चयविशेषणम्, वैशिष्ट्यञ्च स्वाभाववत्त्वस्वावच्छिन्नप्रतिबन्धकतावच्छेदक-विषयितानिरूपकतावच्छेदकधर्मावच्छिन्ननिरूपकताकविषयितावत्त्वोभयसम्बन्धेन,

---

126 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५८५

एवञ्च अप्रामाण्यज्ञानद्वयपुटितबाधनिश्चयवारणाय अभावविशिष्टान्यत्वस्य लाघवान्निवेशनीयतया तत एव यथार्थपदवैयर्थ्यमिति प्राहुः। वस्तुतो अभावविशिष्टान्ययद्रूपावच्छिन्नविषयताशालिनिश्चयत्वव्यापिका प्रकृतानुमितित्व-व्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमित्येवं यथार्थपदाघटितं लक्षणं वक्तव्यम् । तादृशविषयतायाम् अभाववैशिष्ट्यञ्च स्वप्रतियोगिमन्निष्ठत्वस्वावच्छिन्न-प्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेन, प्रतियोगिता च विशेष्यत्वसामानाधि-करण्योभयस्वरूपान्यतरसम्बन्धेनेत्यपि वदन्ति ।

ननु आद्यस्य दुष्टहेतुलक्षणत्वे दोषेषु अतिव्याप्तिः, तेषामपि अनुमितिविरोधियथार्थज्ञानविषयत्वात् । न च ह्रदादिपक्षकवह्न्यादिसाध्यस्थले वह्न्यभाववद्ध्रदादिरूपदोषाणामपि दुष्टहेतुतया दुष्टत्वमेवेति वाच्यम्, तद्रूपावच्छिन्नपक्षकतद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुकस्थले तेन रूपेण दुष्टस्य लक्षणं यदि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिविरोधियथार्थज्ञानविषयत्वमात्रं तदा ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबन्धक-प्रमाविषयवह्न्यभाववद्ध्रदादीनां धूमत्वादिना दुष्टत्वाभावादतिव्याप्तिरित्याशङ्का परिजिहीर्षुः तादृशाभावप्रतियोगिनां ज्ञानमिति षष्ठीसमासमाश्रित्य तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषयत्वमर्थं व्याख्यास्यति, तच्च ज्ञायमानदोषस्य प्रतिबन्धकतामते एव सङ्गच्छते । तदुक्तं दीधितौ, **"तत्र तृतीयमिव प्रथममपि ज्ञायमानव्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्य । तदर्थश्च तादृशाभावप्रतियोगिनो ये व्यभिचारादयः तत्प्रकारकयथार्थज्ञानविषयत्वम्"**[127] इति ।

तृतीयलक्षणस्य सर्वमते एव ज्ञायमानदोषप्रतिबन्धकतामताभिप्रायकतया दृष्टान्तत्वेनोपन्यासः। प्रतियोग्यन्तेन व्यभिचारादिदोषानादाय लक्षणं

[127] सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५८८

सङ्गमनीयमिति दर्शयितुं व्यभिचारादय इति, न तु तेन रूपेण लक्षणघटकत्वमित्यवधेयम् । एवं च यथार्थपदानुपादाने दुष्टत्वभ्रममादाय प्रकृतहेतुभिन्नेऽतिप्रसङ्ग इति यथार्थपदसार्थक्यम् । तदुक्तं चन्द्रकलाटीकायाम् – **"यद्यपि प्रतियोगित्वमपि प्रतियोगिभेदेन भिन्नमेवेति एकोपादानेऽपरस्यासंग्रहो दुष्परिहारस्तथापि प्रतियोगितायाः प्रतियोगितावच्छेदकस्वरूपत्वमभिप्रेत्यैवेत्यमभिहितमिति ध्येयम् । यथार्थपदानुपादाने पर्वतो वह्निमान् धूमादित्यादिसद्धेतौ पर्वते वह्निसाधने धूमो दुष्ट इति व्यवहारस्तु न सम्भवति, व्यवहारं प्रति व्यवहर्त्तव्यज्ञानस्य जनकतया व्यवहर्त्तव्यस्य पर्वतपक्षकवह्निसाध्यकधूमहेतुकानुमितिप्रतिबन्धकप्रकारकज्ञानविशेष्यत्वस्य तादृशानुमितिप्रतिबन्धकव्यभिचारबाधाद्यप्रसिद्ध्याप्रसिद्धत्वेन तादृशव्यवहर्त्तव्यज्ञानासम्भवादिति यथार्थपदसार्थक्यम्"**[128] इति ।

यद्यपि पर्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नसाधने धूमत्वावच्छिन्नो दुष्टः इत्यादेः सद्धेतौ दुष्टत्वव्यवहारस्य नापत्तिः, तत्र तत्पक्षसाध्यहेतुकानुमितिप्रतिबन्धकरूपदोषप्रकारकज्ञानविषयत्वस्यैव प्रत्येतव्यत्वात्, तादृशानुमितिप्रतिबन्धकबाधव्यभिचारादेश्च अप्रसिद्धत्वात्, ह्रदादौ वह्न्यादिसाधनमादाय च सर्वत्र दुष्टत्वव्यवहार इष्टः, तथापि धूमसाधने वह्नित्वेनायं दुष्ट इत्यादौ वह्नित्वावच्छिन्नहेतुकधूमाद्यनुमितिप्रतिबन्धकदोषप्रकारकज्ञानविषयत्वस्य प्रत्ययात् वक्ष्यमाणसम्बन्धावच्छिन्नतादृशानुमितिप्रतिबन्धकधूमाभाववद्वृत्तित्वविशिष्टवह्न्यादिरूपदोषप्रकारताशालिभ्रममादाय रासभादितात्पर्येणापि तथा व्यवहारः स्यात् । तदुक्तं चन्द्रकलायाम् – **"धूमाभाववद्वृत्तित्वविशिष्टवह्न्यादिरूपव्यभिचारस्य स्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धेन वह्न्यादावेव वर्त्तमानतया तेन**

---

[128] सा.नि.प्र.(चन्द्रकला-कलाविलासटीकद्वयसमेत), पृ. – ७३-७४

**सम्बन्धेन तादृशव्यभिचाराभाववति रासभे तत्सम्बन्धावच्छिन्नव्यभिचारप्रकारताक-भ्रमीयविशेष्यत्वरूपदुष्टत्वस्य रासभे सत्त्वात् रासभतात्पर्येण धूमसाधने अयं दुष्ट इति व्यवहारः स्यात्, यदि यथार्थपदोपादानं न स्यादित्याशयः"**[129] इति ।

ननु धूमसाधने वह्नित्वेनायं दुष्टः इत्यादौ वह्नित्वपदोत्तरं तृतीयार्थो वैशिष्ट्यं तच्च समवायरूपं तस्य च अनुयोगितासम्बन्धेन इदन्त्वावच्छिन्ने विशेष्ये रासभ एव अन्वयस्यावश्यकतया रासभे च तादृशवह्नित्वसमवायानुयोगित्वस्यासत्त्वात् व्यवहर्तव्यस्याप्रसिद्ध्या कथं तादृशव्यवहार इत्याशंकते गदाधरः, **"न च विशेष्ये तृतीयान्तार्थवह्नित्ववैशिष्ट्यभावाद्रासभे तद्बाधेन नायमतिप्रसङ्ग इति वाच्यम्, तथा सति दोषपदार्थघटकानुमितौ वह्नित्वाववच्छिन्नहेतुकत्वालाभात् तल्लाभानुरोधेन हेतुप्रकारकज्ञानजन्यानुमितिप्रतिबन्धकरूपदोषपदार्थघटकहेतौ वह्नित्ववैशिष्ट्यरूपतृतीयान्तार्थस्य, तत्प्रकारतायां वावच्छिन्नत्वार्थकतृतीयान्त-लभ्यवह्नित्वावच्छिन्नत्वस्य अन्वय इत्यस्यैव उपगन्तव्यत्वात् । न च विशेष्ये वह्नित्वादिधर्मवैशिष्ट्यबोधकपदसमभिव्याहारस्थले दोषार्थकधातोरेव वह्नित्वाव-च्छिन्नहेतुकानुमितिप्रतिबन्धकोऽर्थः, अथवा अनुमित्यर्थकसाधनशब्दस्यैव वह्नित्वाद्यवच्छिन्नहेतुकानुमितिरूपविशेषलाक्षणिकत्वम्, दुष्धात्वर्थेऽनुमित्यन्तर्भावे साधनपदार्थानन्वयप्रसङ्गात्, तथा च विशेष्य एव तृतीयार्थवैशिष्ट्यान्वयोप-गमान्नोक्तातिप्रसङ्ग इति वाच्यम्, एवमपि वह्निना धूमसाधने रासभो दुष्ट इत्यादिव्यवहारस्य भ्रममादाय अतिप्रसङ्गादि"**[130]ति यथार्थपदसार्थक्यम् ।

यथार्थपददानेऽपि पर्वतो वह्निमान् द्रव्यादित्यादौ वह्न्यभाववद्वृत्तिद्रव्य-रूपव्यभिचारस्य तादृशद्रव्यत्वादिमत्त्वसम्बन्धेन धूमादिहेतावपि सत्त्वेन धूमो दुष्ट

---

129 सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसमेत), पृ. – ७४-७५

130 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५८९

इतिव्यवहारापत्तिवारणाय तद्रूपावच्छिन्नहेतुकानुमितिप्रतिबन्धकप्रकारकज्ञानविषयत्वं तद्रूपावच्छिन्नस्य दुष्टत्वव्यवहारनियामकं वाच्यमतो न वह्निना धूमसाधने रासभो दुष्ट इति व्यवहारापत्तिरिति । न च वह्निना धूमसाधने आर्द्रेन्धनप्रभववह्निर्दुष्ट इति व्यवहारापत्तिरिति वाच्यम्, तद्रूपमात्रावच्छिन्ने दुष्टत्वव्यवहारनियामकत्वस्य विवक्षितत्वात् । न चैवं वह्निना धूमसाधने अयोगोलकीयवह्निर्दुष्ट इति व्यवहारानुपपत्तिरिति वाच्यम्, इष्टापत्तेः। न चोक्तलक्षणस्य इतरभेदानुमापकत्वे प्रमेयरूपदुष्टहेतोः इतराप्रसिद्ध्या साध्याप्रसिद्धिरिति वाच्यम्, दुष्टव्यवहारविषयतावच्छेदकानवच्छिन्नप्रकारताश्रयस्यैव तादृशेतरत्वेन विवक्षितत्वात् । दोषविशिष्टस्य प्रमेयस्यादुष्टप्रमेयान्तरभेदाभ्युपगमेऽपि तादृशेतरत्वप्रसिद्धिसम्भवाच्च । यत्र इतरत्वस्य प्रसिद्धिस्तत्रैव लक्षणस्य इतरभेदानुमापकत्वमित्यस्य स्वीकारेऽपि क्षत्यभावाच्च ।

ननु 'ह्रदो वह्निमान् प्रमेयधूमाद्' इत्यादौ वह्न्यभाववद्ध्रदादिरूपदोषविषयकप्रकृतहेतुविषयकज्ञानविषयतावच्छेदकप्रमेयत्ववत्त्वस्य घटादावपि सत्त्वेन तस्य दुष्टत्वापत्तिभिया स्वज्ञानविषयप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वसम्बन्धावच्छिन्नदोषप्रकारताया अवश्यं वक्तव्यतया काञ्चनमयधूमहेतोर्दुष्टत्वानुपपत्तिः, प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणकाञ्चनमयधूमत्वस्याप्रसिद्धत्वादिति चेन्न, प्रकृतहेतुनिरूपितवृत्तिताविशिष्टावच्छेदकताया एव विवक्षितत्वात् । वैशिष्ट्यञ्च सामानाधिकरण्यसम्बन्धेन, तथा च प्रमेयधूमहेतुकस्थले प्रमेयत्वधूमत्वयोरवच्छेदकत्वं तादृशवृत्तिताविशिष्टमिति नातिव्याप्तिः, साधनाप्रसिद्धौ च धूमत्वस्यैवतादृशावच्छेदकत्वं न तु काञ्चनमयत्वस्येति नाव्याप्तिः। न च प्रमेयहेतौ घटो दुष्ट इति व्यवहारापत्तिरिति वाच्यम्, तादृशव्यवहारस्य इष्टत्वादिति विभावनीयम् । चन्द्रकलायामपि **"तथा च पर्वतत्वावच्छिन्नविषयतानिरूपितवह्न्यभावत्वावच्छिन्न-**

**विषयतावत्त्वेन पर्वतो वह्निमान् धूमाद् इत्यादौ पर्वतो वह्न्यभाववान् इत्याकारकभ्रमीयवह्न्यभावादेरप्युपादातुं शक्यतया तादृशवह्न्यभावरूपानुमिति-प्रतिबन्धकनिष्ठत्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धावच्छिन्नप्रकारताकयथार्थ -ज्ञानविशेष्यत्वस्य निरुक्तधूमादिसद्धेतौ सत्त्वात् तत्रातिव्याप्तिः"**[131] इति ।

तथा च यद्रूपावच्छिन्नविषयतात्वव्यापकं प्रकृतानुमितित्वव्यापकप्रतिबध्यता-निरूपितप्रतिबन्धकतावच्छेदकत्वं तद्रूपावच्छिन्नस्वज्ञानविषयप्रकृतहेतुतावच्छेदक-वत्त्वसम्बन्धावच्छिन्नप्रकारताकयथार्थज्ञानविशेष्यत्वं दुष्टमिति प्रथमलक्षणार्थः पर्यवसितः। ह्रदो वह्निमान् धूमादित्यादौ ह्रदवृत्तित्वविशिष्टवह्न्यभावत्वं आधेयतासम्बन्धेन ह्रदविशिष्टवह्न्यभावत्वं वा यद्रूपपदेनोपादाय तादृशवह्न्यभावत्वावच्छिन्नविषयत्वं यत्र यत्र तत्रैव ह्रदधार्मिकवह्न्यनु-मितिप्रतिबन्धकतावच्छेदकताया आवश्यकतया ह्रदविशिष्टवह्न्यभावत्वावच्छिन्न-विषयतात्वव्यापकत्वस्य प्रकृतानुमितिप्रतिबन्धकतावच्छेदकतायामक्षतत्वात् तादृशवह्न्यभावत्वावच्छिन्नस्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धावच्छिन्नप्र-कारताकवह्रदवृत्तिवह्न्यभाववान् धूम इत्याकारकयथार्थज्ञानविशेष्यताया धूमेऽनपायात् तत्र लक्षणसमन्वय इति । यथा ह्रदत्वावच्छिन्नविषयता-निरूपितवह्न्यभावत्वावच्छिन्नविषयात्वेन बाधात्मकह्रदविशिष्टवह्न्यभावनिष्ठ-प्रकृतानुमितिप्रतिबन्धकतायां तादृशवह्न्यभावत्वावच्छिन्नविषयताया अवच्छेदकत्वं तथा धूमवान् वह्नेरित्यादावपि वह्निनिष्ठधूमाभाववद्वृत्तित्वरूपव्यभिचार-विषयताया अपि तथात्वमित्यनयैव रीत्या व्यभिचारिणि वह्न्यादावपि लक्षणसमन्वयः। पर्वतो वह्निमान् धूमाद् इत्यादिसद्धेतावतिव्याप्तिं वारणाय गदाधरेण भणितम् – **"सद्धेतुस्थले च न केवलवह्न्यभावत्वादिकं तथा, तदवच्छिन्नविषयतासामान्यान्तर्गतधर्म्यविषयकज्ञाननिरूपिततादृशविषयतानामनुमि**

---

[131] सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसमेत), पृ. – ८०-८१

**-तिप्रतिबन्धकतानवच्छेदकत्वात्"**[132] इति । अर्थात् केवलवह्न्यभावत्वावच्छिन्न-विषयतासामान्यान्तर्गतायः पर्वतादिरूपधर्म्यविषयकज्ञाननिरूपितवह्न्यभावत्वावच्छिन्नविषयतायाः प्रकृतानुमितिप्रतिबन्धकतानवच्छेदकत्वादिति ।

ननु केवलवह्न्यभावत्वादेः यद्रूपपदेनोपादानासम्भवेऽपि आधेयतासम्बन्धेन पर्वतविशिष्टवह्न्यभावत्वादिकमेव यद्रूपपदेनोपादाय सद्धेतावतिव्याप्तिः सम्भवतीत्यतः आह गादाधर्याम् – **"पर्वतविशिष्टवह्न्यभावत्वादिविशिष्टश्च न किञ्चिद्वस्तु प्रसिद्धमिति नातिप्रसङ्गः"**[133] इति । अर्थात् पर्वतविशिष्टवह्न्यभावत्वादेरप्रसिद्धतया न तस्य यद्रूपपदेन उपादानं कथमपि सम्भवतीति । केवलपर्वतत्वावच्छिन्नविषयतात्वस्य केवलवह्न्यभावत्वावच्छिन्नविषयतात्वस्य च पर्वतः वह्न्यभावः इत्याद्याकारकज्ञाननिरूपितवह्न्यभावत्वाद्यवच्छिन्नविषयतायामपि सत्त्वात्तत्र च प्रकृतपर्वतादिधर्मिकतादृशानुमितिप्रतिबन्धकतावच्छेदकत्वविरहेण वह्न्यभावत्वावच्छिन्नविषयतात्वव्यापकत्वस्य अनुमितिप्रतिबन्धकतावच्छेदकत्वेऽसत्त्वात् यद्रूपपदेन पर्वतत्ववह्न्यभावत्वादेः धर्तुमशक्यत्वात् । आधेयता पर्वतविशिष्टवह्न्यभावत्वावच्छिन्नविषयतात्वव्यापकस्य प्रकृतानुमितिप्रतिबन्धकतावच्छेदकतायां वर्तमानत्वेऽपि तादृशस्य वस्तुत्वाभावेन अलीकतया तस्यापि यद्रूपपदेनोपादानासम्भवान्न सद्धेतायुक्तलक्षणस्यातिव्याप्तिः सम्भवतीति ।

तृतीयलक्षणस्यापि ज्ञायमानदोषस्य प्रतिबन्धकत्वमभ्युपेत्यैव वक्तव्यतया तस्य व्याख्यान्तरासम्भवादाह गदाधरः, **"तृतीयमपि लक्षणमनयैव रीत्या परिष्कार्यम्"**[134] इति । तथा तृतीयलक्षणस्य दोषलक्षणत्वे यद्रूपावच्छिन्नविषयतासामान्यं प्रकृतानुमितिप्रतिबन्धकतावच्छेदकं तद्रूपवत्त्वमर्थः, दुष्टलक्षणत्वे तु प्रथमलक्षणार्थ एव पर्यवसित इति भावः।

---

132 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५९०

133 तदेव

134 तदेव

ननु सर्वत्रैव दोषविषयकप्रकृतहेतुविषयकसमूहालम्बनज्ञानस्यापि प्रकृतानुमितिप्रतिबन्धकतया प्रकृतानुमितिप्रतिबन्धकयथार्थज्ञानविषयप्रकृतहेतुतावच्छेदकत्वमेव दुष्टत्वं वाच्यमिति दोषज्ञानस्य प्रतिबन्धकत्वसम्भवे दोषाणां प्रतिबन्धकत्वाभिधानम् असंगतमित्याशंकते, **"यद्यपि अस्य दुष्टहेतुलक्षणत्वे ज्ञायमानदोषप्रतिबन्धकतामतानाश्रयणेऽपि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबन्धकप्रमाविषयतद्धेतुतावच्छेदकवत्त्वं तद्रूपावच्छिन्नपक्षसाध्यहेतुकस्थले तेनैव रूपेण दुष्टत्वमित्यर्थकतामुपगम्य यथार्थपदसार्थक्यमुपपादयितुं शक्यते । तथापि दुष्टस्य दोषघटितत्वानुरोधेन तन्मतम् अवलम्ब्य षष्ठीसमास आदृत इति ।"**[135]

ननु द्वितीयतृतीयलक्षणयोर्दोषेऽतिव्याप्तिरव्याप्तिश्च क्वचिद्धेतौ, यत्पदेन दोषस्य एव उपादेयता तत्त्वस्य तन्मात्रवृत्तित्वादिति चेदुच्यते प्रथममात्रस्य दुष्टहेतुलक्षणत्वेनैवोपपत्तौ चरमयोः दोषलक्षणत्वमेव उचितम्, तत्त्वमित्यस्य यथाश्रुतार्थकत्वानुरोधात् ।

'यथार्थ'पदविषये **न्यायरत्नाकरस्य** मतम् –

स्वावच्छेदकसम्बन्धावच्छिन्नस्वावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाधेयतानिरूपितस्वावच्छेदकसम्बन्धावच्छिन्नस्वावच्छेदकावच्छिन्नवत्ताग्रहविरोधितानियामकसम्बन्धावच्छिन्ननिरवच्छिन्नाधिकरणतावद्वृत्तित्वस्वावच्छिन्नाभाववद्वृत्तित्वैदन्यतरस्वनिरूपितत्वैतदुभयसम्बन्धेन प्रकारताविशिष्टविशेष्यत्वानिरूपकत्वं सर्वांशे प्रमात्वमिति प्राहुः ।

अथवा साध्याभाववद्वृत्तित्वं व्यापकसामानाधिकरण्यमिति द्विविधव्याप्तिविरोधितया द्विविधव्यभिचाराङ्गीकारः। तथा च धूमो वह्नेर्व्यभिचारीति भ्रमः साध्याभाववद्वृत्तित्वरूपव्याप्तिग्रहविरोधी । एवम् अभिधेयत्वं प्रमेयत्वस्य व्यभिचारीति भ्रमः व्यापकसामानाधिकरण्यरूपव्याप्तिग्रहविरोधीति द्विविधव्यभिचार-

---

135 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५९०

सङ्ग्रहार्थमुत्तरत्र द्विविधभ्रमग्रहणम् । तथा हि प्रमेयत्वादिसाध्यकस्थले साध्याभाववद्वृत्तित्वरूपव्याप्तेः अप्रसिद्ध्या तत्र साध्यतावच्छेदके हेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकत्वस्य भ्रमः, स च व्यापकसामानाधिकरण्यरूपव्याप्तिग्रहविरोध्यस्ति एव । प्रथमश्च भ्रमः 'पर्वतो वह्न्यभाववान्' इति अनुमितौ विरोधीति भ्रमत्रयसार्थक्यमिति । इत्थमनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् इति प्रथमं हेत्वाभासलक्षणं सम्पन्नमिति ।[136]

अथ भ्रमविषये साध्याभावादावतिव्याप्तिवारणाय यथार्थपदसार्थक्यम् इत्युक्तम् । तन्न युक्तं, तुल्यरीत्या प्रमाविषयेऽपि साध्याभावादावतिव्याप्तिः स्यात् । यथा अनुमितिकारणीभूताभावप्रतियोगि - वह्न्यभाववान् पर्वत् इति भ्रमविषयत्वं वह्न्यभावे वर्तते तथैवानुमितिकारणीभूताभावप्रतियोगि – वह्न्यभाववान् ह्रद इति प्रमाविषयत्वमपि वह्न्यभावे वर्तते । तत्रत्यातिव्याप्तिवारणाय यो हि प्रकारोऽनुष्ठीयते तेनैव भ्रमविषये साध्याभावादेर्हेत्वाभासतापत्तिः स्यात् । तत्र प्रतिबन्धकीभूतप्रमाविषयत्वस्य सत्त्वादतो यथार्थपदाघटितं किमपि लक्षणं करणीयं, तच्च **"यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिविरोधित्वं तत्त्वम्"**[137] इति द्वितीयहेत्वाभावलक्षणं मणिकारैर्निरुक्तमिति ।

---

[136] तत्तदनुमितिकारणीभूततृतीयलिङ्गपरामर्शप्रमात्वनिरूपकव्याप्तिपक्षधर्मतावैशिष्ट्यव्यतिरेक एव हेत्वाभासत्वम् ।

[137] सा.नि.प्र., सम्पा. वामाचरणभट्टाचार्य, पृ. - ०३

# चतुर्थोऽध्यायः

# || चतुर्थोऽध्यायः ||

## द्वितीयहेत्वाभाससामान्यलक्षणविवेकः

**“यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्”**[138] इति तत्त्वचिन्तामणिकारस्य द्वितीयं हेत्वाभाससामान्यलक्षणम् । अस्य लक्षणस्य समन्वयो हि अत्र यत्पदेन दोषो ग्राह्योऽग्रे तत्पदेनापि । एवं च वह्न्यभाववद्ध्रदविषयकत्वेन ह्रदो वह्न्यभाववान् इत्याकारकस्य ज्ञानस्य ह्रदो वह्निमान् इत्याकारकानुमितिं प्रति प्रतिबन्धकत्वात् तत्त्वं वह्न्यभाववद्ध्रदे वर्तते । एवं पर्वतो धूमवान् वह्नेः धूमाभाववद्वृत्तिवह्निरूपव्यभिचारे लक्षणसमन्वयः। यद्विषयकत्वेन धूमाभाववद्वृत्तिवह्निविषयकत्वेन वह्निर्धूमाभाववृत्तिरित्याकारकज्ञानस्य पर्वतो धूमवान् धूमव्याप्यवह्निमान् च इत्याकारकसमूहालम्बनानुमितिं प्रति प्रतिबन्धकत्वात् तत्त्वं धूमाभाववद्वृत्तिवह्निरूपव्यभिचारे वर्तत इति समन्वयः।

## ४.१) ‘लिङ्गमविवक्षितमि’ति कल्पविवेकः -

अत्र यद्विषयकत्वेन ज्ञानस्य अनुमितिप्रतिबन्धकत्वं तत्त्वमित्यस्यैव सम्यक्त्वेन उक्त-

138 सा.नि.प्र., सम्पा. वामाचरणभट्टाचार्य, पृ. – ०३

लक्षणघटकलिङ्गपदं व्यर्थमेव इति दीधितिकारः **'लिङ्गमविवक्षितम्'**[139] इति ग्रन्थेन आशङ्कते। तथा च लिङ्गपदमविवक्षितम् निष्प्रयोजनकत्वाद् इत्यनुमानं पर्यवसितम् इति। तदुक्तं कलाविलासे – **"अत्र विवक्षितत्वमर्थविषयकबोधजनकत्वनिष्ठप्रकारता-निरूपितग्रन्थकारीयेच्छाविशेष्यतावद् यद् यत् तदन्यत्वरूपम्। निष्प्रयोजनकञ्च फलाभावप्रयोज्येच्छाविषयत्वाभाववत्त्वस्वरूपम्"**[140] इति। अत्र शङ्का यदि दीधितिकारेण लिङ्गांशस्य वैयर्थ्यम् इष्यते तर्हि मणिकाराणां न्यूनता स्यादिति। इहैवं समाधानं हि – अत्र लिङ्गांशस्य अतिव्याप्त्यादिदोषवारकत्वेन निवेशः कृतः। किन्तु स्वज्ञानविषयप्रकृतहेतुतावच्छेदकत्वसम्बन्धेन दोषवत्त्वसम्पादनाय लिङ्गांशस्य सार्थकता वक्तुं शक्यते।

अत्रैका शङ्का वर्तते – लिङ्गाज्ज्ञानं लिङ्गज्ञानं इति व्युत्पत्त्या लिङ्गज्ञानशब्देन अनुमितिरित्यर्थो लभ्यते। यतोऽनुमितेर्लिङ्गजन्यज्ञानत्वादिति। एवं च यद्विषयकानुमितित्वं प्रकृतानुमितिप्रतिबन्धकतावच्छेदकं तत्त्वम् इति फलितम्। एतस्मिन् लक्षणेऽनुमितौ अनाहार्यत्वनिश्चयत्वयोः निवेशनीयत्वाभावादिति। यतः अनुमितेः परोक्षत्वात्। अप्रामाण्यज्ञानानास्कन्दित्वमात्रं निवेशनीयमिति लाघवं वर्तते इत्यतः यद्विषयकानुमितित्वं प्रकृतानुमितिप्रतिबन्धकतावच्छेदकं तत्तमित्येव लघुभूतं लक्षणं भवतु, अपि च लिङ्गांशस्य सार्थक्यमपि सम्भवति इति। तद्विलसति कलाविलासे – **"अथ लिङ्गाज्ज्ञानं लिङ्गज्ञानमित्युपपत्त्या लिङ्गजन्यज्ञानपदेनानु-मितेर्लाभात् यद्रूपावच्छिन्नविषयकानुमितित्वव्यापकं प्रकृतानुमितिप्रतिबन्धकत्वं तद्रूपवत्त्वमेव लक्षणमनाहार्यत्वाद्यप्रवेशेन लघुभूतं लभ्यते इति कथं लिङ्गांशस्यानति-प्रयोजनकत्वमुक्तमिति ?"**[141]

---

[139] सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५९०

[140] सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ.- ८८

[141] तदेव

अस्याः शङ्कायाः समाधानं हि – यद्विषयकानुमितित्वं प्रकृतानुमितिप्रतिबन्धकतावच्छेदकं तत्त्वम् इति लक्षणस्य घटोऽवृत्तिरित्यत्र घटवद्रूपबाधेऽव्याप्तिः। वस्तुतः घटोऽवृत्तिरित्यत्र घटवद्विषयकानुमितित्वं घटः अवृत्तिरित्याकारकानुमितिप्रतिबन्धकतावच्छेदकं घटवत्त्वं घटवद्रूपबाधे वर्तते इति लक्षणसमन्वयः कर्तव्यः। किन्तु अनुमितिपदार्थस्य निर्धर्मितावच्छेदकत्वाभावाद् घटवान् इत्याकारिका निर्धर्मितावच्छेदकानुमितिः अप्रसिद्धा इत्यतः प्रकृते यद्विषयकानुमितिपदेन घटवान् इत्याकारकस्य ग्रहणं न भवतीति घटवद्रूपबाधे अव्याप्तिः।

अव्याप्तिमिमां परिहर्तुं घटोऽवृत्तिरित्यादौ घटवद्भूतलस्यैव बाधत्वं स्वीक्रियते। एवं च प्रकृते यद्विषयकानुमितिपदेन घटवद् भूतलं इत्याकारिका स्वीक्रियते, तादृशानुमितित्वं घटोऽवृत्तिरित्यकारिकायाः अनुमितेः प्रतिवन्धकतावच्छेदकं भवतीति नाव्याप्तिः इति । किन्तु अग्रे ह्रदो वह्निमान् इत्यादौ असम्भववारणाय अव्यापकविषयिताशून्यत्वस्य निवेशनीयतया तदनुरोधेन प्रकृतलक्षणस्य उक्तस्थले अव्याप्तिर्भवत्येव । वस्तुतस्तु लक्षणस्वरूपं चेत्थं भवति – यद्रूपावच्छिन्नविषयताव्यापकविषयताशून्या, अथ च यद्रूपावच्छिन्ननिरूपकताक-विषयतावती या अनुमितिः तादृशानुमितित्वं प्रकृतानुमितिप्रतिवन्धकतावच्छेदकं तद्रूपवत्वम् इति । अत एव घटोऽवृत्तिरित्यादौ घटवद्भूतलं इत्याकारकबाधविषयिण्यामनुमितौ, घटवद्भूतलत्वावच्छिन्ननिरूपकताकविषय-तायाः सत्त्वेऽपि, घटवत्त्वावच्छिन्नविषयताव्यापकीभूतभूतलत्वावच्छिन्न-विषयताशून्यत्वस्य असत्त्वात् प्रकृते अव्यापकविषयताशुन्यत्वरूपविशेषणा-क्रान्तानुमितिपदेन भूतलं घटवद् इत्याकारिकायाः स्वीकर्तुमशक्यत्वाद् अव्याप्तिः इति चेन्न, यादृशविशिष्टविषयकत्वव्यपकत्वं प्रकृतानुमितिप्रतिबन्धकतायां निवेश्यते तादृशाविशिष्टविषयकत्वाव्यापकविषयकत्वशून्यत्वमनुमितौ न निवेश्यते । किन्तु

किञ्चिद्रूपावच्छिन्नविषयत्वाव्यापकविषयताशून्यत्वस्यैव निश्चये निवेशः क्रियते । एवञ्च किञ्चिद्रूपावच्छिन्नविषयत्वाव्यापकीभूतविषयताशून्या यद्रूपावच्छिन्ननिरूपकताकविषयतावती च या अनुमितिः तद्वृतानुमितित्वम्, प्रकृतानुमितिप्रतिबन्धकतावच्छेदकं तद्रूपवत्त्वम् इति लक्षणं भवति । तथा च किञ्चिद्रूपावच्छिन्नविषयत्वाव्यापकविषयताशून्या अथ च यद्रूपावच्छिन्ननिरूपकताविषयताश्रयीभूता या अनुमितिः तादृशानुमितिनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसाक्षिकाभावरूपानुमितित्वव्यापकत्वमेव प्रतिबन्धकतायां निवेश्यते इत्यर्थः फलति । 'ह्रदो वह्निमान् धूमाद्' इत्यादौ वह्न्यभाववद्ध्रूपबाधे लक्षणस्य समन्वयः। यद्रूपं वह्न्यभाववद्ध्रदत्वम् तदवच्छिन्ननिरूपकताकविषयताशालि अनुमितिः इत्युक्तौ 'ह्रदः वह्न्यभाववान्' इत्याकारिका तस्यामेव अनुमितौ किञ्चिद्रूपभूतवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयत्वाव्यापकविषयताशून्यत्वं च वर्तते इति कृत्वा तादृशानुमितित्वं ह्रदो वह्निमान् इत्याकारकानुमितिप्रतिबन्धकतावच्छेदकं भवति इति लक्षणसमन्वयः। 'घटः अवृत्तिः' इत्यादौ घटवद्भूतलमादाय लक्षणसमन्वयः। 'भूतलं घटवत्' इत्याकारकानुमितौ घटवत्त्वावच्छिन्नविषयत्वाव्यापकभूतलादिविषयताशून्यत्वस्य अभावेऽपि घटवद्भूतलत्वरूपकिञ्चिद्धर्मावच्छिन्नविषयत्वाव्यापकविषयताशून्यत्वं वर्तते, एवं घटवत्त्वावच्छिन्ननिरूपकताकविषयताश्रयत्वं च वर्तते इत्यतः 'भूतलं घटवत्' इत्याकारकानुमितित्वे 'घटोऽवृत्तिः' इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्य सत्त्वान्नाव्याप्तिः। इत्थं च लिङ्गांशस्य लक्षणे अनाहार्यत्वाद्यनिवेशप्रयुक्तलाघवरूपप्रयोजनं सम्भवत्येव । एवं च लिङ्गमविवक्षितमिति दीधितिकृदभिधानमसङ्गतमेव इति पूर्वपक्षः।

अत्र समाधीयते – यद्रूपावच्छिन्ननिरूपकताकविषयतावतां ततश्च किञ्चिद्रूपा-

वच्छिन्नविषयताशून्या या अनुमितिः तादृशानुमितित्वं प्रकृतानुमितिप्रतिबन्धकताव-च्छेदकम् तद्रूपवत्त्वम् इत्येव लक्षणं भवतु इति चेत् तर्हि 'महानसीयवह्नीतरवह्न्यभाववान् पर्वतः वह्न्यभाववान्' इत्यत्र वह्निमत्महानसीय-वह्नीतरवह्न्यभाववत्पर्वतेऽव्याप्तिः। तथा हि अत्र दोषविषयकानुमितिः च 'महानसीयवह्नीतरवह्न्यभाववान् पर्वतः महानसीयवह्निमान्' इति । अत्र हेतुभूत-परामर्शः 'वह्निव्याप्यधूमवान् महानसीयवह्नीतरवह्न्यभाववान् पर्वतः' इति । तदुत्तरं हि जायमाना अनुमितिः पक्षे पर्वते इतरप्रतियोगिमहानसीयवह्निवैशिष्ट्यावगाहिनी एव भवति । कुतः सा अनुमितिः पर्वते महानसीयवह्नीतरवह्निवैशिष्ट्यं न अवगाहते इति चेत्, अनुमितिहेतुभूतः परामर्शः महानसीयवह्नीतरबाधसहकृतः एव भवतीति कृत्वा दोषविषयकानुमितौ 'महानसीयवह्नीतरवह्न्यभाववान् पर्वतः महानसीयवह्निमान्' इत्याकारिकायां महानसीयवह्निवैशिष्ट्यमेवावगाहते । एवञ्च प्रकृते दोषविषयकानुमितौ दोषतावच्छेदकीभूतमहानसीयवह्निमन्महानसीयवह्नीतरवह्न्यभाववत्पर्वतत्वाव-च्छिन्नविषयतानिरूपितविषयतायाः सत्त्वेऽपि वह्निमत्पर्वतत्वावच्छिन्नविषयत्वा-व्यापकमहानसीयत्वावच्छिन्नविषयताशून्यत्वस्य विरहात् दोषविषयकानुमितिपदेन धर्त्तुं न शक्यते इत्यव्याप्तिर्भवति ।

एतदव्याप्तिवारणं प्रकारान्तरेण क्रियते । तथा हि प्रकृते दोषविषयकानुमितिः 'पर्वतः महानसीयवह्न्यभाववान्' इति बाधकालीनानुमितिरिति स्वीक्रियते तर्हि अनुमितेः स्वरूपं 'पर्वतः वह्निमान्' इत्येव भवति । अस्यामनुमितौ तावन्महा-नसीयत्वावच्छिन्नविषयताशून्यत्वस्य सत्त्वात् लक्षणसमन्वयः इति चेन्न, यत्र एकविशेषेतरबाधस्य पक्षतावच्छेदकता । दोषविषयकानुमितेः प्राक् तद्विशेषस्य न बाधनिश्चयः तत्राव्याप्तिः ।

अत्र कलाविलासकारस्य वचनं स्मरणीयम् – **“एवं वस्तुतः यादृशस्थले यद्दोषविषयिणी अनुमितिः कस्यापि न जाता तत्रत्यदोषे अव्याप्त्यापत्तिरिति अस्मद्गुरुचरणाः”**[142] इति।

अथाव्यापकीभूतविषयिताशून्यत्वस्यावश्यं निवेशनीयतया ह्रदो वह्न्यभाववान् धूमश्चेति निश्चयस्य वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वाव्यापकलिङ्गधूमविषयिताशून्यत्वाभावेन यद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्यलिङ्गविषयकयद्रूपावच्छिन्नविषयिताशालिनिश्चयाप्रसिद्ध्या हेत्वघटितदोषमात्रे अव्याप्तिसम्भवेऽनतिप्रयोजनकत्वकथनमनुचितम् । न च प्रकृतलिङ्गविषयिताभिन्ना या यद्रूपावच्छिन्नविषयित्वव्यापकविषयिता तच्छून्यत्वनिवेशे नासम्भव इति वाच्यम्। ह्रदो वह्निमान् जातेरित्यादौ जातिमान् वह्न्यभाववानिति ज्ञानमादाय बाधाव्याप्तेः।

वस्तुतस्तु अव्यापकीभूतविषयिताशून्यत्वं ज्ञाने न निवेश्यते, अपि तु यद्रूपावच्छिन्नविषयितायामव्यापकीभूतविषयिताशून्यज्ञानत्वोपलक्षितत्वं निवेश्यते । उपलक्षणत्वं च प्रतियोगिव्यधिकरणतदभावाभाववत्त्वम् । तस्य च लिङ्गविषयनिश्चयीवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितायां सत्त्वेन नाव्याप्तिः, लिङ्गविषयकलिङ्गाविषयकसमानाकारज्ञानीयविषयितायाः ऐक्यादसमूहालम्वनवह्न्यभाववान् ह्रद इत्याकारकाव्यापकीभूतविषयिताशून्यज्ञानीयविषयितायाः तादृशसमूहालम्बनेऽपि हि सत्त्वात् ।

ननु लिङ्गांशनिवेशने ह्रदो वह्निमान् वह्निमद्ध्रदादित्यादौ वह्न्यभाववद्ध्रदरूपबाधेऽतिव्याप्तिः, वह्निमद्ध्रदरूपप्रकृतहेतुविषयकतादृशबाधनिश्ययस्याहार्यत्वेनाऽनाहार्यतादृशनिश्चयाप्रसिद्धेः। एवं ह्रदो वह्निमान् जलवद्ध्रदादित्यादौ वह्न्यभाववज्जलवत्यतिव्याप्तिः, हेतुभूतजलवद्

---

[142] सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ.- ८८

ह्रदविषयकवह्न्यभाववज्जलवद्विषयकनिश्चयस्य निश्चयविशिष्टनिश्चयत्वेन प्रकृतानुमितिप्रतिबन्धकत्वादिति चेन्न, लिङ्गतावच्छेदकस्य पर्याप्तेरनिवेशेन शुद्धह्रदत्वस्यापि लिङ्गतावच्छेदकतया तद्विशिष्टविषयकत्वस्य वह्न्यभाववान् ह्रदः ह्रदश्च इत्यनाहार्यनिश्चयेऽपि सत्त्वात् । एवं जलवद्ध्रदादिहेतुके शुद्धह्रदादिविषयकज्ञानमादायैवातिव्याप्त्यभावादिति । यद्वा लिङ्गत्वं केवलान्वयि, एवञ्च दोषात्मकलिङ्गविषयकज्ञानमादाय सर्वत्र लक्षणसमन्वयादित्यवधेयम् ।

ननु लिङ्गांशनिवेशस्य वैयर्थ्यसम्भवे फलाभावप्रयुक्तेच्छाविषयताशून्यत्व-रूपस्य इच्छाधीनेच्छाविषयताशून्यत्वरूपस्य वा निष्प्रयोजकत्वस्य कथनमप्रसङ्गतमिति चेन्न, अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशपक्षे स्वसमा-नाधिकरणप्रकृतसाध्यव्याप्यतावच्छेदकं यत्स्वावच्छिन्नविषयकप्रतीतिविषयता-वच्छेदकं तदवच्छिन्नाविषयकप्रतीतिविषयतानवच्छेदकत्वरूपवैयर्थ्यासम्भवात् । लिङ्गविषयकयद्विषयकनिश्चयवृत्तिभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीति-सिद्धस्य व्यापकतारूपाभावस्य केवलयद्विषयकनिश्चयवृत्तिभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावाघटितत्वात् । तथाहि दोषपदप्रतिपाद्यः दोषेतरभिन्नः प्रकृतानुमितत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावृत्त्यभावीयावच्छेदकत्वनिष्ठप्र-तियोगितानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितभेदनिष्ठावच्छेदकतानिरू-पितवृत्तित्वनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितविषयित्वनि-ष्ठावच्छेदकतानिरूपितलिङ्गविषयकत्वघटितनिरूपकत्वनिष्ठावच्छेदकतानिरूपिताव-च्छेदकत्वनिष्ठावच्छेदकतानिरूपितपर्याप्तिनिष्ठावच्छेदकतानिरूपितानुयोगित्वनिष्ठा-वच्छेदकतानिरूपतावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावद्रूपावच्छिन्नानुयोगिताक-पर्याप्तिकावच्छेदकताकनिरूपकतावत्त्वप्रकृतलक्षणवत्त्वात् । अत्र हेतोः लिङ्गांशं परित्यज्य प्रकृतानुमितित्वव्यपकप्रतिबध्यतानिरूपितप्रतिबन्धकतावृत्तिर्यः तादृश-समुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताकविषयितावद्वृत्ति-भेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितानिरूपित-

परम्परीयावच्छेदकतावद्रूपस्य तादृशत्वेऽपि तद्घटितत्वाभावेन वैयर्थ्याभावात् । तथा चाखण्डाभावघटकतया सार्थक्यमिति ध्येयम् ।

ननु अखण्डाभावघटकतया सार्थक्यसम्भवेऽपि प्रयोजनान्तरविरहेण मूलकृता लिङ्गांशनिवेशः कथं कृत इति चेदुच्यते, सत्यम् । लिङ्गस्य ज्ञानं लिङ्गज्ञानमिति षष्ठीतत्पुरुषाश्रयेण लिङ्गविषयकं ज्ञानं लब्धम्, तद्वृत्तित्वविशिष्टस्य यद्विषयकत्वे अन्वये दोषविषयकत्वमपि ज्ञाने तुल्यवेषिवेद्यतया लभ्यते । एवं एकज्ञानविषयप्रकृत-हेतुतावच्छेदकवत्त्वसम्बन्धेन दोषवत्त्वरूपं दुष्टलक्षणं लभ्यते इति मूले दुष्टनिरूपणं प्रतिज्ञाय तल्लक्षणाकथनमप्रयुक्तन्यूनतानिरासार्थं लिङ्गपदम्, परन्तु लक्षणे तन्निवेशो निष्प्रयोजक इति दीधितिकारस्याभिप्रायः। न चैवं लिङ्गपदसार्थक्यकल्पने प्रथमलक्षणे एव तदुपादानं युक्तं, तस्य दुष्टलक्षणत्वादिति । वस्तुतस्तु प्रथमतृतीयलक्षणापेक्षया द्वितीयलक्षणे एव ग्रन्थकृतो निर्भरत्वादिति । अत्र तात्पर्यदीपिकाकारेण जगदीशस्य मतमुपन्यस्तम् – **"यत्पदेन दोषरूपविषयो धर्तव्यः। यो विषयो यत्रेति यद्विषयकं, तस्य भावी यद्विषयकत्वं, तेन यद्विषयकत्वेन । लिङ्गस्य ज्ञानमिति षष्ठ्यर्थो विषयता; निष्ठत्वं संसर्गः; तेन लिङ्गनिष्ठा या ज्ञाननिष्ठा या ज्ञानविषयता तन्निरूपिता यद्विषयिता (ज्ञाननिष्ठा) प्रकृतानुमितेः प्रतिबन्धकतेत्यादि । तथा च लिङ्गज्ञानवृत्तियन्निष्ठविषयतानिरूपितविषयित्वं प्रकृतसमूहालम्बनानुमिति-त्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकं (यद्विषयकत्वेनेत्यत्र तृतीयाया अवच्छेदकत्वार्थत्वात्) तत्त्वं हेत्वाभासत्वमिति द्वितीयं लक्षणं फलितम् । यद्विषयकेति धूमाभाववद्वृत्तिवह्न्यादिरूपा विषयाः, तादृशं ज्ञानं धूमाभाववद्वृत्तिर्वह्नि-रित्यादिरूपम् । बाधनिश्चयस्य लिङ्गाविषयकत्वेन समूहालम्बनज्ञानमादाय लक्षणसमन्वयः।**

**अविवक्षितमित्यस्य निष्प्रयोजनकमर्थः। निष्प्रयोजनकत्वं च फलानुत्पादप्रयुक्तेच्छाविषयत्वाभावः।**

**न च लिङ्गाज्ज्ञानं लिङ्गज्ञानमिति पञ्चमीतत्पुरुषेण लिङ्गजन्यज्ञानमनुमितिमादाय सर्वत्र लक्षणसमन्वयसम्भवादनाहार्य्यत्वसंशयान्यत्वयोरप्रवेशेन लाघवमेव प्रयोजनमस्तीति वाच्यम्, अनुमितेर्लिङ्गजन्यत्वाभात् स्वज्ञानजन्यत्वरूपपञ्चम्यर्थस्याननुभविकत्वाच्च । अथवा यादृशाङ्कुरविशेषे दोषविषयकानुमितेरप्रसिद्धिस्तादृशस्थलीयदोषेऽव्याप्तिभियैवानुमितिग्राहकलिङ्गपदस्य निष्प्रयोजकत्वाभिधानस्य सम्यक्त्वम् । ननु लिङ्गपदस्य निवेशनीयत्वे यत्र वह्निमद्ध्रदकालीनवह्नेः साध्यत्वं वह्निमद्ध्रदकालीनधूमस्य हेतुत्वं ह्रदस्य च पक्षत्वं तत्र वह्न्यभाववद्ध्रदरूपसाध्याप्रसिद्ध्याद्यात्मकदोषे वह्निमान् वह्निव्याप्यवद्ध्रदादित्यत्र च वह्न्यभाववद्ध्रदरूपदोषेऽव्याप्त्यापत्तिः, निरुक्तदोषविषयकलिङ्गविषयकनिश्चयस्य नियतमेवाहार्य्यत्वेनाप्रतिबन्धकत्वात् । अतिव्याप्तिश्च ह्रदो वह्निमान् जलवद्ध्रदकालीनधूमादित्यादौ वह्न्यभाववज्जलवति, जलावच्छेदेन वह्न्यभाववत्ताज्ञानकालीनजलवद्ध्रदकालीनधूमविषयकज्ञानस्यापि पक्षे वह्न्यनुमितेः प्रतिबन्धकत्वात् । अत एव दोषसम्भवादेव तन्निवेशासम्भवात् कथमुक्तं निष्प्रयोजनकत्वादिति ? सत्यं लिङ्गज्ञानमित्यत्र लिङ्गतावच्छेदकावच्छिन्नविषयताकत्वमनिवेश्य लिङ्गनिष्ठविशेष्यताकत्वस्यैव निवेश्यत्वास् वह्न्यभाववध्रदत्वेन लिङ्गावगाहिज्ञानमादाय लक्षणसमन्वयात्”**[143] इति ।

एवञ्च यद्विषयकानुमितित्वघटितं हेत्वाभासलक्षणमसम्भावितमिति कृत्वा लिङ्गांशस्य सार्थक्याभावात् लिङ्गाशस्य अविवक्षितत्वमेव युक्तमिति । अत एव दीधितिकारस्य अभिधानं युक्तियुक्तमिति ।

## ➢ आचार्ययोर्मतवैशिष्ट्यम् –

जगदीशमतेऽव्यापकविषयताशून्यत्वनिवेशो नास्ति । जातिमान् वह्न्यभाववानिति

[143] सा.नि.जा., पृ. – २५-२६

ज्ञानमादायासम्भववारणाय तु यद्रूपवृत्तिविषयताशालिनिश्चयत्वव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमिति लक्षणं करणीयम् । वृत्तित्वञ्च स्वावच्छेदकतात्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकत्वसम्बन्धेन । तथा च वह्निवह्नित्वाभावाभावत्वह्रदह्रदत्वगतरूपवृत्तिविषयताया जातिमान् वह्न्यभाववानिति ज्ञानेऽसत्त्वान्नोक्तरीत्या दोषः। एवं सति लिङ्गाज्ज्ञानं लिङ्गज्ञानमिति व्युत्पत्त्याऽनुमितेर्लाभे वह्निरवृत्तिरित्यत्र च वह्निमान् पर्वत इत्यनुमितिमादाय (जगदीशमतेऽव्यापकविषयताशून्यत्वस्याप्रवेशात्) लक्षणसमन्वयसम्भवे लिङ्गांशनिवेशस्याविवक्षितत्वकथनं जगदीशमते न सङ्गच्छते।

अत्र तैः जगदीशमते महानसं महानसीयवह्न्यभाववत् महानसीयवह्नीतरवह्न्यभाववन्महानसकालीनधूमादित्यत्र वह्निमन्महानसेऽतिव्याप्तिः प्रदर्शिता । तथाहि वह्निमन्महानसत्वावच्छिन्नविषयताशालिप्रकृतलिङ्गजन्यानुमितिः महानसं महानसीयवह्निमदित्येव न तु वह्निमन्महानसमिति प्रकृतहेतुकुक्षावितरबाधनिश्चयस्य पतितत्वात् । तथा च महानसं महानसीयवह्निमदित्यनुमितित्वव्यापिका प्रकृतानुमितिप्रतिबन्धकताऽस्ति, तद्रूपवत्त्वस्य वह्निमन्महानसे सत्त्वात् । गदाधरमतेऽव्यापकविषयताशून्यत्वस्य निविष्टत्वात् वह्निमत्पर्वतत्वावच्छिन्नविषयत्वाव्यापकविषयताशून्यत्वस्य महानसीयवह्निमन्महानसम् इत्यनुमितौ असत्त्वाद्दोषाभावेऽपि महानसं वह्न्यभाववत् महानसीयवह्नीतरवह्न्यभाववन्महानसकालीनधूमादित्यत्र वह्निमन्महानसरूपबाधेऽव्याप्तिः। तथाहि तत्र प्रकृतहेतुकुक्षावितरबाधनिश्चयस्य पतितत्वेन यद्रूपावच्छिन्नविषयताशालिन्या महानसं महानसीयवह्निमदित्याकारिकाया एवानुमितेः सम्भवेन तत्र च वह्निमन्महानसत्वावच्छिन्नविषयत्वाव्यापकविषयताशून्यत्वस्य सत्त्वाद् अनुमित्यप्रसिद्धिः।

ननु लिङ्गांशे प्रकृतत्वं न निवेश्यते, तथा च वह्निमन्महानसमित्यनुमितेः लभ्यत्वात् तत्र च प्रतिबन्धकत्वासत्त्वात् जगदीशमते नातिव्याप्तिः, प्रतिबन्धकत्वसत्त्वाच्च गदाधरमते नाव्याप्तिरिति चेन्न , तथा सत्यपि महानसीयवह्नीतरवह्न्य-

भाववन्महानसस्य पक्षत्वे निरूक्तदोषयोः सम्भवात् । मैवं , बाधेनेतरबाधस्य दुर्बलत्वम् इति सिद्धान्तः। तथा च महानसं महानसीयवह्न्यभाववदिति बाधनिश्चयकाले वह्निमत्तादृशमहानसत्वावच्छिन्नविषयताशाल्यनुमितिः न महानसीयवह्निमन्महानसमित्याकारिकेत्यव्याप्त्यतिव्याप्त्यभावादिति ।

ननु तत्रानुभवबलान्न काऽप्यनुमितिरिति चेद् भवतु तावत्, तथापि तत्र वह्निमन्महानसवन्महानसमित्याकारकानुमितेर्धर्तुं शक्यतया तस्याः प्रकृतानुमिति प्रत्यप्रतिबन्धकत्वान्नातिव्याप्तिः , प्रतिबन्धकत्वाच्च नाव्याप्तिरिति बोध्यम् ।

ननु तथापि गदाधरमतेऽव्यापकविषयताशून्यत्वस्य निविष्टत्वाद् वह्निमत्तादृशमहानसवन्महानसमित्यनुमितेरतथात्वात् तन्मतेऽव्याप्तिस्तदवस्थैवेति चेन्न, तत्र स्वरूपसम्बन्धावच्छिन्नवह्निमन्महानसत्वावच्छिन्नविधेयतानिरूपित-महानसत्वावच्छिन्नोद्देश्यताशालिभ्रमात्मकानुमितेर्धर्तव्यतया तत्र वह्निमत्तादृश-महानसवन्महानसत्वावच्छिन्नविषयताया असत्त्वात् ।

प्रथमे तैः यत्तु इत्यादिना गदाधरमते वह्निमदनुयोगिकस्वरूपसम्बन्धेन महा-नसीयवह्नीतरवह्न्यभाववत्प्रमेयं वह्न्यभाववद् इत्यत्र तादृशप्रमेयत्वावच्छेदेन वह्न्यभाववत्प्रमेयरूपबाधेऽव्याप्तिः प्रदर्शिता । तथाहि तत्र वह्निमत्तादृशप्रमेयम् इत्यनुमितिः नैव लभ्यते, पक्षकुक्षावितरबाधनिश्चयस्य पतितत्वात् । तदनुरोधेन महानसीयवह्निमत्प्रमेयमित्यनुमितेर्यद्रूपावच्छिन्नविषयशालित्वेऽपि यद्रूपावच्छिन्न-विषयत्वाव्यापकविषयताशून्यत्वाभावान्न साऽपि लभ्यते । नापि वह्निमत्तादृशप्रमेय-वत्प्रमेयमित्यनुमितिस्तत्र सम्भवति वह्निमत्तादृशप्रमेयत्वावच्छिन्नविषयत्वाव्यापि-काया वह्निमत्तादृशप्रमेयवत्प्रमेयत्वावच्छिन्नविषयतायास्तत्र सत्त्वात् । न च पूर्वो-क्तरीत्याऽत्रापि भ्रमः सम्भवति प्रमेयवत्त्वस्य सम्बन्धमात्रेण प्रसिद्धिसम्भवेन भ्रमत्वा-सम्भवात् । इत्थं यद्रूपावच्छिन्नविषयताशाल्यनुमित्यप्रसिद्ध्याऽव्याप्तिः स्यादिति ।

ननु स्वरूपत्वादिना संयोगावगाहिसंयोगेन वह्निमत्तादृशप्रमेयवत्प्रमेयमिति

भ्रमात्मिकाऽनुमितिस्तत्र सम्भवति, तथा च न तत्रानुमित्यप्रसिद्ध्याऽव्याप्तिरिति चेन्न, स्वरूपत्वादिना संयोगावगाहिसंसर्गभ्रममनङ्गीकृत्यैवात्र दोषस्य सम्भवात् ।

ननु तथापि वह्निमत्तादृशप्रमेयत्वेन गुणमभिप्रेत्य तस्य संयोगेन प्रमेये भ्रममादाय तादृशानुमितिः सम्भवतीति चेन्न, तादृशस्यापि भ्रमस्यानङ्गीकारात् ।

एतन्न मनोरमं, संशयाकारानुमितिस्वीकर्तृमतेऽनुमितिपक्षेऽपि संशयमादायासम्भवस्य सम्भवे संशयान्यत्वस्यावश्यं निवेशनीयतया, एवमप्रामाण्यज्ञानास्कन्दितज्ञानमादायासम्भववारणायाप्रामाण्यज्ञानानास्कन्दित्वस्य निवेशनीयतया लाघवानवकाशात् । आहार्यज्ञानव्यावृत्तिः लिङ्गज्ञानजन्यत्वमित्यत्र विनिगमकविशेषाभावात् । किञ्च अप्रामाण्यज्ञानानास्कन्दितत्वसंशयान्यत्वरूपधर्मद्वयविशिष्टे भवता लक्षणा विधेया । अस्माभिस्तु तदपेक्षया लाघवात् प्रतिबन्धकतावच्छेदकीभूताभाववदन्यत्वरूपैकधर्मविशिष्ट एवेति लाघवमेव गमकमस्माकम् । अभाववत्ता चात्र स्वप्रतियोगितादात्म्यस्वप्रतियोगित्ववत्त्वान्यतरसम्बन्धेन । अप्रामाण्यज्ञानास्कन्दितत्वाद्यभावविशिष्टबाधादिज्ञानमेव प्रकृतानुमितिप्रतिबन्धकम् । एवञ्च प्रकृते प्रतिबन्धकतावच्छेदकीभूताभावपदेनाप्रामाण्यज्ञानास्कन्दितत्वाभावः, तद्वत्त्वं स्वप्रतियोगित्ववत्त्वसम्बन्धेन अप्रामाण्यज्ञानास्कन्दितज्ञानेऽस्ति, एवं प्रतिबन्धकतावच्छेदकीभूताभावः – आहार्यभेदः संशयभेदश्च, तद्वत्त्वं स्वप्रतियोगितादात्म्यसम्बन्धेन आहार्ये संशये च वर्तते, तदन्यत्वमनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयेऽस्तीति समन्वयः।

अन्यच्च संशयाकारानुमित्यस्वीकृतमतेऽप्यप्रामाण्यज्ञानास्कन्दितज्ञानमादायासम्भववारणाय ज्ञानपदलक्षणाया आवश्यकतया निरुक्तरीत्या प्रतिबन्धकतावच्छेदकाभाववदन्यत्वविशिष्ट एव तत्करणमुचितमनुगतञ्चेति लिङ्गज्ञानजन्यत्वस्य व्यावर्त्याभावेऽविवक्षित्वकथनमेवोचितम् । अपरञ्च लक्षणाया आवश्यकत्वेऽप्रामाण्यज्ञानाभावविशिष्टानुमितावेव तत्करणे सर्वसामञ्जस्यात्ततोऽप्यनुमितित्वलाभसम्भवा-

ल्लिङ्गमविवक्षितमिति ग्रन्थोक्तं साध्वेव ।

## ४.२) 'यद्विषयकत्व'पदार्थविवेकः –

**'यद्विषयकत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्'**[144] इति हेत्वाभासस्य द्वितीयसामान्यलक्षणे 'यद्विषयकत्वेन' इत्यत्र तृतीयायाः अवच्छेदकत्वमर्थस्तस्य निरूपकत्वसम्बन्धेनानुमितिप्रतिबन्धकत्वेऽन्वयः करणीयः। ज्ञानस्येत्यत्र षष्ठ्या वृत्तित्वमर्थः तस्य वृत्तित्वस्याश्रयतासम्बन्धेन यद्विषयकत्वेऽन्वयः कर्तव्यः। तथा च ज्ञानवृत्तित्वाश्रयो यत् यद्विषयकत्वं तन्निष्ठावच्छेदकतानिरूपिका प्रकृतानुमिति-प्रतिबन्धकता तत्त्वमिति लक्षणार्थः प्राप्यते । तदुक्तं चन्द्रकलायाम् – **"यद्रूपावच्छिन्न-विषयकत्वेन प्रकृतानुमितिप्रतिबन्धकत्वं तद्रूपवत्त्वं हेत्वाभासत्वम्"**[145] इति । अत्र यथाश्रुते 'ह्रदो वह्निमान् धूमाद्' इत्यत्र वह्न्यभाववद्ध्रदरूपे बाधे लक्षणसमन्वयः, 'ह्रदो वह्न्यभाववान्' इत्याकारकज्ञानवृत्तिः यत् वह्न्यभाववद्ध्रदविषयकत्वम्, तन्निष्ठावच्छेदकतानिरूपिका 'ह्रदो वह्निमान्' इत्याकारकानुमितिप्रतिबन्धकता भवतीति तत्त्वं वह्न्यभाववद्ध्रदे वर्तत इति लक्षणसमन्वयः। अत्र यद्विषयकत्वनिष्ठमवच्छेदकत्वं किं व्याप्यव्यापकभावरूपमुतः स्वरूपसम्बन्धरूपं वेत्याशङ्कते । यदि तत्र अवच्छेदकत्वं व्याप्यव्यापकभावरूपमिति स्वीक्रियते तर्हि लक्षणास्वरूपं भवति – यद्विषयकत्वम् प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपित-प्रतिबन्धकत्वाभाववृत्ति तत्त्वमिति । तथा सति सर्वत्र असम्भवः स्यात् । तथाहि विशिष्टं शुद्धह्रदविषयकत्वम् यद्विषयकत्वपदेन गृह्यते । तच्च शुद्धह्रदविषयकत्वं 'ह्रदो

---

144 सा.नि.प्र., सम्पा. वामाचरणभट्टाचार्य, पृ. – ०३

145 सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ. - ९०

वह्निमान्' इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाभाववति 'ह्लदः' इत्याकारकज्ञाने वर्तते इति कृत्वा प्रकृतानुमितिप्रतिबन्धकतानिरूपितं व्याप्यव्यापकभावरूपमवच्छेदकत्वमिति यद्विषयकत्वे न सम्भवतीति तु असम्भवः। एतदसम्भवनिषेधायावच्छेदकत्वं स्वरूपसम्बन्धरूपं यदि स्वीक्रियते तर्हि लक्षणमेवं भवति यद्विषयकत्वं प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकतावत्त्वमिति । एवं च शुद्धह्लदविषयकत्वेऽपि प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वस्य सत्त्वात् लक्षणसमन्वयो भवति ।

एवं स्वरूपसम्बन्धरूपावच्छेदकत्वं निवेश्य असम्भवो निषेधयति चेदपि अतिव्याप्तिर्भवेत् । तथाहि यद्विषयकत्वेन वह्न्यभावविषयकत्वं गृह्यते । तस्य 'पर्वत वह्निमान्' इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितायाः 'पर्वतः वह्न्यभाववान्' इत्याकारकभ्रमनिष्ठप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वस्य सत्त्वात् वह्न्यभावस्य दोषत्वं भवेत् । एतदतिव्याप्तिवारणाय यद्विषयकत्वेऽनुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकतापर्याप्त्यधिकरणत्वस्य निवेशे सर्वत्र असम्भवः स्यात् । वह्न्यभाववद्ध्रदविषयकत्व एव तादृशस्वरूपसम्बन्धरूपपर्याप्तेरभावात्, निश्चयत्वादिष्वपि पर्याप्तेः सत्त्वाच्च । अत एव लक्षणघटकमवच्छेदकत्वं स्वरूपसम्बन्धरूपमिति वक्तुं न शक्यतेऽस्माभिः। परन्तु अनतिरिक्तवृत्तित्वमेव अर्थात् व्याप्यव्यापकभावरूपमिति । तन्निवेशे च पूर्वं विशिष्टशुद्धयोरनतिरेकादसम्भवरूपदोषः प्रसक्तः खलु इति चेदुच्यते अत्र यद्विषयकत्वं नाम यन्निष्ठविषयतानिरूपितविषयिता इत्यर्थः। तत्र यन्निष्ठविषयतायां यद्रूपावच्छिन्नत्वस्यानुपादानेन एवायमसम्भवः प्रसक्तः। तद्वारणाय यद्रूपावच्छिन्नत्वं यन्निष्ठविषयतायां निवेश्यते । तथा च यद्रूपावच्छिन्नविषयतानिरूपितविषयिता प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिः तद्रूपवत्त्वम्

इति लक्षणं पर्यवस्यति । प्रकृते 'ह्रदः' इत्याकारकज्ञाने शुद्धह्रदत्वावच्छिन्नविषयतानिरूपितविषयितायाः सत्त्वेऽपि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतानिरूपितविषयितायाः असत्त्वाल्लक्षणसमन्वय इति । अत्रैको विशेषो वर्तते ।

ननु गदाधरस्य 'शुद्धह्रदत्वावच्छिन्नेऽतिप्रसङ्गाच्चेन्न कल्पे पक्षाघटितसाध्यव्यापकीभूताभावप्रतियोगित्वविशिष्टहेतुरूपासाधारण्येऽव्याप्तिः, निरुक्तासाधारण्यविषयिताया अनुमितिप्रतिबन्धकताशून्यतादृशनिश्चयावृत्तित्वस्य विवक्षितत्वात् । तादृशासाधारण्यज्ञानं यदि पक्षधर्मिकहेतुमत्ताज्ञानकालीनं तदानुमितिप्रतिबन्धकमेव भवतीत्यदोषः।

ननु जातित्वेन ह्रदत्वावगाहिजातिमान् वह्न्यभाववानिति ज्ञाननिषेधाय जगदीशतर्कालंकारेण अव्यापकीभूतविषयिताशून्यत्वं न निवेशितम्, परन्तु गदाधरभट्टाचार्येण निवेशितमनयोः कोऽभिप्राय इति चेन्न, जगदीशनये यादृशसमुदायत्ववृत्तिनिरूपकताकविषयित्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशसमुदायत्वविशिष्टवत्वं लक्षणार्थः। एवञ्च वह्न्यभावविशिष्टह्रदत्वगतसमुदायत्ववृत्तिनिरूपकताकविषयितायाः जातिमान् वह्न्यभाववानिति ज्ञाने विरहान्न तद्भतेऽसम्भवः। भट्टाचार्यनये च यादृशसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताकविषयित्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तीत्यादिरीत्या लक्षणार्थस्य निर्वाच्यतया जातिमान् वह्न्यभाववानिति ज्ञाने जातित्वस्याधिकस्य भानेऽपि वह्न्यभाववद्ध्रदत्वस्य निरूपकतावच्छेदकघटकतया वह्न्यभाववद्ध्रदत्वगतसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपकताकविषयितायाः तत्र सत्त्वाद् असम्भवसंगतिः। न च भट्टाचार्येणापि यादृशसमुदायत्ववृत्तिनिरूपकताकविषयित्वमित्येवं कथं न निवेशितमिति वाच्यम् ? यादृशस्थले घटवद् भूतलमिति ज्ञानं वह्न्यभाववद्ध्रद इति ज्ञानात्मकमेव जायते यदा

च वह्न्यभाववान् ह्रद इति ज्ञानात्मकं तदा घटत्वांशे नियमतः जातित्वावगाह्येव भवति, तत्र घटवद्भूतलेऽतिव्याप्तिः, जगदीशमते तु एतादृशाङ्कुरे प्रमाणाभावान्न कोऽपि दोषः।

ननु ह्रदत्वसामानाधिकरण्येन वह्निसाध्यकस्थले ह्रदत्वव्यापकवह्न्यभावप्रतियोगिकस्वरूपसम्बन्धेन वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयात् कथमसम्भवः? भट्टाचार्यनये एकदेशव्यापकताया अनभ्युपगमेन जातिमान् वह्न्यभाववानिति ज्ञाने ह्रदत्वव्यापकताया अभानात् । न च अभावत्वांशे प्रमेयत्वावगाहिह्रदो वह्नीयप्रमेयवत्त्ववानिति ज्ञानमादायासम्भवसंगतिरिति वाच्यम्, व्यापकतावच्छेदकरूपभेदेन व्यापकताया भिन्नत्वात् वह्न्यभावत्वावच्छिन्नह्रदत्वव्यापकताघटितनिरुक्तबाधविषयितायाः तादृशज्ञानेऽसत्त्वादिति चेन्न, स्वरूपत्वांशे प्रमेयत्वावगाहिह्रदः ह्रदत्वव्यापकवह्न्यभावप्रतियोगिकप्रमेयवता वह्न्यभाववानिति ज्ञानमादायासम्भवसम्भवादिति ।

केचित्तु अवच्छेदावच्छेदेन विशिष्टबुद्धौ उद्देश्यतावच्छेदकतापर्याप्त्यधिकरणधर्मनिरूपितव्यापकत्वमेव संसर्गांशे भासते न तु उद्देश्यतावच्छेदकतावच्छेदकधर्मावच्छिन्नत्वमिति जातित्वेन ह्रदत्वस्यैवोद्देश्यतावच्छेदकतया ह्रदत्वव्यापकवह्न्यभावप्रतियोगिकस्वरूपेण वह्न्यभाववान् जातिमानिति ज्ञानमादायैव असम्भवसम्भव इत्यप्याहुः।

अथ 'यद्विषयकत्वम्' इत्यत्र यत्पदस्य यद्रूपावच्छिन्नपरत्वे यद्रूपपदेन किं ग्राह्यम् ? वह्न्यभाववद्ध्रदत्वं च सामानाधिकरण्यसम्बन्धेन वह्न्यभावविशिष्टह्रदत्वमिति । यतः 'कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यवाचकत्वम्' इति नियमात् । 'ह्रदो वह्निमान्' इत्याकारकानुमितिप्रतिबन्धकं

ज्ञानं भवति स्वरूपसम्बन्धेन वह्न्यभाववैशिष्ट्यावगाहि ह्लदो वह्न्यभाववान् इत्याकारकमेव। तथा च 'ह्लदो वह्निमान्' इत्याकारकानुमितिप्रतिबन्धकत्वाभाववति 'वह्न्यभावविशिष्टह्लदत्ववान्' इत्याकारके निर्धर्मितावच्छेदके ज्ञाने तादृशवह्न्यभाव-विशिष्टह्लदत्वावच्छिन्नविषयतानिरूपितविषयितायाः सत्त्वात् वह्न्यभाववद्ध्रदत्वाव-च्छिन्ननिरूपकताकविषयतायाः प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वं नायातमिति असम्भवः। यदि च यद्रूपपदेन वह्न्यभावह्लदत्वोभयं स्वीक्रियते तदा पुनः असम्भवः स्यात्। कथं हि 'ह्लदो वह्निमान्' इत्याकारकानुमितिप्रतिबन्धकत्वाभाववति वह्न्यभावह्लदत्वोभयप्रकारके वह्न्यभाववान् ह्लदत्ववान् चायमित्याकारकज्ञाने तादृशयद्रूपपदग्राह्यवह्न्यभावह्लदत्वैतदुभयावच्छिन्नविषयतानिरूपितायाः विषयि-तायाः सत्त्वात् । अत एव यद्रूपपदेन सामानाधिकरण्यसम्बन्धेन वह्न्यभावविशिष्टह्लदत्वं, वह्न्यभावह्लदत्वोभयं वा ग्रहीतुं न शक्यते । तर्हि यद्रूपपदेन किं ग्राह्यमित्याशङ्कायां कैश्चित्तु समाधीयते ।

केचित्तु यद्रूपावच्छिन्नविषयतानिरूपितविषयिता नाम यद्रूपावच्छिन्नप्रकारता-निरूपितयद्रूपावच्छिन्नविशेष्यतानिरूपकत्वमित्यर्थः। एवं च यद्रूपावच्छिन्नप्रकारता-निरूपितयद्रूपावच्छिन्नविशेष्यतानिरूपकत्वं प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरू-पितप्रतिबन्धकतानतिरिक्तवृत्तितद्रूपवत्त्वमिति । 'ह्लदो वह्निमान् धूमाद्' इत्यादौ वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः। यद्रूपावच्छिन्नप्रकारतानिरूपितयद्रूपाव-च्छिन्नविशेष्यतानिरूपकत्वं च प्रकृते वह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितह्लदत्वा-वच्छिन्नविशेष्यतानिरूपकत्वमिति । तच्च 'ह्लदो वह्न्यभाववान्' इत्याकारके ज्ञाने हि वर्तते तत्रैव 'ह्लदो वह्निमान्' इत्याकारकानुमितिप्रतिबन्धकत्वमपि वर्तते इति वह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितह्लदत्वावच्छिन्नविशेष्यताकत्वव्यापकत्वं प्रकृ-तानुमितिप्रतिबन्धकतायां सम्भवतीति लक्षणसमन्वयः। तदसत्, 'घटो न द्रव्यम्' इत्यत्र

स्वरूपतः द्रव्यत्वावगाहि घटः द्रव्यमित्याकारकज्ञानविषये शुद्धद्रव्यत्ववद्घटेऽव्याप्तिः स्यात् । कथं हि यद्रूपावच्छिन्नप्रकारतानिरूपितयद्रूपावच्छिन्नविशेष्यता इत्यनेन द्रव्यत्वनिष्ठप्रकारता स्वीकर्तुं न शक्यते । यस्मात् स्वरूपतः द्रव्यत्वावगाहि 'घटो द्रव्यम्' इति ज्ञानीयप्रकारतायाः द्रव्यत्वनिष्ठाया निरवच्छिन्नत्वात् । एवञ्च शुद्धद्रव्यत्वविशिष्टघटविषयकज्ञाने द्रव्यत्वावच्छिन्नद्रव्यत्वनिष्ठप्रकारतानिरूपितघट-त्वावच्छिन्नविशेष्यतानिरूपकत्वं नास्ति इत्यव्याप्तिः स्यात् । अत एव उक्तरूपं यद्विषयकत्वमित्यनेन निर्वक्तुं न शक्यते ।

प्रकारान्तरेण केषाञ्चित्समाधानं वक्ष्यते – 'ह्रदो वह्निमान् धूमाद्' इत्यत्र यद्रूपपदेन वह्न्यभावधर्मितावच्छेदकताविशिष्टह्रदत्वादिकं ग्राह्यम् । ज्ञाननिष्ठविषयि-तायां वह्न्यभावधर्मितावच्छेदकताविशिष्टह्रदत्वावच्छिन्नत्वं निवेशनीयमिति । वह्न्यभावधर्मितावच्छेदकताविशिष्टह्रदत्वावच्छिन्नत्वं च वह्न्यभावधर्मितावच्छेद-कतानिरूपितस्वनिरूपकतावच्छेदकताकत्वम् । एवञ्च वह्न्यभावधर्मितावच्छेदकता-निरूपितस्वनिरूपकतावच्छेदकताका या विषयिता, तद्व्यापिका प्रकृतानुमिति-प्रतिबन्धकता तद्वत्त्वमिति लक्षणं पर्यवसितम् । 'ह्रदो वह्न्यभाववान्' इत्याकारके ज्ञाने एव उक्तविषयिता सम्भवति । तथा हि 'ह्रदो वह्न्यभाववान्' इति ज्ञाने प्रकारः वह्न्यभावः, तद्धर्मि ह्रदः तद्धर्मितावच्छेदकता ह्रदत्वे तत्रैव स्वनिरूपकतावच्छेदकतापि सम्भवति (स्वं – 'ह्रदो वह्न्यभाववान्' इत्याकारकज्ञाननिष्ठविषयिता तन्निरूपकता ह्रदनिष्ठा, तदवच्छेदकता ह्रदत्वे इति) ह्रदत्वे विद्यमानयोः द्वयोः वह्न्यभावधर्मितावच्छेदकतास्वनिरूपकतावच्छेदकतयोः निरूप्यनिरूपकभावः स्वीक्रियते । एवं च वह्न्यभावधर्मितावच्छेदकतानिरूपिता या स्वनिरूपतावच्छेदकता ह्रदत्वनिष्ठावच्छेदकता, तन्निरूपकविषयितावद् यद्

ज्ञानमित्युक्तौ 'ह्रदो वह्न्यभाववान्' इत्याकारकमेव भवति । कारणमेव अस्मिन्नेव ज्ञाने वह्न्यभावधर्मितावच्छेदकत्वं ह्रदत्वे सम्भवति । न हि 'वह्न्यभावविशिष्टह्रदत्ववान् अयम्' इत्याकारके ज्ञाने । यतस्तत्र ह्रदत्वस्यापि प्रकारत्वात्। तस्मिन्नेव 'ह्रदो वह्न्यभाववान्' इत्याकारके ज्ञानेऽनुमितिप्रतिबन्धकत्वस्य सत्त्वाल्लक्षणसमन्वयः। प्रकारोऽयं तावत् – यथा वा एकस्मिन्नेव ज्ञाने वर्तमानयोः प्रकारताविशेष्यतयोः निरूप्यनिरूपकभावः स्वीकृतस्तथा प्रकृते एकत्र विद्यमानयोः धर्मितावच्छेदकतास्वनिरूपकताव-च्छेदकतयोरपि निरूप्यनिरूपकभावोऽभ्युपगम्यते । तन्मतानुसारं प्रकृते लक्षणसमन्वयः कृत इति विशेषोऽस्ति ।

अत्र प्रकारान्तरेण वलदेवाचार्यैः 'यद्विषयकत्व'परिष्कारः क्रियते । यद्विषयकत्वं च यद्रूपावच्छिन्ननिरूपकताकविषयत्वमिति । तच्च यादृशसमुदायवृत्तिसमुदायत्वाव-च्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपकताकविषयत्वस्वरूपम् । अत्र जगदीशमतं हि – **"यद्विषयकत्वं च यादृशसमुदायत्ववृत्तिनिरूपकताकविषयित्वम्"** इति । एवञ्च यादृशसमुदायवृत्तिसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकाव-च्छेदकताकनिरूपकताकविषयताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरू-पितप्रतिबन्धकता तादृशसमुदायवृत्तिसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकाव-च्छेदकताकनिरूपकतावत्त्वम् इति लक्षणार्थः पर्यवसितः। 'ह्रदो वह्निमान् धूमाद्' इत्यत्र वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः। तथा हि यादृशसमुदायः – वह्न्यभाववद्ध्रदः तद्वृत्तिसमुदायत्वं च वह्निवह्नित्वाभावाभावत्वह्रदह्रदत्व-गतसमुदायत्वम् । एतच्च 'ह्रदो वह्न्यभाववान्' इत्याकारकज्ञाननिष्ठविषयिता-निरूपितविषयितावच्छेदकतापर्याप्तिकानुयोगितावच्छेदकं भवतीति कृत्वा तादृशवह्निवह्नित्वाभावाभावत्वह्रदह्रदत्वगतसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्ति

-कावच्छेदकताका या वह्न्यभाववद्ध्रदनिष्ठविषयता तन्निरूपितविषयिता ह्रदो वह्न्यभाववान् इत्याकारके ज्ञाने वर्तते । तत्रैव प्रकृत'ह्रदो वह्निमान्' इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता वर्तते । तादृश-समुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकतावत्त्वं वह्न्यभाव-वद्ध्रदे वर्तते इति लक्षणसमन्वयः।

अत्र यादृशसमुदायवृत्तिसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकता-कविषयतानिरूपितविषयित्वं 'ह्रदो वह्न्यभाववान्' इत्याकारकज्ञाने एव स्वीक्रियते । न हि 'सामानाधिकरण्येन वह्न्यभावविशिष्टह्रदत्ववान्' इत्याकारकज्ञाने 'वह्न्यभाव-ह्रदत्ववान्' इत्याकारकज्ञाने वा स्वीक्रियते । यदि तत्र 'वह्न्यभावह्रदत्ववान्' सामाना-धिकरण्येन वह्न्यभावविशिष्टह्रदत्ववान् इत्याकारकज्ञाने वा उक्तरूपं स्यात्तर्हि तदुत्तरं वह्न्यभावविशिष्टह्रदविषयकज्ञानवान् अहमित्याकारकानुव्यवसायः स्यात् । किन्तु न जायते तदुत्तरं तथानुव्यवसायः। एवञ्च उक्तज्ञानयोः उक्तरूपस्याभावान्न असम्भवः।

संसर्गविधया निवेशस्तु प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रति-बन्धकतावृत्तिरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकतावत्त्वम् । रूपे प्रतिबन्धकतावृत्तित्वं च स्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताक-विषयितासामानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेद-कताकभेदवत्त्वसम्बन्धेन । 'ह्रदो वह्निमान् धूमाद्' इत्यत्र तादृशरूपं च वह्निवह्नित्वाभावत्वह्रदह्रदत्वगतसमुदायत्वमेव ।

## ४.३) 'अव्यापकविषयिताशून्यत्वनिवेश'कल्पविवेकः -

अनुमितिर्द्विविधा पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन च ।

तथा च प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वे सति प्रकृतसाध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारता या अनुमितिः तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता यद्रूपावच्छिन्नविषयितानिरूपितविषयित्वव्यापिका तद्रूपवत्त्वम् इति हेत्वभासलक्षणमिति पर्यवसितम् । लक्षणस्यासम्भवः इत्याकांक्षते । कथं हि ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववद् ह्रदत्वावच्छिन्नविषयतानिरूपितविषयिता जातित्वेन ह्रदत्वावगाहिनि जातिमान् वह्न्यभाववान् इत्याकारकज्ञानेऽपि अस्ति । तत्र प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायाः विरहात् असम्भवः। यतः निरवच्छिन्नह्रदत्वनिष्ठावच्छेदकताकविशेष्यताकां 'ह्रदो वह्निमान्' इत्याकारानुमितिं प्रति निरवच्छिन्नह्रदत्वनिष्ठावच्छेदकताविशेष्यताकस्य ह्रदो वह्न्यभाववान् इत्याकारकस्य निश्चयस्यैव प्रतिबन्धकत्वात् । एतदसम्भववारणाय निश्चये पक्षतावच्छेदकनिष्ठविशेष्यतानिरूपिप्रकारताशून्यत्वरूपं विशेषणं देयम् । तथा च जातित्वेन ह्रदत्वावगाहिनि जातिमान् वह्न्यभाववान् इत्याकारकनिश्चये वह्न्यभाववद् ह्रदत्वावच्छिन्नविषयतानिरूपितविषयितायाः सत्त्वेऽपि पक्षतावच्छेदकीभूतह्रदत्वनिष्ठविशेष्यतानिरूपितजातित्वनिष्प्रकारताशून्यत्वविरहात् स जातिमान् वह्न्यभाववान् इत्याकारकनिश्चयम् एव स्वीकर्तुं न शक्यते । अपि तु ह्रदः वह्न्यभाववान् इत्याकारकनिश्चय एव स्वीकर्तुं शक्यः। यतः अस्मिन्नेव निश्चये वह्न्यभाववद् ह्रदत्वावच्छिन्नविषयतानिरूपितविषयितायाः ह्रदत्वनिष्ठविशेष्यतानिरूपितजातित्वनिष्ठप्रकारताशून्यत्वस्य च सत्त्वात् । अतः तादृशनिश्चयान्तर्भावेन प्रकृतह्रदपक्षताकवह्निसाध्यकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वस्य सत्त्वात् लक्षणसमन्वयः। एवं रीत्या निश्चये पक्षतावच्छेदकनिष्ठविशेष्यतानिरूपितप्रकारताशून्यत्वं निवेश्य समन्वयः क्रियते चेत् जलवत्पक्षकवह्निसाध्यकधूमहेतुकस्थलीयवह्न्यभाववद् जलवद्रूपबाधेऽतिव्याप्तिः स्यात् । वस्तुतः अत्र एवं समन्वयः करणीयः । तथाहि – वह्न्यभाववद् जलवत्त्वावच्छिन्नविषयता-

निरूपितविषयिताव्यापकत्वं जलवान् वह्न्यभाववान् इत्याकारकनिश्चयान्तर्भावेण जलवान् वह्निमान् वह्निव्याप्यधूमवान् च इत्याकारकानुमितित्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकतायां सम्भवतीति लक्षणसमन्वयः कार्यः। किन्तु अव्याप्तिः सम्भवति । कथं हि – जलवान् वह्न्यभाववान् इत्याकारकनिश्चये वह्न्यभाववज्जलावच्छिन्नविषयतानिरूपितविषयितायाः सत्त्वेऽपि पक्षतावच्छेदक-निष्ठविशेष्यतानिरूपितप्रकारताशून्यत्वविरहात् निश्चयपदेन निश्चयः अयं ग्रहीतुमशक्यतया अव्याप्तिः। निश्चयेऽस्मिन् पक्षतावच्छेदकीभूतजलनिष्ठ-विशेष्यतानिरूपितजलत्वनिष्ठप्रकारतायाः एव सत्त्वात् इदमव्याप्त्यभिधानं कृतम् । एवं ह्रदो वह्निमान् ह्रदत्वात् इत्यादौ वह्निभाववद्वृत्तिह्रदत्वरूपव्यभिचारे अव्याप्तिः। कथमित्युक्ते ह्रदत्वं वह्न्यभाववद् वृत्ति इत्याकारकनिश्चये वह्न्यभाववद् वृत्तिह्रदत्वावच्छिन्नविषयतानिरूपितप्रकारताविषयितायाः सत्त्वेऽपि पक्षताव-च्छेदकीभूतह्रदत्वनिष्ठविशेष्यतानिरूपितप्रकारताशून्यत्वस्याभावात् निश्चयपदेन ह्रदत्वं वह्न्यभाववद्वृत्तीत्याकारकनिश्चयस्य धर्तुम् अशक्यत्वात् ह्रदपक्षकवह्निसाध्यकह्रदत्वहेतुकस्थलीये वह्न्यभाववद्वृत्तिह्रदत्वरूपव्यभिचारे अव्याप्तिः स्यात्। यतः ह्रदत्वं वह्न्यभाववद्वृत्तीत्याकारकनिश्चये प्रकृते पक्षतावच्छेदकीभूतह्रदत्वनिष्ठविशेष्यतानिरूपितह्रदत्वनिष्ठप्रकारतायाः एव सत्त्वात् । अतः उभयत्रापि अव्याप्त्यात्मकदोषवारणाय निश्चये अवच्छेदकत्व-सम्बन्धावच्छिन्नपक्षतावच्छेदकत्वावच्छिन्नप्रतियोगिताकाभाववद्धर्मनिष्ठप्रकारतानि-रूपितपक्षतावच्छेदकनिष्ठविशेष्यताशून्यत्वं निवेश्यते । तथा च लक्षणस्वरूपम् इत्थं भवति अवच्छेदकत्वसम्बन्धावच्छिन्नपक्षतावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताका-भाववान् यो धर्मः तादृशधर्मनिष्ठप्रकारतानिरूपितपक्षतावच्छेदकनिष्ठविशेष्यता-शून्यनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयतानिरूपितविषयिताव्यापकप्रकृतानुमि-तिव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वम् इति । जलवान् वह्निमानित्यादौ वह्न्यभाववज्जलवद्रूपबाधे लक्षणस्य समन्वयः। अवच्छेदकत्वसम्बन्धावच्छिन्नपक्षतावच्छेदकत्वाभाववान् यः धर्मः इत्युक्तौ न हि

जलत्वं भवति । अपि तु द्रव्यत्वादिकं तन्निष्ठप्रकारतानिरूपितविशेष्यताशून्यः यः निश्चयः इत्युक्तौ जलवान् वह्न्यभाववान् इत्याकारकनिश्चयः। तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपभूतवह्न्यभाववज्जलवत्त्वावच्छिन्नविषयितानिरूपित -विषयिताव्यापिका जलवान् वह्निमान् वह्निव्याप्यधूमवान् च इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धता भवतीति लक्षण-समन्वयः।

एवं ह्रदो वह्निमान् ह्रदत्वादित्यत्र अवच्छेदकत्वसम्बन्धावच्छिन्न-पक्षतावच्छेदकत्वाभाववान् यो धर्मः इत्युक्तौ न हि ह्रदत्वं भवति । यतो ह्रदत्वे अवच्छेदकत्वसम्बन्धेन पक्षतावच्छेदकत्वस्यैव सत्त्वात् । किन्तु पूर्वोक्तरीत्या द्रव्यत्वादिकमेव। तन्निष्ठप्रकारतानिरूपितविशेष्यताशून्यः निश्चयः ह्रदत्वं वह्न्यभाववद्वृत्तीत्याकारकः भवति । तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपभूतवह्न्य-भाववद्वृत्तिह्रदत्वावच्छिन्नविषयतानिरूपितविषयिताव्यापिका प्रकृतह्रदः वह्निमान् वह्न्यव्याप्यह्रदत्ववान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रति-बन्धकता भवतीति नाव्याप्तिः।

किन्तु एवं रीत्या निवेशेऽपि ह्रदः वह्निमान् ह्रदत्वाद् इत्यादौ अव्याप्तिः सम्भवत्येव । तथाहि अवच्छेदकत्वसम्बन्धावच्छिन्नपक्षतावच्छेदकत्वत्वावच्छिन्न-प्रतियोगिताकाभाववान् यो धर्मो वह्न्यभाववद्वृत्तित्वं भवति । तन्निष्ठप्रकारतानिरूपितविशेष्यताशून्यो यो निश्चय इत्युक्तौ व्यभिचारविषयको ह्रदत्वं वह्न्यभाववद्वृत्तीत्याकारकनिश्चयः न भवतीति लक्षणगमनासम्भवाद् अव्याप्तिः। अतः एतादृशपक्षतावच्छेदकाद्यंशे अन्याप्रकारकत्वनिवेशस्तु न सम्भवति।

एतादृशस्थलेऽव्याप्तिवारणाय निश्चये दोषपदार्थाघटकपदार्थाविषयकत्वं विशेषणीयम्। तथा च लक्षणमेवं भवति विशिष्टदोषपदार्थाघटकपदार्था-विषयकनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयतानिरूपितविषयित्वव्यापिका प्रकृ-तानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वम् इति । ह्रदो

वह्निमान् धूमादित्यत्र वह्न्यभाववद् ह्रदरूपबाधे लक्षणसमन्वयः। कथं हि विशिष्टः दोषः— वह्न्यभावविशिष्टह्रदः तदघटकपदार्थः इत्युक्तौ जलत्वादिकं भवति तदविषयकत्वं ह्रदः वह्न्यभाववान् इत्याकारकनिश्चये वर्तते । तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपभूतवह्न्यभाववद्ह्रदत्वावच्छिन्नविषयतानिरूपितवि-षयित्वव्यापकत्वं प्रकृत ह्रदो वह्निमान् इत्याकारकानुमितित्वव्यापक-प्रतिबध्यतानिरूपितायां प्रतिबन्धकतायां वर्तते इत्यतः तद्रूपवत्त्वं वह्न्यभाववद् ह्रदे वर्तते इति समन्वयः। एवं जलवत्पक्षकवह्निसाध्यकधूमहेतुकस्थलीये वह्न्यभाववज्जलवद्रूपबाधे लक्षणसमन्वयः। कथमित्युक्ते विशिष्टपदार्थः वह्न्यभावविशिष्टजलवदात्मकः पदार्थः तदघटकपदार्थः जातित्वादिकं तद्विषयको यो निश्चयः जलवान् वह्न्यभाववान् इत्याकारको भवति । तादृशनिश्चयवृत्तित्व-विशिष्टयद्रूपभूतवह्न्यभाववज्जलवत्त्वावच्छिन्नविषयतानिरूपितविषयिताव्यापकत्वं जलवान् वह्निमान् वह्निव्याप्यधूमवान् च इत्याकारकानुमितित्वव्यापक-प्रतिबध्यतानिरूपितायां प्रतिबन्धकतायां सम्भवतीति वह्न्यभाववज्जलवद्रूपबाधे लक्षणसमन्वयः।

एवं ह्रदो वह्निमान् ह्रदत्वादित्यत्र वह्न्यभाववद्वृत्तिह्रदत्वरूपव्यभिचारेऽपि नाव्याप्तिः। तथा हि विशिष्टः दोषपदार्थः इत्युक्तौ प्रकृते वह्न्यभाववद्वृत्तित्वविशिष्टं ह्रदत्वं तदघटकः पदार्थः जलत्वादिकं तदविषयकत्वं ह्रदत्वं वह्न्यभाववद्वृत्तीत्याकारके निश्चये भवति । तादृशनिश्चयवृत्तित्वविशिष्ट-यद्रूपभूतवह्न्यभाववद्वृत्तिह्रदत्वावच्छिन्नविषयितानिरूपितविषयिताव्यापिका ह्रदः वह्निमान् वह्निव्याप्यह्रदत्वान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपित-प्रतिबन्धकता भवतीति नाव्याप्तिः।

किन्तु तथापि सर्वं गगनवत् प्रमेयत्वादित्यादौ गगनाभाववत्सर्वरूपबाधे अव्याप्तिः। कथमिति चेत् विशिष्टपदार्थः गगनाभावविशिष्टसर्वं भवति तदघटकस्यैव अप्रसिद्धत्वात् प्रकृतबाधेऽव्याप्तिः। एतदव्याप्तिवारणाय यद्यद्रूपावच्छिन्नस्य यस्य

यादृशविशिष्टघटकता तत्तद्रूपावच्छिन्नं तत्तन्निष्ठविषयताभिन्नविषयताशून्यत्वं निश्चये निवेशनीयम् । ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभावविशिष्टह्रदरूपबाधे लक्षणसमन्वयः। तथा हि यद्यद्रूपावच्छिन्नस्य यस्य यस्य वह्नित्वावच्छिन्नस्य वह्नेः अभावत्वावच्छिन्नस्य अभावस्य ह्रदत्वावच्छिन्नस्य ह्रदस्य वह्न्यभावविशिष्टह्रदात्मक-दोषघटकता तत्तद्रूपावच्छिन्नं तत्तन्निष्ठविषयतावह्नित्वावच्छिन्नविषयता अभावत्वा-वच्छिन्नविषयता ह्रदत्वावच्छिन्नविषयता तादृशविषयाभेदकूटवती या विषयता जातित्वावच्छिन्नविषयता तन्निरूपितविषयिताशून्यो यो निश्चय इत्युक्तौ जातिमान् वह्न्यभाववान् इत्याकारकः न भवति। अपि तु ह्रदो वह्न्यभाववानित्याकारिका एव भवति । तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपभूतवह्न्यभाववद् ह्रदत्वावच्छिन्नविषयता-निरूपितविषयित्वव्यापकत्वस्य प्रकृतानुमितिनिरूपितायां प्रतिबन्धकतायां सत्त्वाल्लक्षणसमन्वयः।

एवं सर्वपक्षकगगनसाध्यकप्रमेयत्वहेतुकस्थलीये गगनाभाववत्सर्वरूपबाधेऽपि नाव्याप्तिः। कथमित्युक्ते यद्यद्रूपावच्छिन्नस्य यस्य यस्य गगनत्वावच्छिन्नस्य गगनस्य अभावत्वावच्छिन्नस्य अभावस्य सर्वत्वावच्छिन्नस्य गगनाभाववत्सर्वरूपदोषघटकता भवति । तत्तद्रूपावच्छिन्नतत्तनिष्ठविषयता गगनत्वावच्छिन्नविषयता अभावत्वाच्छिन्नविषयता सर्वत्वावच्छिन्नविषयता । तादृशविषयताभेदकूटवति या विषयता इत्युक्तौ घटत्वाद्यावच्छिन्नविषयता भवति। तादृशविषयताशून्यनिश्चयः सर्वं गगनाभाववत् इत्याकारको भवति। तादृशनिश्चयवृत्तित्वविशिष्टगगनाभाववत्सर्वत्वा-वच्छिन्नविषयतानिरूपितविषयिताव्यापिका सर्वं गगनवत् गगनव्याप्यप्रमेयत्ववत् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता भवति इति नाव्याप्तिः। एवञ्च यद्यद्रूपावच्छिन्नस्य यस्य यस्य यादृशविशिष्टघटकता तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयताभिन्नयत्किञ्चिदवच्छिन्नविषयताशून्यानाहार्याप्रामा-ण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयतानिरूपितविषयित्वव्या-पिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्वमिति

हेत्वाभाससामान्यलक्षणमिति पर्यवसितम् । अतः एतदेव लक्षणं भवतु इति चेत् तन्न मनोरमम् । यतः ह्रदो जात्यभाववान् जलादित्यादौ जातिमान् ह्रदादिरूपबाधादौ अव्याप्तेः। तथा हि जातित्वाच्छिन्नह्रदत्वस्य जातिमद्ध्रदात्मकविशिष्टघटकत्वात् जातित्वावच्छिन्नजातिनिष्ठविषयताभिन्ना या विषयता इत्युक्तौ सा घटत्वावच्छिन्नविषयता न हि जातित्वावच्छिन्नजातिनिष्ठविषयता । यतः स्वस्मिन् स्वभेदस्य असत्त्वात् । तादृशघटत्वावच्छिन्नविषयताशून्यत्वं यथा वा ह्रदः जातिमान् इत्याकारकनिश्चये वर्तते तथैव जातिमान् जातिमान् इत्याकारकनिश्चयेऽपि वर्तते । तत्र न हि प्रकृतह्रदो जात्यभाववान् जात्यभावव्याप्यजलवान् च इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता वर्तते इति अव्याप्तिः स्यात् । अतः पूर्वोक्तनिवेशस्तु न युक्त इति ।

यद्यद्रूपावच्छिन्नस्य यस्येति कल्पे केषाञ्चित् दलानां सार्थक्यं कथ्यते । अत्र यद्यद्रूपावच्छिन्नस्येति वीप्सायाः विवक्षा न क्रियते चेत् तर्हि यद्रूपावच्छिन्नस्य यादृशविशिष्टघटकता तद्रूपावच्छिन्नविषयताभिन्नकिञ्चिदवच्छिन्नविषयताशून्यत्वं ज्ञाने निवेशनीयम् भवति । तथा सति ह्रदो वह्निमान् धूमादित्यादावसम्भवः स्यात् । तथा हि वह्नित्वावच्छिन्नविषयताभिन्नह्रदत्वावच्छिन्नविषयताशून्यत्वस्य ह्रदो वह्न्यभाववान् इत्याकारकज्ञाने विरहेण असम्भवः। अतः वीप्सायाः निवेशः कृतः। एवं यद्यद्रूपावच्छिन्नस्य इत्यनुक्तौ सर्वं गगनवत् वाच्यत्वादित्यत्र गगनाभाववत्सर्वस्यैव विशिष्टघटकत्वात् तद्विषयताभिन्नविषयतायाः अप्रसिद्धिः भवतीति कृत्वा गगनाभाववत्सर्वरूपबाधेऽव्याप्तिः। अतस्तद्वारणाय यद्यद्रूपावच्छिन्नस्य इत्यस्य निवेशः कार्यः।

ह्रदो जात्यभाववान् इत्यत्र जातिमद्ध्रदरूपबाधसंग्रहाय अव्यापकविषयता-शून्यत्वरूपविशेषणं निश्चये निवेश्यते । तथा च लक्षणस्वरूपमेवं यद्रूपावच्छिन्नविषयतानिरूपितविषयितात्वं यद्रूपावच्छिन्नविषयितानिरूपितविष-यितासमानाधिकरणाभावीयप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयितानिरूपित-

विषयिताशून्या नाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्न-विषयतानिरूपितविषयिताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपित-प्रतिबन्धकता तद्रूपवत्त्वं हेत्वाभासत्वमिति पर्यवसितम् । प्रथमतः ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः। तथा हि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतानिरूपितविषयितासमानाधिकरणः यः अभावः इत्युक्तौ वह्न्यभाववज्जातिमत्त्वावच्छिन्नविषयतानिरूपितविषयित्वं नास्ति इत्याकारकप्रतीतिसिद्धः वह्न्यभाववज्जातिमत्त्वावच्छिन्नविषयितानिरूपित-विषयित्वाभावः। तादृशाभावप्रतियोगितावच्छेदकं यद्रूपभूतवह्न्यभाववज्जातिमत्त्वा-वच्छिन्नविषयतानिरूपितविषयितात्वं भवति । तद्रूपभूतं यत् वह्न्यभाववज्जातिमत्त्वं तदवच्छिन्नविषयतानिरूपितविषयिताशून्यो यो निश्चय इत्युक्तौ । जातिमान् वह्न्यभाववान् इत्याकारको हि न भवति । अपि तु ह्रदो वह्न्यभाववान् इत्याकारकनिश्चयः। तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपभूतवह्न्यभाववद्ध्रदत्वावच्छि-न्नविषयतानिरूपितविषयित्वव्यापिका प्रकृतो ह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता भवतीत्यतः तद्रूप-वत्त्वं वह्न्यभाववद्ध्रदे वर्तते इति लक्षणसमन्वयः।

ह्रदो जात्यभाववान् इत्यादौ जातिमद्ध्रदत्वावच्छिन्नविषयतानिरूपित-विषयिताधिकरणे ह्रदः जातिमान् इत्याकारकनिश्चये वर्तमानो योऽभाव इत्युक्तौ जातिमज्जातिमत्त्वावच्छिन्नविषयतानिरूपितविषयितायाः अभावो भवति । तादृशा-भावप्रतियोगिवच्छेदकं यद्रूपभूतजातिमज्जातिमत्त्वावच्छिन्नविषयतानिरूपितविष-यितात्वं भवति । तद्रूपवत्त्वं यत् जातिमज्जातिमत्त्वं तदवच्छिन्नविषयता-निरूपितविषयिताशून्यो यो निश्चय इत्युक्तौ न हि जातिमान् इत्याकारकोऽपि तु ह्रदो जातिमान् इत्याकारको निश्चयो भवति । तादृशनिश्चयवृत्तित्व-विशिष्टयद्रूपभूतजातिमद्ध्रदत्वावच्छिन्नविषयितानिरूपितविषयिताव्यापकत्वं प्रकृतः ह्रदो जात्यभाववान् जात्यभावव्याप्यजलवान् चेत्याकारकानुमितित्वव्यापकप्रति-

बध्यतानिरूपितायां प्रतिबन्धकतायां सत्त्वात् तद्रूपवत्त्वं जातिमद्ध्रदरूपबाधे लक्षणसमन्वय इति ।

अव्यापकविषयिताशून्यत्वसहितलक्षणानुगमस्तु प्रकृतानुमितिव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावृत्तिधर्मवत्त्वं हेत्वाभासत्वमिति वृत्तित्वञ्च स्वविशिष्टनिश्चयत्वव्यापकत्वसम्बन्धेन स्वावच्छिन्नविषयता निरूपितविषयितावत्त्व-स्वावच्छिन्नविषयतानिरूपितविषयितासमानाधिकरणभावप्रतियोगितावच्छेदकधर्मावच्छिन्नविषयिता शून्यत्वोभयसम्बन्धेन । तदुक्तं गदाधरैः – **"अथैवमपि जातित्वादिना ह्रदत्वादिविषयकस्य जातिमान् वह्न्यभाववान् इत्यादिज्ञानस्यापि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकतया तस्य च ह्रदो वह्निमानित्याद्यनुमित्यविरोधत्वासम्भवः"**[146] इति ।

वह्न्यभावद्ध्रदत्वावच्छिन्नविषयतानिरूपितविषयिता जातित्वेन हि ह्रदत्वावगाहिज्ञानेऽपि जातिमान् वह्न्यभाववान् इत्याकारके वर्तते । तत्र हि प्रकृतह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्याकारकानुमितिप्रतिबन्धकत्वविरहेणासम्भवाभिधानं कृतं गदाधरैः। तदसङ्गतमिति आशङ्कते तथा हि ह्रदो वह्निमान् इत्याकारिका अनुमितिः पक्षतावच्छेदकीभूतह्रदत्वसामानाधिकरण्येन पक्षतावच्छेदकीभूतह्रदत्वावच्छेदेन द्विधा भवति । तत्र ह्रदत्वावच्छेदेन वह्निसाध्यकस्थेऽव्याप्तिसम्भवेऽपि ह्रदत्वसामानाधिकरण्येन यत्र वह्नेः साध्यता तत्र ह्रदत्वावच्छेदेन वह्न्यभाववद्ध्रदात्मकबाधे लक्षणसमन्वयः सम्भवति । कथमिति चेत् ह्रदत्वावच्छेदेन वह्न्यभावावगाहिज्ञाने ह्रदः वह्न्यभाववान् इत्याकारके वह्न्यभावस्य सम्बन्धः तावत् ह्रदत्वव्यापकवह्न्यभावनिष्ठनिरूपिताकविषयितां जातिमान् वह्न्यभाववान् इत्याकारकबुद्धौ न वर्तते, अपि तु ह्रदत्वावच्छेदेन वह्न्यभावावगाहिन्यां ह्रदो वह्न्यभाववान् इत्याकारकबुद्धावेव वर्तते । यतो जातिमान् वह्न्यभाववान् इत्याकारकबुद्धौ जातिव्यापकवह्न्यभावप्रतियोगिकस्वरूप-

---

[146] सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५९३

सम्बन्धावच्छिन्नवह्न्यभावनिष्ठप्रकारकतानिरूपकत्वात्। अतो जातिमान् वह्न्यभाववान् इति ज्ञानमादाय कथमिदम् असम्भवाभिधानं सङ्गच्छते इति चेदुच्यते - अत्र असम्भवपदेनाव्याप्तेरेव अभिहितत्वात् । अत्र पूर्वम् अव्यापकविषयिताशून्यत्वनिवेशकल्पारम्भे ह्रदो वह्निमान् धूमादित्यत्र जातिमान् वह्न्यभाववान् इत्याकारकं निश्चयमादाय असम्भवः अभिहितः। तद्वारणाय निश्चये पक्षतावच्छेदकाद्यंशे अन्याप्रकारकत्वरूपं विशेषणं देयमित्युक्तम् । किमिदं पक्षतावच्छेदकाद्यंशे अन्याप्रकारकत्वं यदि तावत् पक्षतावच्छेदकनिष्ठविशेष्यतानिरूपितप्रकारतानिरूपकत्वं तर्हि पुनः ह्रदो वह्निमानित्यादौ असम्भवः स्यात् । तथाहि ह्रदो वह्न्यभाववान् इत्याकारकस्य ज्ञानस्यापि धर्मिपारतन्त्र्येण ह्रदत्वे सामानाधिकरण्यसम्बन्धेन वह्न्यभावस्य प्रकारत्वात् पक्षतावच्छेदकीभूतह्रदत्वनिष्ठविशेष्यतानिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्नप्रकारत्वनिरूपकं ह्रदो वह्न्यभाववान् इत्याकारकज्ञानमेव । न हि ज्ञानेऽस्मिन् तादृशप्रकारत्वानिरूपत्वमिति ज्ञानस्यास्यासङ्ग्रहः इति असम्भवः। एतदसम्भववारणाय यदि सामानाधिकरण्यसम्बन्धावच्छिन्नत्वं पक्षतावच्छेदकनिष्ठविशेष्यतानिरूपितप्रकारतायां निवेश्य प्रकृते वह्न्यभावनिष्ठप्रकारता पक्षतावच्छेदकीभूतह्रदत्वनिष्ठविशेष्यतानिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्न एव भवति इति दोषः वार्यते । तर्हि यत्र सामानाधिकरण्येन जातित्वेन ह्रदत्वावगाहि जातिमान् वह्न्यभाववान् इत्याकारकज्ञानं वर्तते तस्यापि सङ्ग्रहः स्यात् । कथं हि उक्तज्ञानीया या जातित्वनिष्ठप्रकारता तस्याः ह्रदत्वनिष्ठविशेष्यतानिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्नत्वात्।

ह्रदत्वनिष्ठविशेष्यतानिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्नप्रकारकानिरूपकत्वं जातिमान् वह्न्यभाववान् इत्याकारके ज्ञानेऽस्मिन्नपि वर्तते । तत्र हि प्रकृतानुमितिप्रतिन्धकत्वस्य विरहात् पुनः असम्भवः स्यात् । अतः पूर्वोक्तासम्भववारणाय प्रकारतायां सामानाधिकरण्यसम्बन्धावच्छिन्नत्वस्य निवेशः न

युक्तः। किन्तु तद्दोषवारणाय प्रकारतायां प्रकारत्वानवच्छिन्नत्वं निवेश्यते । तथा सति प्रकृते ह्लदो वह्निमान् इत्यादावसम्भवः न भवति । तथा हि पक्षतावच्छेदकीभूतह्लदत्वनिष्ठविशेष्यतानिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्नव-ह्न्यभावनिष्ठप्रकारता इयं तावत् ह्लदत्वावच्छिन्नविशेष्यतानिरूपितस्वरूप-सम्बन्धावच्छिन्नवह्न्यभावनिष्ठप्रकारत्वावच्छिन्ना एव भवति । तादृशप्रकारत्वा-नवच्छिन्नप्रकारता जातित्वादिनिष्ठप्रकारता तदनिरूपकत्वं ह्लदो वह्न्यभाववान् इत्याकारकज्ञाने वर्तते । तत्रैव प्रकृतानुमितिप्रतिबन्धकत्वमपि वर्तते इति नासम्भवः। तथापि ह्लदो वह्नीयप्रमेयत्ववान् इत्याकारकज्ञानस्यापि ज्ञानस्य वारणात् । कथं हि ह्लदो वह्नीयप्रमेत्ववान् इत्याकारकं ज्ञानं प्रमेयत्वेन प्रकारतावच्छेदकीभूतवह्न्यभावत्वम् अवगाहते । ज्ञानेऽस्मिन् ह्लदत्वनिष्ठ-विशेष्यतानिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्नह्लदत्वावच्छिन्नविशेष्यतानिरूपि-तस्वरूपसम्बन्धावच्छिन्नवह्न्यभावनिष्ठप्रकारत्वावच्छिन्ना या वह्न्यभावनिष्ठप्रकारता तादृशप्रकारताया एव सत्त्वात् । तादृशप्रकारत्वानवच्छिन्नप्रकारतानिरूपकत्वं ह्लदो वह्नीयप्रमेयत्ववान् इत्याकारकज्ञाने वर्तते । तत्र तु प्रकृतानुमितिप्रतिबन्धकत्वं न वर्तते इति असम्भवः स्यात् । अतः प्रकारत्वानवच्छिन्नत्वमपि प्रकारतायां न निवेश्यते इति । तर्हि किन्तु पक्षतावच्छेदकांशे अन्याप्रकारत्वमिति चेदुच्यते विशेष्यताविशिष्ट-प्रकारत्वाऽनिरूपकत्वं तत् । विशेष्यतावैशिष्ट्यं च स्वनिरूपितत्वस्वावच्छिन्नाव-च्छेदकतानिरूपकविशेष्यतानिरूपितप्रकारत्वानवच्छिन्नोभयसम्बन्धेन । ह्लदो वह्निमान् धूमादित्यत्र जातिमान् वह्न्यभाववान् इत्याकारकस्य ज्ञानस्य वारणसम्भवः भवति । कथं हि - जातिनिष्ठविशेष्यतानिरूपितायं च जातिनिष्ठ-विशेष्यत्वावच्छिन्नावच्छेदकतानिरूपकजात्यवच्छिन्नविशेष्यतानिरूपितवह्न्यभावनि-ष्ठप्रकारत्वानवच्छिन्ना च या प्रकारता इत्युक्तौ जातित्वनिष्ठप्रकारतैव तादृशप्रकारतानिरूपकत्वमेव जातिमान् वह्न्यभाववान् इत्याकारकज्ञाने न भवतीति नासम्भवः। एवमेव ह्लदो वह्नीयप्रमेयत्ववान् इत्याकारकज्ञानस्य वारणं तु स्वयमूह्यम्। एवं जलवान् वह्निमानित्यादौ वह्न्यभाववज्जलवद्रूपबाधेऽपि अव्याप्तिः सङ्गच्छते ।

कथमित्युक्ते जलवान् वह्न्यभाववानित्याकारकज्ञाने जलनिष्ठविशेष्यतानिरूपिता अथ च तादृशविशेष्यतावच्छिन्नावच्छेदकतानिरूपकजलत्वावच्छिन्नविशेष्यतानिरूपितवह्न्याभावनिष्ठप्रकारतावच्छिन्ना च या प्रकारता तन्निरूपकत्वस्यैव सत्त्वात् ।

अत्र विशेषो हि जातित्वेन ह्रदत्वावगाहिज्ञानस्य जातिमान् वह्न्यभाववान् इत्याकारकस्य वारणाय गदाधरेण अव्यापकविशषिताशून्यत्वं निश्चये निवशनीयम् जगदीशतर्कालङ्कारेण तु न निवेशितम् । तर्हि अनयोः कः अभिप्रायः इति चेत् जगदीशेन यद्विषयकत्वपदस्य यादृशसमुदायत्वनिरूपकताकविषयित्वमित्यर्थः। तथा च तेषां लक्षणमित्थं पर्यवसितं यादृशसमुदायत्ववृत्तिनिरूपकताविषयित्वं प्रकृतानुमितिप्रतिबन्धकत्वव्याप्यं तादृशसमुदायत्वविशिष्टवत्त्वमिति । तथा च जातिमान् वह्न्यभाववान् इत्याकारकज्ञाने वह्न्यभावविशिष्टह्रदत्वगतसमुदायत्ववृत्तिनिरूपकताविषयित्वविरहेण न तन्मतेऽसम्भवः।

गदाधरभट्टाचार्यमते यद्विषयकत्वस्य अर्थः तावत् यादृशसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताविषयित्वमिति । एतेषां मते लक्षणस्वरूपमेव यादृशसमुदायत्वावच्छिन्नाऽनुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताविषयित्वव्यापकं प्रकृतानुमितिव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वं तादृशसमुदायत्वविशिष्टत्त्वमिति । जातिमान् वह्न्यभाववानिति ज्ञाने जातित्वं तस्याधिकस्य ज्ञानेऽपि वह्न्यभाववद्ध्रदत्वस्य विषयितानिरूपकताकावच्छेदकतया तादृशवह्न्यभाववद्ध्रदत्वगतसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकविषयित्वस्य जातिमान् वह्न्यभाववान् इत्याकारकज्ञाने सत्त्वात् इयम् असम्भवसंगतिः, अतः एतदसम्भववारणाय गदाधरैः अव्यापकविषयिताशून्यत्वरूपं विशेषणं ज्ञाने दत्तमिति ।

## ४.४) 'विशिष्टान्तराघटितत्वनिवेश'कल्पविवेकः –

यद्रूपावच्छिन्नविषयितानिरूपितविषयिता प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताव्याप्या तद्रूपवत्त्वमिति हेत्वाभासत्वमिति सामान्यलक्षणशरीरम् । ह्रदो वह्निमान् इत्यादौ पूर्वोक्तरीत्या समन्वयः करणीयः। अत्र लक्षणस्यास्य प्रमेयत्वविशिष्टव्यभिचारादौ अतिव्याप्तिर्भवति । तथाहि ह्रदो धूमवान् वह्नेः इत्यत्र ह्रदो धूमवान् धूमव्याप्यवह्निमान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायां धूमाभाववद्वृत्तिः वह्निः प्रमेय इत्याकारकनिश्चयान्तर्भावेण प्रमेयत्वविशिष्टधूमाभाववद्वृत्तिवह्नित्वावच्छिन्नविषयितानिरूपितविषयिताव्यापकत्वस्य सम्भवात् तद्रूपवत्त्वं प्रमेयत्वविशिष्टधूमाभाववद्वृत्तिवह्निरूपव्यभिचारे विद्यते इति अतिव्याप्तिदोषो भवति । तद्वारणाय दीधितिकारेण तदुक्तम् **"विशेषणीयञ्च तादृशविशिष्टान्तराघटितत्वेन"**[147] इति । अर्थात् लक्षणघटकयद्रूपपदार्थे विशिष्टान्तराघटितताावच्छेदकत्वं निवेशनीयमिति । तन्निवेशे विशिष्टान्तराघटिततावच्छेदकीभूतयद्रूपावच्छिन्नविषयतानिरूपितविषयिताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमिति लक्षणं पर्यवसितम् । ह्रदो धूमवान् वह्नेः इत्यत्र विशिष्टान्तराघटिततावच्छेदकं यद्रूपमित्युक्तौ प्रमेयत्वविशिष्टधूमाभाववद्वृत्तिवह्नित्वं न भवति । विशिष्टः प्रमेयत्वविशिष्टव्यभिचारः तद्भिन्नः शुद्धव्यभिचारः तद्घटितावच्छेदकत्वमेव मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्नित्वरूपव्यभिचारत्वे विद्यते । न हि तदघटिततावच्छेदकत्वमिति विशिष्टान्तराघटिततावच्छेदकं यद्रूपं शुद्धधूमाभाववद्वृत्तिवह्नित्वं भवति । तदवच्छिन्नविषयतानिरूपितविषयित्वव्यापकत्वं प्रकृतह्रदो धूमवान् धूमव्याप्यवह्निमान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायां वह्निः धूमाभाववद्वृत्तिरित्याकारकनिश्चयान्तर्भावेण सम्भवतीति नातिव्याप्तिः। ततः अत्र विशिष्टान्तरपदस्य अन्यः विशिष्टः

---

147 सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ. - १३३

विशिष्टान्तरमिति विग्रहबलात् विशिष्टप्रतियोगिकभेदवान् इत्यर्थं स्वीकृत्य प्रकृते अतिव्याप्तिस्तु वारयितुं न शक्यते इति शङ्का वर्तते, तथाहि विशिष्टपदार्थः इत्युक्तौ शुद्धव्यभिचारोऽपि विशिष्टं शुद्धान्नातिरिच्यते इति न्यायेन भवति। तद्भिन्नः बाधादिः तदघटिततावच्छेदकत्वं मेयत्वविशिष्टव्यभिचारत्वरूपे भवतीति पुनः अतिव्याप्तिः। तद्वारणाय पारिभाषिकविशिष्टभेद एव लक्षणे निवेशनीयः। तथा च लक्षणस्वरूपमित्थं भवति स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यो धर्मः, तद्धर्मावच्छिन्नाविषयतावच्छेदकं यद्रूपं तद्धर्मावच्छिन्नविषयतानिरूपितविषयता प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताव्याप्या तद्रूपवत्त्वमिति । अत्र स्वपदेन लक्ष्यतावच्छेदकधर्मो ग्राह्यः। ह्रदो धूमवान् वह्नेः इत्यत्र धूमाभाववद्वृत्तित्वविशिष्टवह्नित्वं स्वपदेन ग्राह्यम् । तदवच्छिन्नाविषयकप्रतीतिः ह्रदो धूमाभाववान् इत्याकारिका बाधादिविषयकप्रतीतिः। तद्विषयतावच्छेदको यो धर्मः इत्युक्तौ धूमाभाववद्ध्रदत्वं तद्धर्मावच्छिन्नाविषयकप्रतीतिः शुद्धव्यभिचारविषयिणी वह्निः धूमाभाववद्वृत्तिः इत्याकारिका प्रतीतिः तद्विषयतावच्छेदकं यद्रूपमित्युक्तौ धूमाभाववद्वृत्तिवह्नित्वं तदवच्छिन्नविषयता-निरूपतविषयितायां प्रकृतह्रदो धूमवान् धूमव्याप्यवह्निमान् चेत्याकार्कानुमितित्व-व्यापकप्रतिबध्यतानिरूपितप्रिबन्धकताव्याप्यत्वं भवतीति धूमाभाववद्वृत्ति-वह्निरूपव्यभिचारे लक्षणसमन्वयः।

एवं मेयत्वविशिष्टव्यभिचारे नातिव्याप्तिः। कथं हि मेयत्वविशिष्टव्यभिचारत्वं स्वपदेन ग्रहीतुं न शक्यते । यस्मात् मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाविषयक-प्रतीतिविषयतावच्छेदकव्यभिचारत्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकत्वरूप-विशिष्टान्तरघटिततावच्छेदकत्वस्यैव मेयत्वविशिष्टव्यभिचारत्वे सत्त्वात् । अत्र जगदीशमतं स्मरणीयम् – **"स्वातिरिक्तं यादृशमनुमितिप्रतिबन्धकताननतिरिक्तवृत्ति-विषयिताकं तादृशाघटितत्वेन निरुक्तविशिष्टं विशेषणीयमित्यर्थः। सव्यभिचारादेरपि अनुमितिप्रतिबन्धकताननतिरिक्तवृत्तुविषयताकेन स्वेनैव घटितत्वादसम्भवः स्यादतः**

**स्वातिरिक्तेति । प्रमेयत्वविशिष्टसव्यभिचारादिश्च स्वातिरिक्तेन सव्यभिचारादिनैव तादृशेन घटित इति न तत्रातिप्रसङ्गः।"[148]**

अत्र विशिष्टान्तराघटिततावच्छेदकघटकीभूतस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूतधर्मे प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयितावच्छेदकत्वं निवेशनीयम् । अन्यथा पुनः ह्रदो धूमवान् वह्नेः इत्यादौ मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्निरूपव्यभिचारेऽतिव्याप्तिः स्यात् । कथमित्युक्तौ स्वं – मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्नित्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको धर्मः इत्यनेन घटत्वाख्यो धर्मः स्वीक्रियते । तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपमित्युक्तौ मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्नित्वं भवति । तदवच्छिन्नविषयतानिरूपितविषयित्वे धूमाभाववद्वृत्तिः वह्निः मेयः इत्यकारकनिश्चयान्तर्भावेण प्रकृतह्रदो धूमवान् धूमव्याप्यवह्निमान् चेत्याकरकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताव्याप्यत्वं सम्भवतीति मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः। तद्वारणाय स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकधर्मे प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयितानिरूपितविषयतावच्छेदकत्वं निवेशनीयम् । तन्निवेशे प्रकृते घटत्वात्मकः धर्मः स्वपदगृहीतमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकः सन्नपि प्रकृतह्रदो धूमवान् धूमव्याप्यवह्निमान् च् इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयितानिरूपितविषयतावच्छेदको न भवतीत्यतो घटत्वाख्यो धर्मो ग्रहीतुं न शक्यन्ते । ते तु व्यभिचारत्वादय एव । यतो व्यभिचारत्वे एव स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वे सति प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयतानिरूपितविषयतावच्छेदकत्वस्य सत्त्वात् । अत एव नातिव्याप्तिर्भवति ।

अधुना विशिष्टान्तराघटिततावच्छेदकघटकदलानां सार्थक्यं कथ्यते ।

---

[148] सा.नि.जा., पृ. - ३०

विशिष्टान्तराघटिततावच्छेदकत्वञ्च स्वावच्छिन्नाभिविषकप्रतीतिविषतावच्छेदकः ततश्च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितावच्छेदको यद्यद्धर्मः तत्तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वमिति । तत्र यद्रूपपदार्थे तत्तद्धर्मावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकत्वं विशेषितमिति । तन्मास्तु तत्तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयताश्रयत्वेनैव यद्रूपपदार्थः विशेष्यतामित्याशङ्कायां समाहितमाचार्यैः गदाधरैः – तत्तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयताश्रयत्वेन यद्रूपपदार्थो विशेष्यते चेत् पुनः ह्लदो धूमवान् वह्नेः इत्यत्र मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्निरूपव्यभिचारेऽतिव्याप्तिर्भवेत् । कथमित्युक्तौ स्वं मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्नित्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकः, अत एव च प्रकृतह्लदो धूमवान् धूमव्याप्यवह्निमान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदको यद्यद्धर्म इति चेद्व्यभिचारत्वादिर्भवति । तद्धर्मावच्छिन्नाविषयकप्रतीतिः प्रमेयमित्याकारिका तादृशप्रतीतिविषयत्वस्य प्रमेयत्वेन प्रमेयमात्रे वर्तमानत्वात् प्रमेयत्वविशिष्टव्यभिचारत्वेऽपि सत्त्वादतिव्याप्तिर्भवेत् । तद्वारणाय यद्रूपपदार्थे तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतामुपेक्ष्य तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं निवेशनीयम् । तन्निवेशे प्रमेयमित्याकारकप्रतीतिविषयतावच्छेदकं प्रमेयत्वमेव न हि मेयत्वविशिष्टव्यभिचारत्वमिति नातिव्याप्तिः।

अत्र विशिष्टान्तराघटिततावच्छेदकघटकीभूतस्वावच्छिन्नाविषयकप्रतीतिविषयतानिरूपितविषयतावच्छेदकीभूतधर्मे प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकतावच्छेदकविषयितावच्छेदकत्वं निवेशनीयम् । अन्यथा पुनः ह्लदो धूमवान् वह्नेरित्यादौ मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्निरूपव्यभिचारेऽतिव्याप्तिर्भवेत् । कथमित्युक्तौ स्वं – मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्नित्वं तदवच्छिन्नाविषकप्रतीतिविषयतावच्छेदको यो धर्मः इत्यनेन घटत्वाख्यो धर्मः स्वीक्रियते तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपमित्युक्तौ

मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्निनत्वं भवति । तदवच्छिन्नाविषयतानिरूपित-विषयित्वे धूमाभाववद्वृत्तिर्वह्निर्मेय इत्याकारकनिश्चयान्तर्भाविण प्रकृतह्रदो धूमवान् धूमव्याप्यवह्निमान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता-व्याप्यत्वं सम्भवतीति मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः। तद्वारणाय स्वावच्छिन्नाविषकप्रतीतिविषयतावच्छेदकधर्मे प्रकृतानुमितित्वव्यापकप्रतिबध्यतानि-रूपितप्रतिबन्धकतावच्छेदकविषयितानिरूपितविषयतावच्छेदकत्वं निवेशनीयमिति । वस्तुतस्तु तन्निवेशे प्रकृते घटत्वात्मको धर्मः स्वपदग्रहीतमेयत्वविशिष्टव्यभिचारत्वाव-च्छिन्नाविषयकप्रतीतिविषयतावच्छेदकः सन्नपि प्रकृतह्रदो धूमवान् धूमव्याप्यवह्नि-मान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविष-यितानिरूपितविषयतावच्छेदको न भवतीत्यतः घटत्वादिर्ग्रहीतुं न शक्यते । परन्त्वत्र व्यभिचारत्वादय एव । यस्मात् व्यभिचारत्वे हि स्वावच्छिन्नाविषयकप्रतीतिविषयता-वच्छेदकत्वे सति प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदक-विषयितानिरूपितविषयतावच्छेदकत्वस्य सत्त्वात् । अत एव नातिव्याप्तिर्भवेत् । एवं विशेष्यदलानुपादाने ह्रदो वह्निमान् धूमादित्यादौ घटेऽतिव्याप्तिर्भवेत् । कथमित्युक्तौ स्वं घटत्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकः ततश्च प्रकृतह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता-नतिरिक्तवृत्तिविषयितानिरूपितविषयतावच्छेदको यो धर्म इत्युक्तौ बाधत्वादिकं भवति । तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं स्वपदगृहीतघटत्वादिषु भवतीति कृत्वा तद्वत्त्वं घटे वर्तते इत्यतिव्याप्तिर्भवेत् ।

अत्रैकाशङ्का वर्तते स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकमित्यत्र स्वाश्रयाविषयकप्रतीतिविषयतावच्छेदकमित्यादिरीत्या निवेशनैव सामञ्जस्ये किमर्थं स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वनिवेशनम् ।

अस्या आशङ्काया समाधानं हि स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेद-कत्वनिवेशे पुनः मेयत्वविशिष्टव्यभिचारत्वाश्रयो यथा मेयत्वविशिष्टव्यभिचारस्तथा

शुद्धव्यभिचारोऽपि । अत एव मेयत्वविशिष्टव्यभिचारत्वाश्रयाविषयकप्रतीतिविषयतावच्छेदक, ततश्च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताननतिरिक्तवृत्तिविषयतानिरूपितविषयतावच्छेदको यो बाधत्वाख्यधर्मः तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपमित्युक्तौ मेयत्वविशिष्टव्यभिचारत्वमित्यव्याप्तिः। तद्वारणाय भट्टाचार्यैः स्वाश्रयाविषयकप्रतीतिविषयतावच्छेदकत्वमुपेक्ष्य स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वनिवेशः कृतः। तन्निवेशे, स्वं मेयत्वविशिष्टव्यभिचारत्वं तदवच्छिन्नविषयतानिरूपकत्वाभाववती या प्रतीतिरित्युक्तौ वह्निर्धूमाभाववद्वृत्तिरित्याकारिका भवति । तद्विषयतावच्छेदकं, ततश्च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतनतिरिक्तवृत्तिविषयितानिरूपितविषयतावच्छेदकं धूमाभाववद्वृत्तिवह्यिन्त्वं भवति । तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं न हि मेयत्वविशिष्टव्यभिचारत्वं भवतीति मेयत्वविशिष्टव्यभिचारत्वस्य यद्रूपपदग्राह्यत्वाभावान्नातिव्याप्तिः।

एवं प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताननतिरिक्तवृत्तिविषयितानिरूपितविषयतावच्छेदकीभूतधर्मे स्वावच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वमेव निवेश्य मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिर्वारयितुं शक्यते । किमर्थत्युक्तौ तादृशधर्मे स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वपर्यन्तं निवेशनीयमिति चेन्न, भद्रम्, तादृशधर्मे स्वावच्छिन्नाविशयकप्रतीतिविषयतावच्छेदकत्वपर्यन्तानिवेशं सर्वत्राप्यसम्भवः स्यात् । तथाहि स्वं व्यभिचारत्वं तदवच्छिन्नाविषयकप्रतीतिः प्रमेयमित्याकारिका प्रतीतिः तद्विषयीभूतव्यभिचारात्मकप्रमेयवृत्तिः ततश्च प्रक्रुतह्रदो धूमवान् धूमव्याप्यवह्निमान् च इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताननतिरिक्तवृत्तिविषयितानिरूपितविषयतावच्छेदको यो धर्म इत्युक्तौ व्यभिचारत्वाख्यो धर्मो भवति । तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य यद्रूपपदग्राह्यव्यभिचारत्वे विरहेणासम्भवः। एतदसम्भववारणाय प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताननतिरिक्तवृत्तिविषयितानिरू-

पितविषयतावच्छेदकीभूतधर्मे स्वावच्छिन्नाविषयतप्रतीतिविषयतावच्छेदकत्वं निवेशनीयमिति । तन्निवेशे स्वं व्यभिचारत्वं तदवच्छिन्नाविषयकाप्रतीतिः प्रमेयमित्याकारिका भवतु तद्विषयतावच्छेदकत्वस्य तादृशप्रतिबन्धकतानतिरिक्तवृत्ति-विषयितानिरपितविषयतावच्छेदकीभूतधर्मे व्यभिचारत्वे विरहेण स्वावच्छिन्नाविषयकप्रततिपदेन प्रमेयमित्याकारिकां प्रतीतिं स्वीकर्तुं न शक्नुमः। परन्तु बाधादिविषयकप्रतीतिर्हि ग्राह्या । तादृशप्रतीतिविषयतावच्छेदकः ततश्च प्रकृतह्लदो धूमवान् धूमव्याप्यवह्निमान् चैत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रति-बन्धकतानतिरिक्तवृत्तिविषयितानरूपितविषयतावच्छेदको यो धर्म इत्युक्तौ बाधत्वादिकम् । तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूतव्यभिचारत्वस्य यद्रूपपदग्राह्यत्वात्तद्रूपावच्छिन्नविषयतानिरूपितविषयित्वव्यापकत्वं वह्निः धूमा-भाववद्वृत्तिरित्यकारकनिश्चयान्तर्भावेण प्रकृतह्लदो धूमवान् धूमव्याप्यवह्निमान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानोरूपितप्रतिबन्दकतायां विद्यत इति नासम्भवः। एवमेवान्यत्रापि असम्भववारणमूह्यमिति ।

पुनः आशङ्कास्ति स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकः ततश्च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानि-रूपितविषयतावच्छेदको यो धर्मः तद्धर्मावच्छिन्नप्रतीतिविषयतावच्छेदकं यद्रूपमित्यत्र यद्रूपे तद्धर्माश्रयाविषयकप्रतीतिविषयतावच्छेदकत्वमेव निवेश्यतामिति ।

अत्र समाधानं हि तथा निवेशः क्रियते चेत्प्रमेयं गगनवद् वाच्यत्वादित्यत्राव्याप्तिर्भवेत् । कथमित्युक्तौ स्वं गगनाभाववद्वृत्तिवाच्यत्वं तदवच्छिन्नप्रतीतिः प्रमेयं गगनाभाववदित्याकारकप्रतीतिर्भवति । तद्विषयतावच्छेदकः ततश्च प्रकृतप्रमेयं गगनवद् गगनव्याप्यवाच्यत्ववच्चेत्याकारकानुमितित्वव्यापकप्रति-बध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूप्इतविषयतावच्छेदको यो धर्म इत्युक्तौ गगनाभाववत्प्रमेयत्वाख्यो धर्मस्तद्धर्मवत्त्वं गगनाभाववत्प्रमेये वर्ततेति वस्तुमात्रस्य प्रमेयरूपतया प्रमेयाविषयकप्रतीत्यप्रसिद्ध्या प्रमेयं

गगनवद्वाच्यत्वादित्यत्राव्याप्तिर्भवेत् । तद्वारणाय तद्धर्माश्रयाविषयकप्रतीतिविषयतावच्छेदकत्वमुपेक्ष्य तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं यद्रूपे गदाधरैः विशेषितम् । तन्निवेशे गगनाभाववद्वृत्तिवाच्यत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं ततश्च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपितविषयतावच्छेदकं भवतु नाम गगनाभावविशिष्टप्रमेयत्वमिति । तदवच्छिन्नाविषयकप्रतीतिः निरुक्तव्यभिचारविषयकप्रतीतिर्भवति । तद्विषयतावच्छेदकं यद्रूपमित्युक्तौ गगनाभाववद्वृत्तिवाच्यत्वं तदवच्छिन्नविषयतानिरूपितविषयिताव्यापकत्वं वाच्यत्वं गगनाभाववद्वृत्ति इत्याकारकनिश्चयान्तर्भाविण प्रकृतप्रमेयं गगनवद् गगनव्याप्यवाच्यवच्चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायां सम्भवतीति नाव्याप्तिः।

एवञ्च विशिष्टान्तराघटितत्वरूपदलघटितहेत्वाभासलक्षणस्वरूपमित्थं भवति – स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकः ततश्च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपितविषयतावच्छेदको यो धर्मः। तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपं तद्धर्मावच्छिन्नविषयता निरूपितविषयित्वव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमिति ।

विशिष्टान्तराघटितत्वसहितलक्षणानुगमस्तु धर्मविशिष्टधर्मवत्त्वं हेत्वाभासत्वमिति, वैशिष्ट्यं स्वतादात्म्यस्वविशिष्टनिश्चयत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतावत्त्वोभयसम्बन्धेन, स्ववैशिष्ट्यं च निश्चये स्वावच्छिन्नविषयितावत्त्वसम्बन्धेन, प्रतिबन्धकतावत्त्वञ्च स्ववृत्त्यभावीयप्रतियोगितानिरूपितपरम्परयावच्छेदकतावद्धर्मवत्त्वसम्बन्धेन, धर्मवत्त्वञ्च स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्ववृत्तित्वोभयसम्बन्धेन, वृत्तित्वमपि स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्ववृत्तित्वोभयसम्बन्धेन इति ।

अत्र दीधितिकारैस्तावद्यद्रूपावच्छिन्ने विशिष्टान्तराघटितत्वं निवेशितम् ।

परन्तु गदाधरैरुक्तम् – **“अत्र च तादृशविशिष्टान्तराविषयकप्रतीतिविषयतावच्छेदकत्वस्य दोषतावच्छेदकधर्मे विशेषणतापेक्षया ज्ञानस्येत्यत्र ज्ञानपदार्थे तादृशविशिष्टान्तराविषयकत्वनिवेश एवोचितः”**[149] इति ।

## ४.५) 'न च-चतुष्टय' इति कल्पविवेकः —

मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिवारणाय यदि विशिष्टान्तराघटितत्वरूपं विशेषणं दीयते । तदा धूमव्यभिचारिवह्निमत्पक्षकधूमसाध्यकवह्निहेतुकस्थले धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौ धूमाभाववद्धूमव्यभिचारिवह्निमद्रूपव्यभिचारघटितबाधेऽतिव्याप्तिर्भवेत् । स्वं धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वं तदवच्छिन्नविषयकप्रतीतिविषयतावच्छेदकः अथ च प्रकृतधूमव्यभिचारिवह्निमान् धूमवान् धूमव्याप्यवह्निमान् चैत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपितविषयतावच्छेदको यो धर्मः धूमाभाववद्वृत्तिवह्नित्वं वह्निमान् धूमव्यभिचारिधूमवान् वह्नेः इत्यत्र अव्याप्तिः। तदवच्छिन्नविषयकप्रतीतिविषयतावच्छेदकमेव भवति धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वमिति । तन्निषेधाय हेत्वाभासलक्षणं परिष्करणं कर्तव्यम् । तद्धि – **“यद्रूपावच्छिन्नविषयकत्वं स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं तद्रूपावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तद्वत्त्वमिति”**[150] लक्षणं पर्यवसितम् । लक्षणमिदं तावत् प्राचीनमतानुसारं ह्रदो वह्निमानित्याकारकबुद्धिं प्रति ह्रदो वह्न्यभाववान् ह्रदे वह्न्यभाव इत्याकारकयोः निश्चययोः एकरूपेण प्रतिबन्धकत्वमङ्गीकृत्य अभिप्रेतम् । एकरूपेण प्रतिबन्धकत्वं नाम अत्र 'ह्रदो

---

149 सा.नि.प्र.(चन्द्रकला-कलाविलाससमेत), पृ. - १४१

150 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५९७

वह्न्यभाववान् ह्रदे वह्न्यभाव इति ज्ञानयोरेकरूपेण प्रतिबन्धकत्वमङ्गीकृत्य लक्षणमिदम्। प्रतिबध्यप्रतिबन्धकाभावश्च, वह्नित्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालिबुद्धित्वावच्छिन्नं प्रति स्वरूपसम्बन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नविषयतानिरूपिताधेयतासम्बन्धातिरिक्तसम्बन्धानवच्छिन्नह्रदत्वावच्छिन्न-विषयताशालिनिश्चयत्वेन प्रतिबन्धकता।

यद्वा स्वरूपत्वावच्छिन्नावच्छेदकत्वेतरसंसर्गनिष्ठावच्छेदकत्वानिरूपकवह्न्यभावत्वावच्छिन्नविषयतानिरूपितसांसर्गिकविषयतानिरूपिताधेयत्वावच्छिन्नावच्छेदकत्वेतरसांसर्गिकावच्छेदकत्वानिरूपकह्रदत्वावच्छिन्नविषयताशालिनिश्चयत्वेनेति । प्रकृते ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः। तथा हि यद्रूपं ह्रदवृत्तिवह्न्यभावत्वं तदवच्छिन्नविषयकत्वं, प्रकृतह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपिता या स्वावच्छिन्नविषयकत्वव्यापिका प्रतिबन्धकता तादृशप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिर्भवतीति कृत्वा तद्रूपभूतह्रदवृत्तिवह्न्यभावत्वावच्छिन्नाविषयकप्रतीतिविषयकप्रतीतिविषयतावच्छेदकं यत्स्वपदगृहीतवह्न्यभाववद्ध्रदत्वं तदाश्रयत्वं वह्न्यभाववद्ध्रदे विद्यते इति लक्षणसमन्वयः।

धूमव्यभिचारिवह्निमान् धूमवान् वह्नेः इत्यत्रापि धूमाभाववद्धूमव्यभिचारिवह्निमद्रूपव्यभिचारघटितबाधे लक्षणसमन्वयः। तथाहि स्वं धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य शुद्धधूमाभाववद्वृत्तिवह्नित्वरूपव्यभिचारत्वे सत्त्वेऽपि तत्र शुद्धव्यभिचारत्वे धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वरूपावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतासामान्यान्तर्गतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकत्वाभावात् (अर्थात् व्यभिचारघटितबाधत्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकता द्विविधा – एका व्याप्तिज्ञानत्वावच्छिन्नप्रति-

बध्यतानिरूपितप्रतिबन्धकता, अन्या च अनुमितित्वावच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकता । तत्र धूमाभाववद्वृत्तिवह्नित्वरूपव्यभिचारत्वे धूमव्याप्यो वह्नि इत्याकारकव्याप्तिज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविष -यितानिरूपकतावच्छेदकत्वस्य सत्त्वेऽपि तादृशप्रतिबन्धकतासामान्यान्तर्गतानुमिति-त्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छे-दकत्वविरहात्) तादृशरूपपदेन धूमाभाववद्वृत्तिवह्नित्वरूपधर्मः ग्रहीतुं न शक्यते । परन्तु धूमव्यभिचारिवह्निमत्त्वाद् वृत्तिधूमाभावत्वरूपविपरीतबाधत्वं भवति । धर्मोऽयं तावत् स्वपदगृहीतधूमाभाववद्धूमव्यभिचारिवह्निमत्त्वावच्छिन्ना-विषयकप्रतीतिविषयतावच्छेदकम्, अथ च स्वपदगृहीतधूमाभाववद्धूमव्यभिचारि-वह्निमत्त्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रति -बन्धकतासामान्यानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं भवति । तादृशविप-रीतव्यभिचारघटितबाधत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् स्वमित्युक्तौ धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वं भवति । तद्वत्त्वं धूमाभाववद्धूमव्यभिचारि-वह्निमद्रूपबाधे वर्तते इति लक्षणसमन्वयः। अस्मिन् प्रथमे 'न च'-कल्पे विशेष्यदलं नोपादीयते चेन्न, घटेऽतिव्याप्तिः। यस्मात् प्रतिबन्धकतायां घटत्वावच्छिन्नविषयकत्व-व्यापकविरहात् ।

प्रथमः 'न च' इति कल्पानुगमस्तु – धर्मविशिष्टधर्मवत्त्वमिति वैशिष्ट्यं च स्वतादात्म्यस्वविशिष्टनिश्चयत्वव्यापकप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्र-तिबन्धकतात्ववत्त्वोभयसम्बन्धेन, स्ववैशिष्ट्यं निश्चये स्वावच्छिन्नविषयतानिरूपित-विषयितात्वसम्बन्धेन, तादृशप्रतिबन्धकतात्ववत्त्वञ्च स्वव्यापकविषयितानिरूपकता-वच्छेदकधर्मवत्त्वसम्बन्धेन विषयितां स्वव्यापकत्वञ्च व्यापकसम्बन्धेन, तादृशधर्मतत्त्वञ्च स्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकत्वं स्वावच्छिन्नविष-

यित्वाव्यापकीभूतविषयिताशून्यज्ञानीयत्वोपलक्षितविषयितानिरूपकतावत्त्वावच्छेदक-त्वोभयसम्बन्धेन बोध्यमिति।

अत्र शङ्का वर्तते एवं रीत्या यदि लक्षणं परिष्कृत्य समन्वयः क्रियते तर्हि 'ह्रदो धूमवान् वह्नेः' इत्यत्र बाधविशिष्टव्यभिचारे अर्थात् धूमाभाववद्ध्रदविशिष्टधूमाभाव-वद्वृत्तिवह्निरूपव्यभिचारेऽतिव्याप्तिर्भवेत्। तथाहि स्वं धूमाभाववद्ध्रदविशिष्टधूमा-भाववद्वृत्तिवह्निरूपबाधविशिष्टव्यभिचारत्वं तदवच्छिन्नाविषयकप्रतीतिविषयता-वच्छेदकम्, अथ च प्रकृतह्रदो धूमवान् धूमव्याप्यवह्निमान् चेत्याकारकानुमितित्व-व्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिविषयितानिरूपकताव-च्छेदकं च यद्रूपमित्युक्तौ व्यभिचारविशिष्टबाधत्वं भवति। तद्रूपावच्छिन्नाविषयक-प्रतीतिविषयतावच्छेदकं यत् स्वपदगृहीतबाधविशिष्टव्यभिचारत्वं तद्वत्त्वं बाधविशिष्टव्यभिचारे वर्तते इत्यतिव्याप्तिः। तन्निषेधाय लक्षणस्थविशिष्टान्तरा-घटितावच्छेदकघटकयद्रूपे स्वावच्छिन्नविषयितानिरूपकतावच्छेदकत्वरूपविशेषणं देयम्। तथा च लक्षणमित्थं पर्यवस्यति स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं, स्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकं, अथ च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितस्वावच्छिन्नविषयकत्वव्यापकप्रति-बन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं यद्रूपं तद्रूपावच्छिन्नाविषयक-प्रतीतिविषयतावच्छेदकं यत् स्वपदग्राह्यरूपं तद्रूपवत्त्वमिति। 'ह्रदो धूमवान् वह्नेः' इत्यादौ बाधविशिष्टव्यभिचारे नातिव्याप्तिः। तथाहि व्यभिचारविशिष्टबाधत्वे स्वपदगृहीतबाधविशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य प्रकृतह्रदः धूमवान् धूमव्याप्यवह्निमान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यता-निरूपितस्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिविषयिता-निरूपकतावच्छेदकत्वस्य च सत्त्वेऽपि स्वपदगृहीतबाधविशिष्टव्यभिचार-त्वावच्छिन्नविषयित्वाव्यापकविषयित्वशून्यज्ञाननिष्ठविषयित्वनिरूपकतावच्छेदकत्व-

स्य तत्र विरहात् यद्रूपपदेन व्यभिचारविशिष्टबाधत्वं स्वीकर्तुं न शक्यते । यस्मात् व्यभिचारविशिष्टबाधविषयकज्ञाने बाधविशिष्टव्यभिचारनिरूपितविषयित्वाव्यापकीभूताया विषयिताया एव स्यात् । अत एव ह्रदो धूमावान् वह्नेः इत्यत्र बाधविशिष्टव्यभिचारे नातिव्याप्तिर्भवेत् ।

परन्तु सर्वत्रापि लक्ष्येऽसम्भवः भवेत् । कथमिति चेत् ह्रदो वह्निमान् धूमाद् इत्यादौ ह्रदवृत्तिवह्न्यभावत्वरूपविपरीतबाधत्वे वह्न्यभाववद्ध्रदत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य प्रकृतह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितस्वभूतवह्न्यभाववद्ध्रदत्वावच्छिन्न -प्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकत्वस्य च सत्त्वेऽपि स्वभूतवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वस्य विरहात् यद्रूपपदेन ह्रदवृत्तिवह्न्यभावत्वरूपविपरीतबाधत्वं ग्रहीतुं न शक्यते इति असम्भवः। अत एव कल्पममुं परित्यज्य द्वितीयकल्पमवतारयति गदाधरः।

द्वितीयकल्पो हि – "**स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकता सामान्यावच्छेदकविषयितानिरूपकतावच्छेदकः कश्चित् स्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदको यस्य एवं भूतं यद्यत्स्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य विवक्षणीयतया**"[151] इति । अस्यार्थो हि स्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् यत्स्वं तत्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपं तद्रूपावच्छिन्नविषयतानिरूपितविषयित्वव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमिति । कल्पेऽस्मिन् स्वपदेन लक्ष्यतानवच्छेदकधर्मः ग्राह्यः। ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः। तथाहि स्वं मेयत्वविशिष्टवह्न्यभाववद्ध्रदत्वं तदवच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतात्व-

151 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५९८

व्यापिका या विषयिता इत्युक्तौ ह्रदो वह्न्यभाववान् इत्याकारकज्ञाननिष्ठविषयिता भवति । तन्निरूपकतावच्छेदकस्वभूतमेयत्वविशिष्टबाधत्वावच्छिन्नाविषयकप्रतीति-विषयतावच्छेदकं यद्रूपं वह्न्यभाववद्ध्रदत्वम् तदवच्छिन्नविषयतानिरूपितवि-षयित्वव्यापिका प्रकृतह्रदो वह्निमान् वह्निव्याप्यधूमवान् च इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता भवतीति कृत्वा वह्न्यभाववद्ध्रदे लक्षणसमन्वयः।

एवञ्च ह्रदो धूमवान् वह्नेः इत्यादौ धूमाभाववद्वृत्तिवह्निरूपव्यभिचारेऽपि लक्षणसमन्वयः। तथाहि स्वं मेयत्वविशिष्टव्यभिचारत्वं तदवच्छिन्नविषयकत्वव्यापक-प्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकस्वभूतमेयत्वविशिष्टव्यभिचारत्वा-वच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्यत्स्वं मेयत्वविशिष्टव्यभिचारत्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपं शुद्धधूमाभाववद्वृत्तिवह्नित्वं तदवच्छिन्नविषयतानिरूपितविषयित्वव्यापकत्वं वह्निः धूमाभाववद्वृत्तिः इत्याकारकज्ञानान्तर्भावेण प्रकृतह्रदो धूमवान् धूमव्याप्यवह्निमान् च इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायां वर्तते इति धूमाभाववद्वृत्तिवह्निरूपव्यभिचारे लक्षणसमन्वयः।

एवं ह्रदो धूमवान् वह्नेः इत्यत्रापि बाधविशिष्टव्यभिचारेऽपि नातिव्याप्तिः। कथं हि अत्र स्वपदेन लक्ष्यतानवच्छेदकीभूतबाधविशिष्टव्यभिचारत्वं ग्राह्यम् । तस्मिन् स्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकस्वा-वच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य सत्त्वात्तादृशबाधविशिष्टव्यभिचार-त्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य बाधविशिष्टव्यभिचारत्वे विरहात् नातिव्याप्तिर्भवेत् ।

परन्तु धूमव्यभिचारिवह्निमान् धूमवान् वह्नेः इत्यत्र धूमाभाववद्धूम-व्यभिचारिवह्निमद्रूपबाधेऽतिव्याप्तिर्भवेत् । तथाहि स्वं लक्ष्यतानवच्छेदकीभूतधूम-व्यभिचारिवह्निमत्त्वं तदवच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतासामान्यानतिरिक्त-

वृत्तिविषयितानिरूपकतावच्छेदकस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् यत्स्वं धूमव्यभिचारिवह्निमत्त्वं तदवच्छिन्नाविषयकप्रतीतिरित्युक्तौ धूमव्यभिचारिवह्निमान् धूमाभाववान् इत्याकारकप्रतीतिर्न भवतीति तद्विषयतावच्छेदकत्वं यद्रूपभूतधूमाभाववद्धूमव्यभिचारिवह्निमत्त्वे उपपादयितुं न शक्यते इति धूमाभाववद्धूमव्यभिचारिवह्निमद्रूपबाधेऽव्याप्तिः। अत एव प्रकृतस्थलीयबाधेऽव्याप्तिदोषवारणाय तृतीयकल्पम् अवतारयति गदाधरः।

वस्तुतस्तु 'न च' इति द्वितीयकल्पस्यानुगमस्तु धर्मविशिष्टधर्मवत्त्वं हेत्वाभासत्वम्, वैशिष्ट्यं च स्वतादात्म्यस्वविशिष्टनिश्चयत्वव्यापकप्रकृतानुमितिप्रतिबन्धकताकालीनधर्मवृत्तिधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वोभयसम्बन्धेन, धर्मवृत्तित्वं धर्मे स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकत्वस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वैतत् त्रितयसम्बन्धेनेति ।

तृतीयकल्पो हि गदाधरस्य "**स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकता सामान्यावच्छेदकीभूतयत्किञ्चिद्विषयत्वं यादृशयादृशधर्मावच्छिन्नानिरूपिततादृशतादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तद्रूपावच्छिन्नत्वमेव**"[152] इति । अस्यार्थो हि स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतात्वव्यापकं यत्किञ्चिद्विषयित्वं यादृशयादृशधर्मावच्छिन्नानिरूपितं तादृशतादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तद्वत्त्वमिति ।

एतद्वारा ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववद्ध्रदरूपबाधे समन्वयः। तथाहि अत्र स्वपदेन लक्ष्यतावच्छेदकधर्मो ग्राह्यः। स्वं वह्न्यभाववद्ध्रदत्वं

---

152 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५९८

तदवच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतात्वव्यापकं यत्किञ्चिद्विषयित्वमित्युक्तौ ह्रदो वह्निमान् वह्न्यभाववान् इत्याकारकज्ञाननिष्ठं वह्न्यभाववद्ध्रदत्वावच्छिन्न-विषयतानिरूपितविषयित्वं भवति । तच्च विषयित्वं घटत्वाद्यनिरूपितं भवतीति कृत्वा तादृशघटत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् स्वपदगृहीतं वह्न्यभाववद्ध्रदत्वं तद्वत्त्वं वह्न्यभाववद्ध्रदे वर्तते इति समन्वयः।

ह्रदो धूमवान् वह्नेः इत्यादौ मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्निरूप-व्यभिचारेऽपि नातिव्याप्तिः स्यात् । कथमित्युक्तौ मेयत्वविशिष्टव्यभिचारत्वावच्छिन्न-विषयकत्वव्यापकप्रतिबन्धकतात्वव्यापकं यत्किञ्चित् विषयित्वमित्युक्ते शुद्धव्यभि-चारत्वावच्छिन्नविषयतानिरूपितविषयित्वं भवति । तच्च विषयित्वं यादृशयादृशपद-गृहीतमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नानिरूपितं भवतीति कृत्वा तादृशमेयत्व-विशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य मेयत्वविशिष्ट-व्यभिचारत्वे विरहेण नातिव्याप्तिः।

एवं धूमव्यभिचारिवह्निमान् धूमवान् वह्नेः इत्यत्रापि नाव्याप्तिः। तथाहि स्वं धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वं तदवच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतात्व-व्यापकं यत्किञ्चिद्विषयित्वमित्युक्तौ प्रकृते धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वाव-च्छिन्नविषयतानिरूपितत्वस्य सत्त्वात्तादृशघटत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयता-वच्छेदकत्वं धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वे वर्तते इति नाव्याप्तिः।

'न च' इति तृतीयकल्पस्यानुगमस्य धर्माविशिष्टधर्मवत्त्वे हेत्वाभासत्वमिति, वैशिष्ट्यञ्च स्वतादात्म्यस्वविशिष्टधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वो-भयसम्बन्धेन, स्ववैशिष्ट्यं धर्मे स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रति-बन्धकतात्वव्यापकविषयितावृत्तित्वसम्बन्धेन, वृत्तित्वञ्च स्वावच्छिन्ननिरूपितत्व-संसर्गावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन, विषयितायां तादृशप्रतिबन्धकतात्वव्यापकत्वन्तु स्वाव्यापकत्वसम्बन्धेन ।

गदाधरस्य चतुर्थः 'न च' इति कल्पः - **"यद्धर्मावच्छिन्नविषयकत्वावच्छिन्न-प्रतिबन्धकता सामान्यावच्छेदकीभूतविषयितात्वं यद्धर्मावच्छिन्ननिरूपितत्वव्याप्यं तद्धर्मवत्त्वमेव"**[153] इति । अस्यार्थो हि अयं यद्धर्मावच्छिन्नविषयकत्वव्यापकप्रति-बन्धकतात्वव्यापकविषयितागतविषयितात्वं व्यापकं यद्धर्मावच्छिन्ननिरूपितत्वं तद्धर्मवत्त्वमिति । ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववद्ध्रदरूपबाधे लक्षण-समन्वयः। वह्न्यभाववद्ध्रदत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतवह्न्य-भाववद्ध्रदत्वावच्छिन्ननिरूपितविषयितात्ववह्न्यभाववद्ध्रदत्वावच्छिन्ननिरूपितत्व-व्याप्यत्वस्य सत्त्वाल्लक्षणसमन्वयः।

एवं धूमव्यभिचारिवह्निमान् धूमावान् वह्नेः इत्यत्रापि धूमाभाववद्धूम-व्यभिचारिवह्निमद्रूपबाधे लक्षणसमन्वयः। तथाहि धूमाभाववद्धूमव्यभिचारिवह्नि-मत्त्वावच्छिन्ननिरूपितत्वे धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वावच्छिन्नविषयकत्व-व्यापकप्रतिबन्धकतात्वव्यापकविषयितात्वव्यापकत्वस्य सत्त्वाल्लक्षणसमन्वयः।

परन्तु तृतीयकल्पे चतुर्थकल्पे च ह्रदो धूमवान् वह्नेः इत्यत्र बाधविशिष्ट-व्यभिचारेऽतिव्याप्तिः तदवस्थैव । तथाहि तृतीयकल्पे प्रथमतः पश्यामः। स्वावच्छिन्न-विषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतयत्किञ्चिद्विषयत्वं यादृश-यादृशधर्मावच्छिन्नानिरूपितं तादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तद्वत्त्वमिति । तत्र स्वपदेन धूमाभाववद्ध्रदविशिष्टधूमाभाववद्वृत्तिवह्नित्व-रूपबाधविशिष्टव्यभिचारत्वं स्वीक्रियते । तदवच्छिन्नविषयकत्वव्यापकप्रति-बन्धकतासामान्यावच्छेदकीभूतयत्किञ्चिद्विषयित्वमित्युक्तौ न केवलबाधनिरूपित-विषयिता न वा केवलव्यभिचारनिरूपितविषयिता । यस्मात् बाधज्ञाननिष्ठ-प्रतिबन्धकता निरूपितावच्छेदकता व्यभिचारनिरूपितविषयितायां न वर्तते । एवं व्यभिचारनिष्ठप्रतिबन्धकतावच्छेदकता बाधनिरूपितायां विषयितायां नास्ति । परन्तु

---

153 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५९९

बाधविशिष्टव्यभिचारत्वावच्छिन्ननिरूपितविषयितायामेव तादृशप्रतिबन्धकतावच्छेद-कतायाः सत्त्वात् तादृशविषयिता घटत्वाद्यवच्छिन्नानिरूपिता भवतीति कृत्वा घटत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं बाधविशिष्टव्यभिचारत्वं भवति तद्वत्वं बाधविशिष्टव्यभिचारे वर्तते इत्यतिव्याप्तिः।

एवञ्च चतुर्थे 'न च' इति कल्पेऽपि बाधविशिष्टव्यभिचारेऽतिव्याप्तिः। कथमित्युक्तौ लक्षणस्वरूपमेवं वर्तते यद्धर्मावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकता-सामान्यावच्छेदकीभूतविषयितात्वं यद्धर्मावच्छिन्ननिरूपितत्वव्याप्यं तद्धर्मवत्त्वमिति बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतासामान्यावच्छेदकीभू -तविषयितात्वं बाधविशिष्टव्यभिचारत्वावच्छिन्ननिरूपितत्वव्याप्यं भवतीति अतिव्याप्तिर्भवति।

अत एव तृतीयकल्पे चतुर्थकल्पे च बाधविशिष्टव्यभिचारेऽतिव्याप्तिर्भवतीति कृत्वा न तयोर्निर्दुष्टता। तर्हि धूमव्यभिचारिवह्निमान् धूमवान् वह्नेः इत्यत्र धूमाभाववद्धर्मव्यभिचारिवह्निमद्रूपव्यभिचारघटितबाधेऽव्याप्तिः कथं वार्यते इति प्रश्नो जायते। प्रश्नस्यास्य समाधानं हि – यथा वह्न्यभावादिरूपधर्मिता-वच्छेदकवह्निप्रकारकज्ञानस्य वह्न्यभाववान् पर्वतः वह्निमान् इत्याकारकस्य न अनाहार्यरूपत्वं स्वीक्रियते। तथैव धूमव्यभिचारिवह्निधर्मितावच्छेदकधूम-व्याप्यवह्निप्रकारकं यत् धूमव्यभिचारिवह्निमान् धूमवान् धूमव्याप्यवह्निमान् च इत्याकारकज्ञानं तत् नानाहार्यम्। अपि तु आहार्यमेव। आहार्यज्ञानस्य किञ्चिज्ज्ञाननिरूपितप्रतिबन्धकत्वं किञ्चिन्निरूपितप्रतिबध्यत्वम् वा न भवतीति। एवञ्च अनुमितेः परोक्षत्वादानाहर्यतया धूमव्यभिचारिवह्निमत्पक्षकधूमसाध्यक-वह्निहेतुकस्थलीयसमूहालम्बनानुमितेरप्रसिद्धत्वाद् यद्रूपावच्छिन्नविषयितानिरूपित-विषयिताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमिति यथाश्रुतलक्षणे धूमाभाववद्धूमव्यभिचारिवह्निमद्रूपबाधे अतिव्याप्तिर्भवति। तत्प्रतिपादनञ्च दीधितिकारः अग्रे स्वयमेव वक्ष्यति। तस्मात्

इदानीं अस्य निराकरणमनावश्यकम् ।

## ४.६) 'अत्र वदन्ति' इति कल्पविवेकः –

अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयतानिरूपितविषयित्वव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता । तद्रूपविशिष्टत्वं हेत्वाभासत्वमिति । ह्रदो वह्निमान् द्रव्यत्वाद् इत्यत्र लक्षणसमन्वयः। अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताव्यापकत्वं 'ह्रदः वह्न्यभाववान्' इति निश्चयान्तर्भाविण 'ह्रदः वह्निमान् वह्निव्याप्यद्रव्यत्ववान् च' इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायां वर्तते इति कृत्वा तद्रूपविशिष्टत्वं वह्न्यभाववद्ध्रदरूपबाधत्वे वर्तते इति समन्वयः। परन्तु 'निर्वह्निः पर्वतः वह्निमान्' इत्यत्र वह्निमत्पर्वतरूपाश्रयासिद्धौ अव्याप्तिः। अत्र प्रकृतानुमितिपदेन 'निर्वह्निः पर्वतः वह्निमान् वह्निव्यापधूमवान् च' इति स्वीकर्तुं न शक्यते । यस्मात् 'निर्वह्निः पर्वतः वह्निमान्' इत्याकारकस्य ज्ञानस्य आहार्यत्वात् । अनुमितित्वविशिष्टस्य आहार्यत्वाभावात्, अनुमितिपदेन 'निर्वह्निः पर्वतः वह्निमान्' इति धर्तुं न शक्यते । एवञ्च उक्ताकारस्य प्रकृतानुमितिपदेन ग्रहणासम्भवात् अव्याप्तिः इति इमामव्याप्तिं वारयितुमत्र वदन्ति इति कल्प आरब्धः – **"अत्र वदन्ति – यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तः तदुत्तरमनुमितौ अनाहार्यमानसज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्यसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगा**

**-हित्वस्य च द्वयोः व्यतिरेकः तत्त्वं हेतुदोषत्वम्"**[154] इति दीधितिकारः। अर्थात् यद्रूपावच्छिन्नविषयकानाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयाव्यवहितोत्तरानुमिति-त्वव्यापकः अनाहार्यमानसज्ञानत्वव्यापको वा विरोधिविषयताप्रयुक्तः प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकार-ताकत्वप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यनिरूपितव्याप्तिविशिष्टप्रकृतहेतुतावच्छे-दकावच्छिन्नप्रकारताकत्वोभयाभावः तद्रूपावच्छिन्नत्वमिति। 'ह्रदो वह्निमान् धूमाद्' इत्यत्र लक्षणसमन्वयः। अत्र यद्रूपपदेन वह्न्यभाववद्ध्रदत्वं ग्राह्यम् । वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकनिश्चय इत्युक्तौ ह्रदो वह्न्यभाववान् इत्याकारकः तदव्यवहितोत्तरं जायमाना अनुमितिरित्युक्तौ ह्रदो वह्निमान् इत्याकारिका न भवति इति । यस्मात् तादृशानुमित्यव्यवहितपूर्वक्षणे प्रतिबन्धकीभूतस्य 'ह्रदो वह्न्यभाववान्' इत्याकारस्य निश्चयस्य सत्त्वात् । परन्तु 'भूतलं घटवद्' इत्याकारिकानुमितिः, तादृशानुमितिसामान्ये ह्रदत्वावच्छिन्नविशेष्यतानिरूपित-वह्नित्वावच्छिन्नप्रकारताकत्ववह्नित्वावच्छिन्ननिरूपितव्याप्तिविशिष्टधूमवत्त्वावच्छि-न्नप्रकारतात्वोभयाभावो वर्तते । स च उभयाभावः 'ह्रदो वह्न्यभाववान्' इत्याकारकनिश्चयनिष्ठवह्न्यभावविशिष्टह्रदविषयितारूपविरोधिविषयिताप्रयुक्त इति कृत्वा तद्रूपविशिष्टत्वं वह्न्यभाववद्ध्रदे वर्तते इति समन्वयः। अत्र आशङ्कते – पूर्वं लक्षणसमन्वयकाले ह्रदत्वविशिष्टे वह्निवैशिष्ट्यावगाहित्ववह्निव्याप्यधूम-वैशिष्ट्यावगाहित्वोभयाभावो वर्तते । स च विरोधिविषयिताप्रयुक्त इत्युक्तः। तत्र कथमुभाभावे विरोधिविषयताप्रयुक्तत्वमिति चेत्, वह्न्यभाववान् ह्रदः इति निश्चयनिष्ठप्रतिबन्धकतावच्छेदकीभूतः यः वह्न्यभावविशिष्टह्रदविषयितात्मकः धर्मः। स च वह्न्यभाववद्ध्रदविषयकनिश्चयोत्तरजायमानघटवद्भूतलमित्याद्यनुमितौ

---

[154] सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १६०६

वर्तमानं ह्लदत्वविशिष्टे वह्निवैशिष्ट्यावगाहित्वरूपप्रतिबध्यतावच्छेदकीभूतस्य धर्मस्य अभावं प्रति प्रयोजकः भवतीति कृत्वा विरोधिविषयिताप्रयुक्तत्वमुभयाभावे वर्तते इति समन्वयः।

निर्वह्निः पर्वतः वह्निमान् धूमादित्यादौ वह्निमत्पर्वतत्वमिति धर्मः यद्रूपपदेन ग्राह्यः तदवच्छिन्नविषयकनिश्चयोत्तरं जायमाना अनुमितिः इत्युक्तौ भूतलं घटवद् घटव्याप्यपटवच्च इत्यनुमितिः तादृशानुमितिसामान्ये निर्वह्नित्वविशिष्ट-पर्वतत्वावच्छिन्ने वह्नित्ववैशिष्ट्यावगाहित्ववह्निनिरूपितव्याप्तिविशिष्टधूमत्वाव-च्छिन्नधूमवैशिष्ट्यावगाहित्वोभयाभावो विरोधिविषयिताप्रयुक्त इति तद्रूपवत्त्वं वह्निमत्पर्वते वर्तते इति लक्षणसमन्वयः।

इदानीमत्रोक्तलक्षणस्य दलसार्थक्यं कथ्यते – अस्मिन् लक्षणे यद्विषयकनिश्चयोत्तरानुमितिसामान्येत्यत्र लाघवात् यद्विषयिताप्रयुक्तः पक्षता-वच्छेदकविशिष्टपक्षे साध्यतावच्छेदकवैशिष्ट्यावगाहित्वसाध्यव्याप्यहेतुवैशिष्ट्याव-गाहित्वोभयाभावः तद्रूपवत्त्वमिति लक्षणं भवतु इत्याशङ्कते ।

तथा सति ह्लदो वह्निमान् जलादित्यत्र वह्न्यभाववद्ध्रदादिरूपबाधैकदेशे वह्न्यभावादौ अतिव्याप्तिः। कथम् हि वह्न्यभाववान् ह्लदः इत्याकारकज्ञानीय-वह्न्यभावविशिष्टह्लदविषयतायाः ह्लदत्वविशिष्टे वह्नित्वविशिष्टवह्निवैशिष्ट्याव-गाहित्ववह्निव्याप्यधूमवैशिष्ट्यावगाहित्वोभयाभावप्रयोजकत्ववद् वह्न्यभाववान् ह्लद इत्याकारकज्ञानान्तःपातिवह्न्यभावत्वावच्छिन्नविषयितायाः अपि प्रतिबन्धक-तावच्छेदककोटिप्रविष्टत्वेनोक्तोभयाभावप्रयोजकत्वं वर्तते इति कृत्वा यद्रूपपदेन वह्न्यभावत्वं स्वीकृत्य तदवच्छिन्नविषयिताप्रयुक्तः उक्तोभयाभावः तद्रूपविशिष्टत्वं वह्न्यभावे वर्तते इत्यतिव्याप्तिः। तद्वारणाय यद्विषयकनिश्चयोत्तरानुमितित्व-व्यापकत्वं विरोधिविषयिताप्रयुक्तोभयाभावे निवेशनीयम् । प्रकृते यद्रूपपदेन वह्न्यभावत्वं गृहीतुं न शक्यते । यस्मात् गृह्यते चेत् वह्न्यभावत्वावच्छिन्न-विषयकनिश्चयोत्तरं जायमाना अनुमितिः इत्युक्तौ ह्लदो वह्निमान् इत्यनुमितिर्भवति ।

तत्पूर्वक्षणे प्रतिबन्धकज्ञानस्य असत्त्वात् । एवं च ह्रदो वह्निमान् इत्याकारकमनुमितित्वं यत्र यत्र वर्तते ह्रदो वह्निमान् इत्यनुमितौ, तत्र प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताक-त्वप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्न -हेतुप्रकारताकत्वोभयमेव वर्तते इति कृत्वा विरोधिविषयिताप्रयुक्तोभयाभावे वह्न्यभावत्वावच्छिन्नविषयकनिश्चयोत्तरजायमानानुमितित्वव्यापकत्वविरहात् तद्रूप-विशिष्टत्वं वह्न्यभावे नास्ति इति नातिव्याप्तिः।

पुनः आशङ्कास्ति – यद्रूपावच्छिन्नविषयितानिरूपितविषयितासामान्ये प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रका-रताकत्वप्रकृतसाध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्टप्रकृतहेतुतावच्छिन्नप्रका -रताकत्वोभयाभावः तत्त्वमित्येव भवतु । पूर्वं या बाधैकदेशे वह्न्यभावे अतिव्याप्तिः आशङ्किता । सापीदानीं वारिता कथमित्युक्तौ शुद्धवह्न्यभाव इत्याकारकज्ञानीयवह्न्यभावत्वावच्छिन्ननिरूपितविषयितासामान्ये प्रकृतपक्षताव-च्छेदकीभूतह्रदत्वावच्छिन्नप्रकारताकत्वप्रकृतसाध्यतावच्छेदकीभूतवह्नित्वावच्छिन्न-निरूपितव्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकधूमत्वावच्छिन्नप्रकारताकत्वोभयाभावप्रयो-जकत्वविरहात् नातिव्याप्तिः। अत एव  लाघवात् एतदेव लक्षणं भवतु इति ।

अत्र समाधानं हि – एवं रीत्या लक्षणार्थकरणे 'पर्वतो वह्निमान् धूमाद्' इत्यत्र पाषानमयत्ववत्पर्वतेऽतिव्याप्तिः। कथमित्युक्तौ पाषाणमयः वह्न्यभाववान् पाषाणमयश्च पर्वतः इत्याकारकनिश्चयस्य निश्चयविशिष्टनिश्चयत्वेन पर्वतो वह्निमान् वह्निव्याप्यधूमवान् चेत्याकारकानुमितिं प्रति प्रतिबन्धकतया ज्ञानभेदेन विषयितायाः भेदस्वीकारेण पाषाणमयत्ववत्पर्वतत्वावच्छिन्नविषयितानिरूपित-विषयिताप्रयोज्यत्वं पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारता-कत्वं वह्निवत्त्वावच्छिन्ननिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारताकत्वो-

भयाभावे भवतीति कृत्वा पाषाणमयत्ववत्पर्वतेऽतिव्याप्तिः। अत एव सामान्यपदं निवेश्य ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभावेऽतिव्याप्तिवारणप्रकारस्तु न युक्तः। परन्तु विशेष्यदलोपादायैव अतिव्याप्तिवारणं कर्तव्यमिति।

प्रकृते पर्वतो वह्निमान् धूमादित्यादौ पाषाणमयत्ववत्पर्वतेऽतिव्याप्तिः वार्यते। कथमित्युक्तौ समानाकारकज्ञानीयविषयितयोः भेदस्वीकारेऽपि पाषाणः न वह्निमान् इत्याकारकनिश्चयासमानकालीनकेवलपर्वतः पाषाणमयः इत्याकारकनिश्चयस्य पर्वतो वह्निमान् वह्निव्याप्यधूमवान् चेत्याकारकानुमित्यप्रतिबन्धकत्वेन पर्वतः पाषाणमय इत्याकारकनिश्चयाव्यवहितोत्तरानुमितिसामान्येऽन्तर्गतायां पर्वतो वह्निमान् इत्यनुमितौ प्रकृतपक्षतावच्छेदकपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसाध्यताव-च्छेदकवह्नित्वावच्छिन्ननिरोपोपितव्याप्तिविशिष्टधूमप्रकारताकत्वप्रकृतसाध्यतावच्छे-दकवह्नित्वावच्छिन्नप्रकारताकत्वोभयस्यैव सत्त्वात् नातिव्याप्तिः। अत्र लक्षणे अनुमितिसामान्येति किमर्थमर्थात् यद्रूपावच्छिन्नविषयितानिरूपितविषयिताशालि-निश्चयाव्यवहितोत्तरानुमितित्वसमानाधिकरणः यः प्रकृतपक्षतावच्छेदकावच्छिन्न-विशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वप्रकृतसाध्यनिरूपित-व्याप्तिविशिष्टप्रकृतहेतुप्रकारताकत्वोभयाभावः विरोधिविषयिताप्रयुक्तः तद्रूपवत्त्वम् इत्येव लक्षणं भवतु इति आशङ्कास्ति। तथा सति ह्रदो वह्निमान् धूमादित्यादौ बाधैकदेशे ह्रदादौ पुनः अतिव्याप्तिः भवेत्। कथमित्युक्तौ ह्रदो वह्न्यभाववान् इत्याकारकज्ञानीयह्रदत्वावच्छिन्नविषयितानिरूपितविषयिताशालिनिश्चयाव्यवहितो-त्तरानुमितित्वाधिकरणं भूतलं घटवत् घटव्याप्यवच्चेत्याकारकानुमितिवृत्तिः यः तादृशपक्षे साध्यवैशिष्ट्यावगाहित्वसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वोभयाभावः विरोधिविषयिताप्रयुक्तः वर्तते इति कृत्वा तद्रूपवत्त्वं बाधैकदेशभूतह्रदादौ सम्भवति इति अतिव्याप्तिः स्यात्। तन्निषेधाय अनुमितिसामान्यमिति लक्षणे निवेशनीयम्। इदानीं ह्रद इति निश्चयाव्यवहितोत्तरं जायमानानुमितिसामान्यान्तर्गतायां ह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्याकारकानुमितौ तादृशोभयस्य सत्त्वान्नातिव्याप्ति-

सम्भावनेति ।

अत्र यद्विषयकनिश्चये इत्यत्र यद्रूपावच्छिन्नविषयतानिरूपितविषयिताशालिनिश्चयो इत्यर्थो वर्णनीयः। अन्यथा ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववद्ध्रदादेः दोषत्वम् न स्यात् । कथमित्युक्तौ ह्रदत्वेन रूपेण वह्न्यभावविशिष्टह्रदावगाहिनिश्चयः इत्युक्तौ ह्रद इत्याकारको निश्चयस्तदुत्तरं जायमानानुमितिरित्युक्तौ ह्रदो वह्निमान् इत्यनुमितिः। यस्मात् एतदनुमितेः प्राक्क्षणे प्रतिबन्धकज्ञानस्यासत्त्वात् । एतदनुमितित्वं यत्र यत्र वर्तते ह्रदो वह्निमान् वह्निव्याप्यधूमवान् च इत्याकारकानुमितौ वर्तते तत्र सर्वत्रापि ह्रदत्वावच्छिन्नविशेष्यता निरूपितवह्नित्वावच्छिन्नप्रकारताकत्ववह्नित्वावच्छिन्नवह्निनिरूपितव्याप्तिविशिष्ट-हेतुतावच्छेदकविशिष्टप्रकारताकत्वोभयमेव वर्तते । न हि उभयाभावो नास्तीति तस्य दोषत्वं न स्यात् । अत एव यद्विषयकनिश्चयेत्यस्य यद्रूपावच्छिन्नविषयिताशालिनिश्चय इत्यर्थो वक्तव्यः। एवं च वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतामादाय प्रकृते समन्वय इति ।

एवं लक्षणे यद्विषयकनिश्चयेत्यनुक्त्वा यद्रूपावच्छिन्नविषयताशालिज्ञानाव्यवहितोत्तरानुमितौ उभयाभावः विवक्ष्यतामिति चेत्तर्हि ह्रदो वह्निमान् धूमादित्यत्र वह्न्याभाववद्ध्रदादेः दोषत्वं न स्यात् । कथं वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताशालिज्ञानमित्युक्तौ ह्रदः वह्निमान् न वा इत्याकारकं संशयात्मकं ज्ञानं स्वीक्रियते । तदुत्तरं जायमानायां ह्रदो वह्निमान् वह्निव्याप्यधूमवान् ह्रदः इत्यनुमितौ ह्रदत्वावच्छिन्नविशेष्यकवह्नित्वावच्छिन्नप्रकारकत्ववह्निव्याप्तिविशिष्टधूमप्रकारताक-त्वोभयमेव वर्तते । न हि उभयाभावः इति वह्न्यभाववद्ध्रदादेः दोषत्वं न स्यात् । तद्वारणाय लक्षणे ज्ञानत्वेन रूपेण ज्ञानविशेषस्य निवेशः न क्रियते परन्तु निश्चयत्वेन एव । एवं सति प्रकृते वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताशालिनिश्चयोत्तरम् ह्रदो वह्निमान् इत्याद्यनुदयान्न दोषः।

अत्र आशङ्कते यद्विषयकनिश्चयोत्तरानुमितिसामान्येत्येवं रीत्या लक्षणं

कथ्यतामिति । किमर्थम् अव्यवधाननिवेशः। समाधत्ते लक्षणे अव्यवधानपदानुपादाने ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववद्ध्रदादौ अव्याप्तिः स्यात् । तथाहि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतानिरूपितविषयितावतः ह्रदः वह्न्यभाववान् इत्याकारकनिश्चयस्य विनाशकाले प्रतिबन्धकताविरहेण ह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्याकारकानुमितेः जायमानत्वात् तत्र च अनुमितौ तादृशोभयस्यैव सत्त्वादव्याप्तिः। तद्वारणाय लक्षणे अव्यवधाननिवेशः करणीयः। तथा सति ह्रदो वह्निमान् इत्याकारिका हि न भवति । परन्तु अनुमित्यन्तरं भवति । तादृशानुमितौ तादृशोभयाभावस्य सत्त्वान्नाव्याप्तिः।

एवं लक्षणे उत्तरपदानुपादाने तत्रैव पुनः अव्याप्तिः भवेत् । तथाहि वह्न्यभाववद्ध्रदादिविषयकलौकिकनिश्चयाव्यवहितपूर्वानुमितिसामान्यान्तर्गतानुमितिरित्युक्तौ 'ह्रदो वह्निमान् वह्निव्याप्यधूमवान् च' इत्याकारिकापि । तत्र च विरोधिविषयिताप्रयुक्तोभयाभावस्यासत्त्वादव्याप्तिः। तन्निषेधाय उत्तरपदम् उपादेयमिति ।

कल्पममुं परित्यज्य कल्पान्तरगमने किं बीजमिति इदानीं कथ्यते लक्षणस्वरूपमेवं भवति – यद्रूपावच्छिन्नविषयतानिरूपितविषयिताशालिनिश्चयाव्यवहितोत्तरानुमितिव्यापको यो विरोधिविषयिताप्रयोज्योभयाभावः तद्रूपवत्त्वम् इति । यत्पक्षकयत्साध्यकयद्धेतुकस्थले यादृशदोषविषयकनिश्चयानन्तरं प्रतिबन्धकवशात् सामग्रीविरहात् वा कस्याप्यनुमितिः न जाता । तत्र तादृशानुमितेः अप्रसिद्धावव्याप्तिः। अत एव लक्षणेऽनुमितिपदं परित्यज्यानाहार्यमानसज्ञाने वेति कल्पान्तरमनुसरणं कृतम् । तत्रानुमितिविरहेऽपि ज्ञानलक्षणासन्निकर्षजन्यप्रत्यक्षं शाब्दबोधो वा जायते । एवञ्च लक्षणस्वरूपमेवं भवति । यद्रूपावच्छिन्नविषयतानिरूपितविषयिताशालिनिश्चयाव्यवहितोत्तरजायमानानाहार्यमानसज्ञानत्वव्यापकविरोधिविषयिताप्रयुक्तप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वप्रकृतसाध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्टप्र-

कृतहेतुतावच्छेदकावच्छिन्नप्रकारताकत्वोभयाभावस्तद्रूपवत्त्वमिति ।

'ह्रदो वह्निमान् धूमाद्' इत्यत्र वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः। तथाहि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतानिरूपितविषयिताशालिनिश्चयः ह्रदः वह्न्यभाववान् इत्याकारकः भवति । तदव्यवहितोत्तरं जायमानं यत् मानसज्ञानम् इत्युक्तौ घटादिविषयकं मानसज्ञानं भवति । तादृशज्ञानत्वव्यापको विरोधिविषयता-प्रयुक्तश्च प्रकृतपक्षतावच्छेदकीभूतह्रदत्वावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेद-कीभूतवह्नित्वावच्छिन्नप्रकारताकत्वप्रकृतसाध्यतावच्छेदकीभूतवह्नित्वावच्छिन्न-निरूपितव्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकधूमत्वावच्छिन्नप्रकारताकत्वोभयाभावो भवतीति तद्रूपवत्त्वं वह्न्यभाववद्ध्रदे वर्तते इति लक्षणसमन्वयः।

# पञ्चमोऽध्यायः

# || पञ्चमोऽध्यायः ||

## तृतीयहेत्वाभाससामान्यलक्षणविवेकः

आचार्यैर्गङ्गेशोपाध्यायैः परिशेषे तृतीयहेत्वाभाससामान्यलक्षणं लक्षितम् – **"ज्ञायमानं सदनुमितिप्रतिबन्धकं यत्तत्त्वं वा"**[155] इति । अत्रेदमवधेयं यत् ज्ञायमानं लिङ्गम् अनुमितिकरणमिव मतमिव ज्ञायमानबाधादिः प्रतिबन्धक इति मतविशेषो वर्तते । तन्मते यद्विषयकज्ञानस्य नानुमितिप्रतिबन्धकत्वमिति तन्मतविशेषमाश्रित्य लक्षणमिदं प्रणीतमाचार्यैः ।

अत्र यत्पदेन यद्रूपावच्छिन्नविषयतासामान्यं ग्राह्यं, ज्ञायमानं यद् यद्रूपावच्छिन्नविषयतासामान्यम्, अनुमितिप्रतिबन्धकम् अनुमितित्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकं, तत्त्वं तद्रूपवत्त्वमिति लक्षणसमन्वयः। ज्ञानीययद्रूपावच्छिन्नविषयताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपित-प्रतिबन्धकता तद्रूपावच्छिन्नत्वं समुदितलक्षणार्थः। अत्र लक्षणेऽपि अनुमितिपदं साध्यव्याप्यहेतुमान् पक्षः साध्यवान् इत्याकारकानुमितिपरमिति गङ्गाटीकायामपि आटीकितमेवम् – **"अनुमितिपदं प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदक-**

---

155 सा.नि.प्र., सम्पा. वामाचरणभट्टाचार्य, पृ. – ०३

**विशिष्टवैशिष्ट्यावगाहि – अथ च साध्यनिरूपितव्याप्तिविशिष्टहेतुवैशिष्ट्यावगाह्यनुमितिपरम् । तेन व्यभिचारादौ नाव्याप्तिः। तथा च ज्ञानीययद्रूपावच्छिन्नविषयतासामान्यं प्रकृतानुमितिप्रतिबन्धकतावच्छेदकं तद्रूपवत्त्वम्"**[156] इति । अत एव वह्न्यभाववान् ह्रद इति ज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताव्यापिका ह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता वर्तते तद्रूपावच्छिन्नत्वस्य वह्न्यभाववद्ध्रदे सत्त्वाल्लक्षणसमन्वयः।

## ५.१) 'दशाविशेष'कल्पविवेकः –

यन्मते ज्ञायमानव्यभिचारादिरेव प्रतिबन्धकस्तन्मते लक्षणमिदमसम्भवीति लक्षणान्तरमुच्यते – "ज्ञायमानं सदनुमितिप्रतिबन्धकं यत्तत्त्वं वा" इति । वस्तुतस्तु सिद्ध्यादौ अतिव्याप्तिवारणाय ज्ञायमानमिति । ननु तत्पक्षहेतुसाध्यकानुमितिप्रतिबन्धकताघटितस्य लक्षणतया निर्वह्निः पर्वतो वह्निमान् इत्यादौ बाधादेः हेत्वाभासत्वं न भवेत् । तत्पक्षसाध्यकानुमितेरप्रसिद्धेरिति चेन्न, यद्धर्मावच्छिन्नपक्षकयद्धर्मावच्छिन्नसाध्यकयद्धर्मावच्छिन्नहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वे तावन्मात्रविशेष्यकज्ञानविशेष्यत्वे वा तात्पर्यात् ।

ननु दुष्टहेतोः पञ्चविधत्वमसाधारणसत्प्रतिपक्षावादायैव, तच्च न सम्भवति । असाधारणतया नीयमाने शब्दपक्षकानित्यत्वसाध्यकशब्दत्वादिहेतौ सर्वसाध्यवत्साध्याभावद्व्यावृत्तत्वरूपस्यासाधारणस्य सत्प्रतिपक्षताया नीयमाने च शब्दो नित्यः शब्दत्वादित्यत्र शब्दो नित्यः नित्यत्वव्याप्यासमवेतद्रव्यत्वादौ साध्याभावव्याप्यवत्पक्षकत्वरूपस्य सत्प्रतिपक्षत्वस्य च विरहात्, तथाह्युक्तम् – 'दशाविशेष' इति । पक्षवृत्तिताभ्रमदशायां बाधनिश्चयविरहदशायाञ्च हेत्वोरेव, शब्दोऽनित्यः गगनात्,

---

[156] सा.नि., सम्पा. सुधाकरमालवीय, पृ. - ३५३

शब्दोऽनित्यः शब्दत्वादित्यत्रावृत्तिगगनादिशब्दत्वादिरूपदुष्टहेत्वोरेव । 'एव'कारेण प्रागुक्तसद्धेतुपक्षावृत्तिहेत्वोर्व्यवच्छेदः। तथा च पक्षवृत्तिताभ्रमदशायामवृत्तिगगनादेः असाधारणविधयानुमितिप्रतिबन्धकत्वात् शब्दोऽनित्यः कृतकत्वादित्यत्र शब्दनित्यत्वबाधनिश्चयविरहदशायां शब्दत्वहेतोः सत्प्रतिपक्षविधयानुमितिप्रतिबन्धकत्वाच्चाभासत्वमिति । केचित्तु[157] साध्यव्यापकीभूताभावप्रतियोगिहेतुमत्पक्षरूपस्य असाधारणत्वस्य साध्याभावव्याप्यवत्पक्षरूपस्य सत्प्रतिपक्षस्य च धियोऽनुमितिप्रतिबन्धके मानाभावो ग्राह्याभावानवगाहित्वादित्यत आहुः – **"दशाविशेषे हेत्वोरेवासाधारणसत्प्रतिपक्षयोराभासत्वात्तद्बुद्धेरप्यनुमितिप्रतिबन्धकत्वम्"**[158] इति । एवकारो भिन्नक्रमे । असाधारनसत्प्रतिपक्षयोर्हेत्वोर्दशाविशेष एव सत्प्रतिपक्षासाधारणत्वेन भानदशायमेवाभासत्वादनुमित्यजनकत्वादित्यर्थः। एवकारेण तदज्ञानदशायान्तु जननादिति सूचितम् । तथा च अन्वयव्यतिरेकात्तज्ज्ञानस्य

---

[157] अत्रेदं गदाधरस्य मतं स्मरणीयम् – असाधारण्यस्य पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगितात्मकस्य, सत्प्रतिपक्षस्य च पक्षनिष्ठसाध्याभावव्याप्यवत्त्वरूपस्य बुद्धेर्विरोधिविषयकतया साध्यवत्ताज्ञानविरोधित्वं निर्विवादमेव । एवञ्च तज्ज्ञानदशायां हेतोरनुमित्यजनकत्वात्तद्बुद्धेः प्रतिबन्धकत्वमावश्यकमित्येतादृशयथाश्रुतार्थपरस्य दशाविशेषे इत्यादिमूलस्यानुत्थितिः, अन्यथा साधारण्यादिज्ञानस्य प्रतिबन्धकताया अपि व्यवस्थापयितुमुचितत्वादतस्तादृशमूलमन्यथा व्याख्यातुमवतरणिकामाह स्यादेतदिति (दीधितिकारः)। इत्यात्रासाधारणे = एतस्थलीयासाधारण्यरूपदोषप्रकारकहेतुविशेष्यकभ्रमविषये सर्वसाध्यवद्व्यावृत्तत्वात्मके । अव्याप्तिरिति । तद्विषयकत्वस्य निरुक्तानुमित्यप्रतिबन्धकहेत्वविषयकज्ञानसाधारणतया तादृशप्रतिबन्धकतातिरिक्तवृत्तित्वादिति भावः। ननु केवलं सर्वसाध्यवद्व्यावृत्तत्वं न दोषोऽपि तु साधनवृत्तित्वविशेषिवत् तादृशविशिष्टविषयकत्वन्तु न प्रतिबन्धकातिरिक्तवृत्तीत्यत आह (दीधितिकारः) सर्वेति । तत्र=हेतौ, असत्त्वात्=अवृत्तेः, साध्यवति पक्षे हेतोर्वृत्तेरिति शेषः, तथा च तादृशविशिष्टस्याप्रसिद्ध्या तस्य दोषत्वासम्भवेन प्रसिद्धस्याविशिष्टसाध्यवद्व्यावृत्तत्वस्यैव तत्र दोषताया आवश्यकत्वमिति भावः।

अद्रव्यद्रव्यत्वादाविति=असमवेतद्रव्यत्वादावित्यर्थः। असमवेतत्वस्य ध्वंससाधारणतया नित्यत्वव्याप्यत्वासम्भवाद्विशेष्यांशनिवेशः। अत्राप्यनन्तरमव्याप्तिरित्यनुषज्यते, तद्विषयकत्वस्य पक्षाविषयकज्ञानसाधारणतया प्रतिबन्धकतातिरिक्तवृत्तित्वादिति भावः। ननु केवलं नित्यत्वव्याप्याद्रव्यत्वादिकं न तत्र दोषः, अपि तु पक्षनिष्ठतद्वत्त्वैव, तादृशविशिष्टविषयकत्वञ्च प्रतिबन्धकताननतिरिक्तवृत्तैवेत्यत आह(दीधितिकारः) पक्षस्येति । तथा च पक्षघटितविशिष्टाप्रसिद्ध्यापक्षाघटितस्यैव दोषत्वमावश्यकमिति भावः। तयोः=तादृशस्थलीयदोषत्वेनाभिमतयोरुक्तधर्मयोः। शब्दो नित्यः शब्दत्वादित्यादौ शब्दत्वादिविशेष्यकनित्यव्यावृत्तत्वादिज्ञानविषयविशिष्टस्य प्रसिद्ध्या तत्राव्याप्तेः शङ्कानास्पदत्वादलक्ष्यत्वाभ्युपगमेन तत्परीहारस्यात्यन्तासम्भवदुक्तिकत्वात् हेतुपदं सद्धेतुपरतया व्याचेष्टे हेत्वोरिति ।

[158] सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ. - २६६

प्रतिबन्धकत्वमिति भावः। तथा चैतदादायैव पञ्चविधत्वमुपपन्नमिति नव्याः। दीधितिकारस्तु उक्तस्थलेऽव्याप्तिमशङ्क्य तयोरलक्ष्यत्वेन तां निराकरोति दशाविशेष इति । हेतौ सर्वसाध्यवद्व्यावृत्तत्वस्य पक्षे साध्याभावव्याप्यस्य च भ्रमदशायामिति । हेत्वोः सद्धेत्वोरिति । एवकारश्च प्रतिबन्धकत्वमित्यनन्तरं योज्यः। आभासत्वान्नाम अनुमित्यजनत्वात् । तथा च दशाविशेषेऽनुमित्यजनकत्वादनुमितिप्रतिबन्धकत्वम् एवेत्यर्थः। एवकारेण दोषत्वव्यवच्छेदः। अत एव दोषाणां नित्यत्वमेवेति प्राहुः। प्राञ्चस्तु सद्धेतोरसाधारणसत्प्रतिपक्षयोरतिव्याप्तिमाशङ्क्य लक्ष्यत्वेन तां निराकुरुते दशाविशेष इति । तथा च यद्दशायां तद्बुद्धेरनुमितिप्रतिबन्धकत्वं तद्दशायां हेत्वाभासत्वमिष्टमेव इति ।

नन्वेतावन्ति लक्षणानि बाधसत्प्रतिपक्षयोरतिव्याप्तानि, अनुमित्यसाधारण-दोषस्यैवात्र लक्ष्यत्वात्तयोश्च प्रत्यक्षशाब्दज्ञानयोरपि प्रतिबन्धकतया केषाञ्चिद्दूषणम् अपाकरोति गङ्गेशोपाध्यायः – **"यद्यपि बाधसत्प्रतिपक्षयोः प्रत्यक्षशाब्दज्ञानप्रति-बन्धकत्वान्न लिङ्गाभासत्वम्, तथापि ज्ञायमानस्याभासस्यात्र लक्षणम्"**[159] इति । अत्र दीधितिकृता व्याख्यानं कृतम् – **"स्थाणुत्वाभावस्य तद्व्याप्यकरादेश्च निश्चये स्थाणुत्वप्रत्यक्षशाब्दयोरनुदयात् । न चैवं नरशिरःकपालं शुचि प्राण्यङ्गत्वादिनाप्या-गमप्रतिरोधः स्यात्, तत्रानुकूलतर्काभावेन बलवन्तरागमविरोधेन च व्याप्तिनिश्चय-स्यानुत्पत्तेरिति भावः"**[160] इति । अत एव शाब्दबोधं प्रत्यपि यदि बाधनिश्चयस्य तदभावव्याप्यनिश्चयस्य च प्रतिबन्धकत्वं तदा नरशिरःकपालं शुचि प्राण्यंगत्वादित्यादौ कर्मानधिकारप्रयोजकस्पर्शाभाववत्त्वरूपशुचित्वव्याप्यप्राण्यङ्ग-त्ववत् नरशिरःकपालमित्याकारकपरामर्शदशायां निरुक्तपरामर्शजन्यतादृशशुचित्व-निश्चयरूपानुमितिदशायां वा तादृशनिश्चयाव्यवहितोत्तरक्षणे सर्वानुभवसिद्धस्य चिति च चितिकाष्ठञ्च मृताङ्गञ्चेत्याद्यागमजन्यत्वस्य कर्मानधिकारप्रयोजकस्पर्शाभाववत्त्वा-

---

[159] सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ. - २८६

[160] तदेव, पृ. – २८६-२८८

भावत्त्वरूपाशुचित्वबोधस्य उत्पाद एव न स्यात्, पूर्वमशुचित्वव्याप्यत्वादिनिश्चयस्य शाब्दादिप्रतिबन्धकत्वस्य सत्त्वादिति दीधितिकृता शङ्कितम् एवमित्यादि ।

वस्तुतस्तु केवलं नरशिरःकपाले प्राण्यङ्गत्वज्ञानमात्रन्तु नाशुचित्वशाब्दबोधं प्रतिबध्नाति, अपि तु शुचित्वव्याप्तिविशिष्टप्राण्यङ्गत्वस्य कपालादौ ज्ञानमेव तथा एवञ्चागमजन्याशुचित्वबोधात् पूर्वमनुकूलतर्काभावेन बलवत्तरप्रमाणागमस्य सत्त्वेन च प्राण्यङ्गत्वादौ शुचित्वव्याप्तिनिश्चय एव न भवति, व्याप्तिनिश्चयाभावे शुचित्वानुमितेरप्यनुदयेन अशुचित्वबोधात्पूर्वे शुचित्वरूपाशुचित्वाभावव्याप्य-निश्चयस्य तज्जन्यत्वस्याशुचित्वाभावरूपशुचित्वात्मकबाधनिश्चयस्य चोत्पादा-सम्भवात् प्रतिबन्धकाभावे नागमजन्यबोधः सम्भवति । आगमश्च –

**"मलमूत्रपुरीषास्थिनिर्गतं ह्यशुचि स्मृतम् ।**
**नारं स्पृष्ट्वा तु सस्नेहं सचैलो जलमाविशेदिति ॥"**[161]

अत्र जगदीशस्य मतं हि – **"मलमूत्रपूरीषास्थिनिर्गतं ह्यशुचि स्मृतमित्यागमस्येत्यर्थः। तत्र प्राण्यङ्गत्वादि हेतौ अनुकूलतर्कस्य व्याप्तिग्रहे स्वतोऽनुपयोगादाह बलवत्तरेति । शौचानुमाने साध्यप्रसिद्धादेरागममात्राधिनतया उपजीव्यजातीयत्वेन मलमूत्रेत्याद्यागमस्य बलवत्तरत्वं बोध्यम् । अनुत्पत्तेरिति । तथा च प्रतिबन्धकसत्त्वान्नागमविरोध इति भावः"**[162] इति ।

बाधादिज्ञानस्यानुमित्यतिरिक्तज्ञानाप्रतिबन्धकत्वं व्यवस्थाप्य बाधादेर्लिङ्गा-साधारणदोषत्वमेवोपपादितं मूलकृता, तन्न सङ्गच्छते, बाधितार्थस्य शाब्दबोधाभ्यु-पगमेऽनुमितेरप्यनपराधात्तत्राप्रामाण्यग्राहकतया बाधादिग्रहस्य प्रवृत्त्यादिविरोधिता-पत्तेरिति । अत्र चिन्तामणिकारस्य मतं हि – **"यद्वा प्रत्यक्षादौ बाधेन न ज्ञानं प्रतिबध्यते, किन्तूत्पन्नज्ञानेऽप्रामाण्यं ज्ञाप्यते, अनुमितौ तूत्पत्तिरेव प्रतिबध्यते"**[163]

---

161 सा.नि., सम्पा. सुधाकरमालवीय, पृ. - ३६६

162 सा.नि.जा., पृ. - ८०

163 सा.नि.प्र.(चन्द्रकल-कलाविलासटीकाद्वयसहित), पृ. - २८०

इति । अत्र अनुशब्दः पश्चादर्थकः। पश्चात्त्वञ्च सौत्रोद्देशक्रमेण । मितिः प्रमितिः। तुकारेण प्रत्यक्षमिति व्यवच्छेदः। तथा चानुमित्यादिप्रमितिषु उत्पत्तिरेवानित्यत्वमेव, न तु नित्यत्वं, प्रत्यक्षे तु नित्यत्वमनित्यत्वञ्चेति । तथा च दोषविशेषाद्यजन्यविशिष्ट-बुद्धित्वस्य नित्यानित्यवृत्तितया बाधनिश्चयाभावादेः कार्यतानवच्छेदकत्वमिति विशिष्टचाक्षुषत्वादेरेव तथात्वं वाच्यमित्यसाधारणदोषत्वं बाधादेरक्षतमेव । जन्यत्वस्य कार्यतावच्छेदककोटौ निवेशे कालिकादिसम्बन्धेन घटत्ववत्त्वादिकमादाय विनिगमनाविरहेण बहुतरगुरुतरकार्यकारणभावकल्पनापत्तेरिति ।

## ५.२) निष्कर्षतमं लक्षणम् -

इदानीं वक्तुं शक्यते यत् आचार्यदीधितिकाराणाम् **'एतावता प्रबन्धेन...'**[164] इत्यादिग्रन्थैः इदं स्पष्टं भवति यद् यथार्थपदाघटितं प्रथमलक्षणं द्वितीयात्मकतां प्रपद्यते । तथा हि प्रतिबन्धकत्वं नाम कारणीभूताभावप्रतियोगित्वम् । तथा च अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषत्वमिति प्रथमलक्षणस्य शरीरम् । अपि च द्वितीयलक्षणस्य शरीरं हि यद्रूपावच्छिन्नविषयताशालियथार्थज्ञानत्वव्यापिका -प्रकृतपक्षकसाध्यकहेतुकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपव-त्त्वमिति । अत्र एकाशङ्का वर्तते अनुमितिपदेन अनुमितिसामान्यं विवक्ष्यते वा यत्किञ्चिदनुमितिः विवक्ष्यते वेति । यदि अनुमितिपदेन अनुमितिसामान्यं विवक्ष्यते तर्हि असम्भवः स्यात् । कथं हि अनुमितिसामान्यमित्यर्थविवक्षणेन लक्षणस्वरूपम् एवं यद्रूपावच्छिन्नविषयताशालियथार्थज्ञानत्वव्यापिका अनुमितित्वव्यापकप्रतिबध्यता-निरूपितप्रतिबन्धकता तद्रूपवत्त्वमिति । 'ह्रदो वह्निमान् धूमाद्' इत्यादौ 'ह्रदो वह्न्यभाववान्' इत्याकारकनिश्चयः अनुमितिसामान्यं न प्रतिबध्नाति इति कृत्वा

---

164 एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात्तत्त्वनिर्णयादिरूपतत्कार्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते 'अथ' इति ।

अर्थात् ‘ह्रदो वह्न्यभाववान्’ इत्याकारकनिश्चयनिष्ठाप्रतिबन्धकतानिरूपितप्रतिबध्यताव्याप्यत्वस्य अनुमितित्वे विरहात् अनुमितित्वव्यापकप्रतिबध्यताया एव अप्रसिद्धत्वादसम्भवः। अत एवानुमितिसामान्यम् अनुमितिपदार्थ इति वक्तुं न शक्यते इति।

यदि अनुमितिपदं यत्किञ्चिदनुमितिबोधकमिति स्वीक्रियते तर्हि असम्भवो न भवति किन्तु अतिव्याप्तिः स्यात्। तथा हि — ‘ह्रदो वह्न्यभाववान्’ इत्याकारकबाधनिश्चनिरूपितप्रतिबध्यत्वव्याप्यतस्य अनुमितित्वे विरहेऽपि तादृशव्यापारस्य यत्किञ्चिद्भूत‘ह्रदो वह्निमान्’ इत्याकारकानुमितित्वे भवतीति । किन्तु ‘पर्वतो वह्निमान् धूमाद्’ इत्यादावपि वह्न्यभाववध्रदो दोषः स्यात् । कथमित्युक्तौ यत्किञ्चिदनुमितिः इत्यनेन ‘ह्रदो वह्निमान्’ इत्यनुमितिरिति स्वीक्रियते। तादृशानुमितिप्रतिबन्धकत्वव्याप्यत्वं वह्न्यभाववध्रदत्वावच्छिन्नविषयतानिरूपितविषयित्वस्य सम्भवतीति तस्य वह्न्यभाववध्रदस्य ‘पर्वतो वह्निमान् धूमाद्’ इत्यादौ दोषत्वं स्यादिति अतिव्याप्तिः। अत एवानुमितिपदस्य यत्किञ्चिदनुमितिरित्यर्थोऽपि वक्तुं न शक्यते। तर्हि किमुच्यते इति चेदुक्तं गदाधरभट्टाचार्येण अनुमितिपदस्य प्रकृतपक्षकसाध्यकहेतुकानुमितिपरत्वमावश्यकमिति।

एवञ्च लक्षणस्वरूपं भवति — यद्रूपावच्छिन्नविषयताशालियथार्थज्ञानत्वव्यापिका प्रकृतपक्षकसाध्यकहेतुकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमिति। अत्र यथार्थपदानुपादाने भ्रमविषये वह्न्यभावादौ यो दोषो दत्त आसीत् स इदानीं वारितो भवति । यतो हि वह्न्यभावत्वावच्छिन्नविषयताशालिज्ञानत्वव्यापिका प्रकृतपक्षकसाध्यकहेतुकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता नास्ति। भ्रमविशिष्टे वह्न्यभाववत् प्रर्वतेऽपि न दोषस्तस्याप्रसिद्धत्वात्। तथा च ज्ञानमात्रमवशिष्टम् । एवं सति यद्रूपावच्छिन्नविषयताशालियथार्थज्ञानत्वव्यापिका प्रकृतपक्षकसाध्यकहेतुकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता

तद्रूपवत्त्वमिति प्रथमलक्षणं तदेव च द्वितीयमित्यभेदः। पुनश्च आहार्याप्रामाण्यज्ञानास्कन्दितज्ञानसंशयानादायासम्भववारणाय ज्ञानपदस्य अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चये द्वितीयलक्षणे लक्षणा करणीया । प्रथमेऽपि निरुक्तरीत्या दोषाणां सम्भवान्निरुक्तरीतेरनुसरणीयतया तत्रापि साम्यमेव ।

ननु यद्यपि यद्रूपावच्छिन्नविशषयताशालिज्ञानत्वव्यापिका प्रकृतपक्षकसाध्यकहेतुकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमिति विवक्षया प्रथमलक्षणे भ्रमविषये न दोषः, तथापि निरुक्तरीत्याहार्यादिज्ञानमादायासम्भववारणाय अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चये ज्ञानपदलक्षणापेक्षया यथार्थपददान एव लाघवं तेनापि च निरुक्तदोषाणां वारणं सम्भवति । परन्तु द्वितीयलक्षणस्य यथार्थपदाघटितत्वेन प्रारब्धत्वात्तत्र गत्यन्तराभावेन आहार्यादिज्ञानम् आदायासम्भववारणाय तादृशलक्षणाया आवश्यकत्वात् प्रथमलक्षणस्य यथार्थपदघटितत्वाद् द्वितीयलक्षणस्य च तदघटितत्वान्न तयोरभेद इति चेन्न, अविरुद्धभावाभावकोटिसंशयस्वीकर्तृमते असम्भवात् । तथा हि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताशालिज्ञानत्वं ह्रदो वह्न्यभाववान् जलवान् वेति संशयेऽपि वर्तते । तच्च ज्ञानं यथार्थमपि । तत्र अनुमितिप्रतिबन्धकत्वाभावादिति तद्वारणाय संशयान्यत्वमावश्यकमेव ।

अविरुद्धभावाभावकोटिसंशयास्वीकृतनये तु कपिसंयोग्येतद्वृक्षत्वादित्यत्र कपिसंयोगाभाववद्वृक्षरूपबाधे अव्याप्तिः। तथाहि कपिसंयोगाभाववद्वृक्षत्वावच्छिन्नविषयताशालिज्ञानत्वं वृक्षः कपिसंयोगाभाववान् न वेति संशयेऽपि वर्तते, तत्रापि यथार्थत्वमप्यस्ति । तत्र तु प्रकृतानुमितिप्रतिबन्धकत्वाभावादिति तद्वारणाय संशयान्यत्वमवश्यमेव दातव्यमिति ।

ननु तथापि आहार्यज्ञानम् आदायासम्भववारणाय प्रथमलक्षणे यथार्थपदमावश्यकं द्वितीयलक्षणे चानाहार्यत्वमिति नाभेद इति चेन्न, संशयाद्यादायसम्भववारणाय अनाहार्यत्वविशिष्टे ज्ञानपदलक्षणापेक्षया प्रतिबन्धकता-

वच्छेदकाभाववदन्यत्वविशिष्टे ज्ञानपदलक्षणा करणीया । अभाववत्ता च स्वप्रतियोगित्ववत्त्वसम्बन्धेन । प्रतियोगित्ववत्ता च स्वावच्छेदकसम्बन्धावच्छिन्न-स्वावच्छेदकावच्छिन्नाधिकरणत्वसम्बन्धेन । तथा च न संशयाद्यादाय दोषः। तथाहि आहार्यत्वाभावविशिष्टं वह्न्यभाववान् ह्रद इति ज्ञानं प्रतिबन्धकमिति । एवञ्च आहार्यत्वाभावः प्रतिबन्धकतावच्छेदकीभूताभावः, तद्वत्त्वं स्वप्रतियोगित्ववत्त्व-सम्बन्धेन अनाहार्यज्ञाने वर्तते । तदन्यत्वस्य अनाहार्यज्ञाने सत्त्वान्न दोषः। एवमेव संशयत्वाभावाप्रामाण्यज्ञानाभावादिकमादाय तद्वदन्यत्वस्य संशयाप्रमाण्यज्ञानादौ असत्त्वाद् असम्भववारणं सम्भवति । एवञ्च प्रथमलक्षणे अप्यनेनैव निवेशेन दोषत्रयस्यापि वारणं सम्भवतीति यथार्थेति व्यर्थमेवेति ।

एवम्बिधेन प्रथमलक्षणस्य द्वितीयलक्षण एव पर्यवसानात्, तृतीयलक्षणस्य यद्यपि द्वितीयलक्षणेऽन्तर्भावो न सम्भवति तथापि तस्य मतविशेषाश्रितत्वे गौणत्वाद् द्वितीयलक्षणस्यैव प्राधान्यं सिद्धं भवतीति ।

## ५.३) प्रकारभेदः -

हेत्वाभासस्य नैकविधः क्रमभेदो दृश्यते । यतः न्यायदर्शनं वैशेषिकदर्शनञ्च समानतन्त्रत्वेन परिचितिरस्ति । तथाहि प्रथमे न्यायदर्शनमुपस्थाप्य वैशेषिकमतम् उपपादयिष्यामि । तत्रादौ न्यायजनकेन भगवता गौतमेन सूत्रितम् – **"सव्यभिचार-विरुद्ध-प्रकरणसम-साध्यसम-कालातीता हेत्वाभासाः"**[165] इति । अयमेव क्रमः तर्कसंग्रहकृताप्यनुसृतः। परं तत्र केषाञ्चन नाम्ना भेदोऽस्ति । यथा प्रकरणसम-साध्यसम-कालातीतानां स्थाने क्रमशः सत्प्रतिपक्ष-असिद्ध-बाधिता इति निर्देशितः –

---

[165] न्या.द.(प्रथमखण्ड), सम्पा. फणिभूषण तर्कबागीश, पृ. - ३८८

**"सव्यभिचार-विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधिताः पञ्च हेत्वाभासाः"**[166] इति । विश्वनाथन्यायपञ्चाननेन स्वल्पीयान् क्रमव्यत्ययः कृतः –

**"अनैकान्तो विरुद्धश्चाप्रसिद्धः प्रतिपक्षितः।**

**कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥"**[167] इति ।

किन्तु अनैकान्तेति कारिकाव्याख्यानावसरे न्यायसिद्धान्तमुक्तावल्यां ग्रन्थकृतैव अनैकान्तिकविरुद्धसत्प्रतिपक्षितासिद्धबाधा इति सूत्रानुसारी क्रम एवादृतः। एतेन छन्दःपारवश्यान्मूले कश्चन क्रमभेदो विहित इत्यवगम्यते । चिन्तामणिकारैरपि एवं क्रमोऽनुसृतः – **"ते च सव्यभिचार-विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधिताः पञ्च"**[168] इति । अयमत्र विशेषो यद् एतैः सर्वैरपि व्यभिचारस्यादिमत्वं बाधस्य चान्तिमत्वं स्वीकृतमेव । परमेतद्विरुद्धं केशवमिश्रः सव्यभिचारं तृतीयस्थाने स्थापयति – **"ते चासिद्ध-विरुद्ध-अनैकान्तिक-प्रकरणसम-कालात्ययापदिष्टभेदात्पञ्चैव"**[169] इति ।

वैशेषिकनये सूत्रानुसारं विरुद्धसव्यभिचारा इति त्रयाणामेव हेत्वाभासत्वं सिध्यति – **"अप्रसिद्धोऽनपदेशोऽसन् सन्धिग्धश्चानपदेशः"**[170] इति । काश्यपमतेऽपि हेत्वाभासास्त्रिधा – असिद्धो विरुद्धः सन्दिग्धः चेति । तथा चोक्तं भाष्ये – **"विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीदि"**ति । अनध्यवसितो नामातिरिक्तश्चतुर्थो हेत्वाभास इति प्रशस्तपादाचार्याः। तथोक्तम् –

---

166 त.सं., सम्पा. पञ्चानन शास्त्री, पृ. - १४३

167 भा.प., सम्पा. पञ्चानन शस्त्री, पृ. - ३७४

168 त.चि.म., सम्पा. द्विवेदी..., पृ. - १६३७

169 त.भा., सम्पा. गङ्गाधर कर, पृ. - ३२१

170 वैशेषिकसूत्रोपस्कारः, सम्पा. शेख साविर आलि, पृ. - २४५

**"एतेनासिद्धविरुद्धसन्दिग्धानध्यवसितवचनानामनपदेशत्वमुक्तं भवति"**[171] इति । लीलावतीकारा अप्येवमाहुः, **"तदाभासाश्चत्वार"**[172] इति । शिवादित्यमिश्रास्तु प्राहुः – **"तदाभासा असिद्धविरुद्धानैकान्तिकानध्यवसितकालात्यापदिष्टप्रकरणसमाः"**[173] इति ।

उपर्युक्तविवरणानुसारं न्याय-वैशेषिकनये हेत्वाभासतालिका निम्नप्रकारेण भवितुमर्हति –

| **नैयायिकानां नाम** | १ | २ | ३ | ४ | ५ | ६ |
|---|---|---|---|---|---|---|
| गौतमः | सव्यभिचारः | विरुद्धः | प्रकरणसमः | साध्यसमः | कालातीतः | X |
| अन्नंभट्टः | सव्यभिचारः | विरुद्धः | सत्प्रतिपक्षः | असिद्धः | बाधितः | X |
| विश्वनाथः | अनैकान्तः | विरुद्धः | प्रतिपक्षितः | असिद्धः | कालात्य-यापदिष्टः | X |
| गङ्गेशोपा-ध्यायः | सव्यभिचारः | विरुद्धः | सत्प्रतिपक्षः | असिद्धः | बाधितः | X |
| केशवमिश्रः | असिद्धः | विरुद्धः | अनैकान्तिकः | प्रकरणसमः | कालात्य-यापदिष्टः | X |
| **वैशेषिकाणां नाम** | १ | २ | ३ | ४ | ५ | ६ |
| कणादः | अप्रसिद्धः | असन् | सन्दिग्धः | X | X | X |
| काश्यपः | विरुद्धः | असिद्धः | सन्दिग्धः | X | X | X |
| प्रशस्तपादः | असिद्धः | विरुद्धः | सन्दिग्धः | अनध्यवसितः | X | X |
| वल्लभाचार्यः | सव्यभिचारः | विरुद्धः | असिद्धः | अनध्यवसितः | X | X |

171 प्र.पा.भा.(द्वितीयखण्ड), सम्पा. दीननाथ त्रिपाठी, पृ. - ३३२

172 तदेव, पृ. - ३३२

173 स.प., सम्पा. जयभट्टाचार्य, पृ. - ३७

| | | | | | | |
|---|---|---|---|---|---|---|
| शङ्करमिश्रः | सन्दिग्धः | विरुद्धः | असन् | X | X | X |
| शिवादित्यः मिश्रः | असिद्धः | विरुद्धः | अनैकान्तिकः | अनध्यवसितः | कालात्य-यापदिष्टः | प्रकरणसमः |

इदानीं गङ्गेशोपाध्यायनये हेत्वाभासस्य सविभागं तेषां परिचयः समासेन क्रियते - सव्यभिचारविरुद्धप्रकरणसमासिद्धबाधिताः पञ्च हेत्वाभासा इति विभागोऽसमञ्जसः । हेत्वाभासत्वेन संग्राह्यस्यानध्यवसितस्य सोपाधेश्च अनभिधानात् न्यूनतादोषो विभागे वर्तते । सकलकार्यसाधारणस्यानुमित्यसाधारणदोषत्वाभावात् सत्प्रतिपक्षस्य चानैकान्तिकेऽन्तर्भावात् बाधितप्रकरणसमयोरतिरिक्तहेत्वाभास-त्वाभावात् तयोः प्रवेशेन विभागे अधिकतादोषोऽस्तीति मूलार्थः श्लिष्टः प्रतिभाति । वस्तुतस्तु गमकतौपयिकरूपेषु पञ्चस्वेकैकस्य अभावादेकैको हेत्वाभास इति पञ्च हेत्वाभासाः सम्पद्यन्ते । पक्षवृत्तित्वरूपाभावाद्विरुद्धः, विपक्षावृत्तित्वाभावादनैका-न्तिकः, अबाधितत्वरूपाभावात् बाधितः कालात्ययापदिष्टः, असत्प्रतिपक्षितत्वा-भावात् सत्प्रतिपक्षः प्रकरणसमश्च हेत्वाभासो भवति । अत एव हेत्वाभासानां पञ्चधा विभागेऽतीव रमणीय इति ।

**१) सव्यभिचारः—**

सव्यभिचारेति व्यभिचारात्मकेन दोषेण सह वर्तत इति व्युत्पत्त्या व्यभिचारीत्यर्थः। सव्यभिचारस्य लक्षणं हि — सव्यभिचारत्वं पक्षातिरिक्तसाध्य-वन्मात्रवृत्त्यन्यत्वे सति पक्षातिरिक्तसाध्याभाववन्मात्रवृत्त्यन्यधर्मत्वम् इति । लक्षणस्य निकर्षः खलु साध्याभाववन्मात्रवृत्त्यन्यधर्मत्वमनैकान्तिकत्वमित्युक्ते सद्धेतौ धूमादावतिव्याप्तिः। तदर्थं साध्यवन्मात्रवृत्त्यन्यत्वे सतीति । एतावति कृते विरुद्धे अतिव्याप्तिः स्यात् । तदर्थं साध्याभाववन्मात्रवृत्त्यन्यधर्मत्वमिति विशेषणम् । एवमपि

साध्यतदभाववद्वृत्तिसाधारणानैकान्तिकेऽव्याप्तिर्भवेत् । तत्परिहाराय मात्रपदद्वयम् । एतावति कृते अनुपसंहारिण्यव्याप्तिर्भवेत् । तत्परिहाराय पक्षातिरिक्तपदद्वयमिति ।

अपि च एकं लक्षणं प्राप्यते सव्यभिचारस्य । तद्धि साध्यवन्मात्रवृत्त्यन्वत्वे सति साध्याभाववन्मात्रवृत्त्यत्वमिति । अर्थात् तद्बीजं तु वह्निमान् धूमादित्यत्र सद्धेतोर्धूमस्य पक्षे साध्यवति महानसादौ च सत्त्वात् पक्षातिरिक्तं यत् साध्यवत् तन्मात्रवृत्तित्वं नास्तीति पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वेनातिव्याप्तिरिति । अपि च अनुपसंहारिण्यव्याप्तिः। असाधकतायां व्यर्थविशेषणत्वमिति । अन्ये तु असाधारण्याभावकालावच्छिन्नसाध्यव्याप्यत्वाभाववत्त्वे सत्यसाधारण्याभावकालावच्छिन्नविरुद्धत्वाभाववत्त्वं सव्यभिचारत्वम् । अत्र असाधारण्याभावकालावच्छिन्नं यत्साध्यव्याप्यत्वं तदभाववत्त्वे सत्यसाधारण्याभावकालावच्छिन्नं यद्विरुद्धत्वं तदभाववत्त्वमिति । साध्यव्याप्यत्वाभाववत्त्वमनैकान्तिकत्वमित्युच्यमाने विरुद्धे अतिव्याप्तिः । तन्निवृत्तये विरुद्धत्वाभाववत्त्वम् । तावन्मात्रस्य सद्धेतावतिव्याप्तेस्तत्परिहाराय साध्यव्याप्यत्वाभाववत्वे सतीति विशेषणम् । एवमपि 'शब्दोऽनित्यः, शब्दत्वात्' इत्यादिसद्धेत्वसाधारणेऽतिव्याप्तिः स्यात् । तत्परिहाराय असाधारण्याभावकालावच्छिन्नेति । तेन सत्यपि साध्यव्याप्यत्वे विशेषणाभावाद्विशिष्टाभावः । एवमप्यसाधारणतापन्ने विरुद्धेऽव्याप्तिः स्यात् । तदर्थमसाधारण्याभावकालावच्छिन्नेति । तेन 'आत्मा अनित्यः आत्मत्वात्' इत्यादिषु असाधारणतापन्नेषु सत्यपि विरुद्धत्वेऽसाधारण्याभावकालावच्छिन्नत्वरूपविशेषणाभावाद्विशिष्टाभावः सम्भवतीति नोक्तदोषः।

अयं सव्यभिचारः साधारणासाधारणानुपसंहारिभेदात् त्रिविधः। तदुक्तं तत्त्वचिन्तामणौ गङ्गेशोपाध्यायेन **"सव्यभिचारस्त्रिविधः— साधारणासाधारणानुप-**

**संहारिभेदात्"**[174] इति । अथैवं साधारणादिभिस्त्रिभिरनुमितिप्रतिबन्धे हेत्वाभासाधिक्यं कथं नास्तिः? कथं वा न विभागव्याघातः? इति चेत्, स्वरूपसतानेन समान्यलक्षणेन साधारणादीनेकीकृत्य पञ्चैव हेत्वाभासा इति विभागकरणात्।

नन्वेवमपि साध्याभावज्ञापकत्वेन बाधसत्प्रतिपक्षयोः, सव्यभिचारविरुद्धासिद्धानां साक्षात् साध्याभावाज्ञापकतया चैकत्वेन द्विविधो हेत्वाभास इति कथं न विभागः कृत इति चेन्न, स्वतन्त्रेच्छस्य मुनेर्नियन्तुमशक्यत्वाद् इति।

*क) साधारणसव्यभिचारः—*

साधारणस्य लक्षणं हि पक्षसपक्षविपक्षवृत्तिः साधारणः। इति । इदन्तु अलक्षणम् । विरुद्धसंकीर्णसाधारणे सपक्षवृत्तित्वाभावेनाव्याप्तेः। विपक्षवृत्तित्वज्ञानेनानुमितिप्रतिबन्धेऽसाधकतानुमाने च सम्भवति शेषवैयर्थ्यात् । न च विपक्षवृत्तित्वं साधारणत्वम्, विपक्षस्य निश्चयघटितत्वेन साधारणस्यानित्यदोषत्वापत्तेः। अनुमितिप्रतिबन्धे परं प्रत्युद्भावनेऽसाधकतानुमाने च साध्याभाववद्गामित्वस्यैव प्रयोजकत्वेन निश्चयभागस्य व्यर्थत्वादिति चेत्, न । विपक्षवृत्तित्वं साधारणत्वम्। विपक्षत्वं च साध्यव्यधिकरणधर्मवत्वम्। व्यधिकरणत्वं च तदधिकरणानधिकरणत्वम् । तथा च प्रतियोगिव्यधिकरणसाध्यात्यन्ताभाववद्गामित्वाद्युपाधीनां भानेऽस्योपाधेर्भानमावश्यकमित्येतद्विषयत्वेनैव सर्वेषामनुमितिप्रतिबन्धकत्वम्। अतो नाधिक्यम्, न वा विभागव्याघातः। एतस्मात् सन्देहात् सन्दिग्धानैकान्तिकता।

---

[174] त.चि., सम्पा. कामाख्यानाथतर्कबागीश, पृ. - ७८४

ननु साध्यव्यधिकरणधर्मवद्वृत्तित्वे साध्यव्यधिकरणस्यैवानुमितिप्रतिबन्धकत्वादिसामर्थ्येऽधिकवैयर्थ्यमिति चेत्, अन्यविशेषणत्वेनोपात्तस्य अन्यविशेषणत्वं कृत्वा दूषणाभिधानस्याप्रामाणिकत्वात् । न च वाच्यम्— पक्षे व्यभिचारसन्देहस्य अनुमितिप्रतिबन्धकत्वेऽनुमानमात्रोच्छेद इति, अनुकूलतर्कादिना व्यभिचारसन्देहनिवृत्तावनुमानप्रवृत्तेः। अथवा निश्चितहेतुमति साध्यव्यभिचारसंशयातिरिक्तव्यभिचारसंशयत्वेनानुमितिप्रतिबन्धकत्वान्नानुमानमात्रोच्छेद इति।

***ख) असाधारणसव्यभिचारः—***

पक्षवृत्तित्वे सति सपक्षविपक्षावृत्तिरसाधारणः। इति । अस्य निकर्षो हि विपक्षव्यावृत्तोऽसाधारण इत्युक्तेऽन्वयव्यतिरेकिणि सद्धेतावतिव्याप्तिः। तत्परिहाराय सपक्षव्यावृत्तः इति।

यत्किञ्चित्सपक्षव्यावृत्तधूमस्यासाधारणता मा भूदित्येतदर्थं सर्वेति विशेषणं सपक्षे देयम् । एवमप्याकाशादावतिव्याप्तिः स्यात् । तदर्थं पक्षवृत्तित्वे सतीति । पक्षवृत्तित्वमसाधारणत्वमित्युक्तेऽन्वयव्यतिरेकिणि अतिव्याप्तिः। तदर्थं विपक्षव्यावृत्त इति।

ननु एवं सपक्षव्यावृत्तिरेव दूषकतायामुपयुज्यते । न तु विपक्षव्यावृत्तिरपि, तस्या अनुगुणत्वात् । अपि च परं प्रति तदुद्भावनदशायां विपक्षव्यावृत्त्युपन्यासे साध्यसाधको व्यतिरेकसहचार एवोपन्यस्तो भवेत् । अपि च परामर्शोत्तरकालमिदमुद्भाव्यं वा ? तत्पूर्वकालं वा ? नाद्यः, बाधसत्प्रतिपक्षयोरभावे अनुमितेर्ब्रह्मणापि वारयितुमशक्यत्वात् । न द्वितीयः 'शब्दो नित्यः शब्दत्वात्' इत्युक्त्वा वादिनि निवृत्ते सति न्यूननिग्रहोद्भावनद्वारा एव वादिनिवृत्तेः । न च स्वार्थानुमाने दोषो भविष्यति इति वाच्यम्, तत्रापि सपक्षव्यावृत्तत्वमात्रस्य दोषत्वात्

इति । अत्र वदन्ति 'नित्यः शब्दः शब्दत्वात्' इत्यत्र शब्दत्वं साध्यवतस्तदभाववतश्च व्यावृत्तम् । एवञ्च यत्र यत्र नित्यत्वं तत्र तत्र शब्दत्वाभावः। यत्र यत्र नित्यत्वाभावस्तत्र तत्रापि शब्दत्वाभावः। एवं च साध्यतदभावाव्यापकाभावप्रतियोगिना शब्दत्वेन पक्षे किं साधनीयमिति साध्यतदभावोत्थापकतया स्वार्थानुमाने परार्थानुमाने वा साधारणो दोषः ।

ननु सत्प्रतिपक्षादसाधारणस्य कथं भेदः ? परामर्शद्वयस्य उभयत्राप्यविशिष्टत्वादिति चेत्, न, द्वौ हेतू सत्प्रतिपक्षे साध्यतदभावोत्थापकौ । अत्र त्वेक एव हेतुरिति भेदः। न च— न्यूनोद्भावनेनैव वादिनिवृत्तिर्भवति, कथं परार्थानुमानोद्भावनमिति वाच्यम् । विपक्षव्यावृत्ततया यथा साध्यं साधयति, तथा पक्षव्यावृत्तत्वेन साध्याभावमपि साधयतु, अविशेषादिति प्रतिबन्धितया दृष्टान्ततया वास्योद्भावनम् । न्यायोत्तरं साधारणवद्बोध्यम् । सर्वसपक्षव्यावृत्तत्वं लक्षणम् । न त्वधिकम्, व्यर्थत्वात् । विरुद्धस्य विरुद्धत्वेन आज्ञायमानतादशायामेतद् रूपेणावगमेऽसाधारणतैव, अन्यथा हेत्वाभासाधिक्यापत्तेः ।

ननु तथापि उदाहरणाभावादेवासाधरणो न पृथक् । तथाहि— 'अनित्यः शब्दः शब्दत्वात्' इति सद्धेतुरेव । 'शब्दो नित्यः शब्दत्वात्' इति विरुद्ध एव । 'भूर्नित्या गन्धवत्त्वात्' इति साधारण एवेति चेत्, उच्यते— सन्देहघटितपक्षतादशायां साध्यतदभावानिश्चयदशायां तस्य दोषत्वम् । यद्यपि निश्चयाभावः पुरुषदोषोऽज्ञानं, न हेत्वाभासः, तथापि ज्ञायमानतयानुमितिप्रतिबन्धकत्वेन हेत्वाभासत्वात् तथोक्तम् । अथवा सपक्षव्यावृत्तत्वेन निश्चयदशायामेव तेषामुदाहरणानाम् असाधारणत्वमिति ।

*ग) अनुपसंहारी—*

व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहारी । व्याप्तिग्रहानुकूल एकत्र धर्मिण्युपसंहारः सहचारः, तदभावो यत्र इति । अनुपसंहारी तु नानैकान्तिकेऽन्तर्भवति, दूषकतावीजस्य सन्देहजनकत्वस्याभावात् । न हि 'सर्वमनित्यं प्रमेयत्वात्' इत्यत्र प्रमेयत्वस्य अन्वयमुखेन व्यतिरेकमुखेन वा संशयजनकत्वं सम्भवति इति । अपि च 'सर्वमभिधेयम्, प्रमेयत्वात्' इत्यत्र संशयजनकत्वमसंभावितमेव, अभिधेयत्वानधिकरणस्य तस्याप्रसिद्धत्वात् । तस्मात् व्याप्तेरग्रहणात् व्याप्यत्वाप्रसिद्ध एवान्तर्भवति । उभयरूपस्य अनैकान्तिकस्य केवलान्वयिनि केवलव्यतिरेकिणि च साध्येऽसंभवः, सपक्षविपक्षाप्रसिद्धेः। केवलान्वयिधर्मो नासाधरणो भवति, उभयव्यावृत्तेरस्याभावात् । अत्र साधारणस्य न क्वचिदपि विरुद्धसंकीर्णता । बाधाश्रयस्वरूपतद्विशेषणासिद्धिसंकीर्णता कुत्रचित् । व्याप्यत्वासिद्धिसंकीर्णता सर्वत्र इति । प्रतिपक्षसंकीर्णतासंभावना सर्वत्र, अस्य नित्यदोषात् । एवमसाधारणस्यापि विरुद्धबाधाश्रयस्वरूपतद्विशेषणासिद्धिस्कीर्णता क्वचित् । व्याप्यत्वासिद्धिसंकीर्णता सर्वत्र । प्रतिपक्षः पूर्ववत् । तदेवं संकीर्णतायामपि दूषकताबीजभेदोपाधिभेदोपजीव्योपजीवकभावभेदसत्त्वात् हेत्वाभासान्तरताव्यव-हारः, न तु परस्परासंकीर्णलक्षणयोगित्वात् ।

ननु एवम्बिधानैकान्तिकलक्षणेऽसाधकतानुमाने व्यर्थता स्यात् ? मैवम्, यदेव यत्र दूषकताबीजं तस्यैव तत्र हेतूकरणात् । तथाहि इदमसाधकं साध्यसंशयजनकत्वादिति । न चात्र व्यर्थता । असाधकताप्राप्ते तु विशेषं वक्ष्यामः।

## २) विरुद्धः—

विरुद्धस्य लक्षणं साध्यासमानाधिकरणो हेतुर्विरोधस्तादात्म्येन तद्वान् हेतुर्विरुद्धः। अत्र साध्यासमानाधिकरणः साध्याभावो बोध्यः । एतज्ज्ञानञ्च साध्यसामानाधिकरण्यघटितव्याप्तिप्रकारकज्ञाने सामानाधिकरण्यांशे प्रतिबन्धकम् । उदाहरणन्तु समवायेन साध्यहेतुको गोत्ववान् अश्वत्वाद् इत्यादिरिति ।

प्राञ्चस्तु साध्यासामानाधिकरण्यं विरोधस्तद्वान् हेतुर्विरुद्ध इत्याहुः, तदसत् । केवलसाध्यासामानाधिकरण्यरूपविशिष्टनिरूपितविषयित्वस्य केवलसाध्यासामानाधिकरण्यवषयकज्ञाने हेत्वन्तरविशेष्यकतत्प्रकारज्ञाने च सत्त्वेन प्रकृतहेतुकानुमितितत्कारणज्ञानप्रतिबन्धकतातिरिक्तवृत्तितया केवलस्य तस्य हेतुदोषत्वासम्भवात्, अत एव अग्रेऽपि सर्वत्र विशेष्यान्तर्भाव इति बोद्धव्यम् ।

## ३) सत्प्रतिपक्षः—

सत्प्रतिपक्षस्य लक्षणं हि एकधर्मनिष्ठतद्व्याप्यत्वप्रकारकविषयतापक्षवृत्तित्वप्रकारकविषयताद्वयप्रतियोगिज्ञानसमानदेशसमानकालत्वे सत्येकधर्मनिष्ठतदभावव्याप्यत्वप्रकारकविषयतापक्षवृत्तित्वप्रकारकविषयतापक्षवृत्तित्वप्रकारकविषयता -द्वयप्रतियोगिज्ञानत्वं सत्प्रतिपक्षत्वम् इति । एकस्मिन् धर्मिणि शब्दे, निष्ठं यत्साध्यमनित्यत्वं तद्व्याप्यं कृतकत्वं, तस्य भावस्तद्व्याप्यत्वं प्रकारो यस्यास्तद्व्याप्यत्वप्रकारिका, सा च सा विषयता च, या च पक्षधर्मता, सा प्रकारो यस्याः, सा च सा विषयता च, ते एव द्वयं,तत्प्रतियोगिज्ञानं परामर्शो यस्य, कृतकत्वहेतोस्तृतीयलिङ्गपरामर्शविषयीभूतस्य तत्समानदेशकालत्वे सति । एतद्धर्मिनिष्ठः शब्दरूपधर्मिनिष्ठः, योऽयं तदभावोऽनित्यत्वाभावो नित्यत्वं, तद्व्याप्यं श्रावणत्वं, तस्य भावस्तादृशव्याप्यत्वं प्रकारो यस्याः सा विषयता च, पक्षवृत्तित्वं

प्रकारो यस्याः, सा च सा विषयता च, ते एव द्वयं, तत्प्रतियोगि ज्ञानं तृतीयलिङ्गपरामर्शः, यस्य श्रावणत्वहेतोस्तस्य भावस्तत्त्वमित्यर्थः। सत्यन्तमात्रे कृते सद्धेतावतिव्याप्तिः। तदर्थमेतद्धर्मिनिष्ठेत्याद्युत्तरदलम् । एवमपि विरुद्धेऽतिव्याप्तिः। तदर्थं सत्यन्तम् । एकधर्मीति पदं विहाय तदितराभिधाने 'अनित्यः शब्दः कृतकत्वात्', 'परमाणुः नित्यः निरवयवद्रव्यत्वात्' इत्यनयोरपि सत्प्रतिपक्षता स्यात् । तन्निवृत्तये एकधर्मिपदम् । अत एव एतद्धर्मिपदमुत्तरदले सार्थकम् । अन्यत् सर्वं स्पष्टमिति ।

वस्तुतस्तु वक्तुं शक्यते यत् साध्याभाववान् पक्षः सत्प्रतिपक्षः, वृत्तिमत्त्वादियथाकथञ्चित्सम्बन्धेन तद्वान् हेतुः सत्प्रतिपक्षितः, अयञ्च स्वरूपसम्बन्धेन हि साक्षादनुमितिविरोधी, अत एव सद्धेतुरपि साध्याभावव्याप्यवत्तापरामर्शकाले सत्प्रतिपक्षितः, बाधितोऽपि साध्याभावव्याप्यवत्तापरामर्शदशायां कदाचिदसत्प्रति-पक्षित इत्याहुः। एतन्मते यथाश्रुतं न दोषलक्षणं किन्तु दुष्टलक्षणमेवेति न तत्राव्याप्तिः।

**४) असिद्धः—**

साध्यव्याप्यत्वप्रकारकप्रमाव्यतिरेकतत्पक्षधर्मताप्रकारकप्रमाव्यतिरेकान्यतरत्वम् असिद्धत्वम् । तदन्यतरत्वं तदन्यान्यत्वम् । अतो यत्र व्यतिरेकद्वयं तत्र नाव्याप्तिः। न तु व्याप्तिपक्षधर्मताभ्यां रहितोऽसिद्ध इति लक्षणम्, तद्व्याप्तिपक्षधर्मतावैशिष्ट्यस्य अप्रसिद्धत्वेनासिद्धेरुद्भावयितुमशक्यत्वात्; अन्यस्यातिप्रसञ्जकत्वात् । एवमन्यान्यपि लक्षणानि दूषणीयानि । तदयमाश्रयासिद्ध-स्वरूपासिद्ध-व्याप्यत्वासिद्धभेदेन त्रिविधः।

***क) आश्रयासिद्धः –***

अनुमानस्थले यदि पक्षोऽसिद्धः स्यात्तर्हि आश्रयासिद्धहेत्वाभासा भवति । यथा काञ्चनमयपर्वतो वह्निमान् इत्यत्र काञ्चनमयपर्वतस्याप्रसिद्धात्पक्षाप्रसिद्धिरिति ।

*ख) स्वरूपासिद्धः –*

हेतोः पक्षावृत्तित्वं स्वरूपासिद्धित्वम् । शब्दो नित्यश्चाक्षुषत्वादित्यत्र शब्दे चाक्षुत्वं नास्तीत्युक्तलक्षणसमन्वयः । पक्षतावच्छेदकावच्छेदेन हेत्वभावे पक्षतावच्छेदकसमानाधिकरण्येन हेत्वभावे चोभयथापि स्वरूपासिद्धत्वम् ।

*ग) व्याप्यतासिद्धः –*

यत्र हेतोर्व्याप्तिर्नावगम्यते तत्र तु व्याप्यतसिद्धः । किञ्च सोपाधिको हेतुर्व्याप्यतासिद्ध इत्यन्नंभट्टमतम् । यथा पर्वतो धूमवान् वह्नेरिति । अत्रेदमवधेयं यत् उपाधिस्तु साध्यव्यापकत्वे सति साधनाव्यापकत्वमिति । यथोक्तस्थले आर्द्रेन्धनसंयोग उपाधिः । स च धूमाधिकरणे सर्वत्र वर्तमानत्वात्साध्यव्यापकः । वह्न्यधिकरणेऽयोगोलकेऽवर्तमानत्वाच्च साधनाव्यापकः । एतादृशोपाधिसहित्वादयं हेतुर्व्याप्यतासिद्धः ।

केचित्तु व्यर्थविशेषणघटितस्य हेतोर्व्याप्यतासिद्धत्वं स्वीकुर्वन्ति । पर्वतो वह्निमान् नीलधूमादिति निदर्शनम् । धूमे नीलत्वरूपविशेषणं व्यर्थमियुक्तदोषः । स्वसमानाधिकरणप्रकृतसाध्यव्याप्यतावच्छेदकधर्मान्तरघटितत्वं व्यर्थविशेषणघटि-तत्वम् । स्वं नीलधूमत्वं, तत्समानाधिकरणप्रकृतसाध्यव्याप्यतावच्छेदकधर्मान्तरं धूमत्वं, तद्घटितत्वं नीलधूमत्वे वर्तते ।

**५) बाधितः—**

बाधितस्य लक्षणं हि साध्याभाववान् पक्षो बाधः, वृत्तिमत्तादियत्किञ्चित्सम्बन्धेन तद्वान् हेतुर्बाधितः, एतज्ज्ञानञ्च साक्षादेवानुमितिविरोधि । उदाहरणं हि ह्रदो वह्निमान् धूमाद् इति । अत्र साध्याभाववान् नाम वह्न्यभाववान् तथ जलं ह्रदरूपपक्षे वर्तते, अत एव बाधहेत्वाभासस्य लक्षणं प्रयुज्यते इति ।

# षष्ठोऽध्यायः

# ॥ षष्ठोऽध्यायः ॥

## आचार्यकृतहेत्वाभासलक्षणस्योत्कर्षताविवेकः

प्रकृतानुमानस्थले सद्धेतुना पक्षे साध्यमनुमीयते । तदर्थं हेतोर्गुरुत्वमनस्वीकार्यम् । परन्तु यदि हेतुरयं यथार्थो न भवति तर्हि तद्वारा कदाप्येव यथार्थानुमितिर्न जायते । तदा स हेतुरसद्धेतुत्वेन परिचितो भवति । यथा 'पर्वतो धूमवान् वह्नेः' इत्यत्र 'पर्वतः' इति पक्षः, 'धूमः' इति साध्यः, 'वह्निः' इति हेतुश्च । अत्र धूमरूपसाध्येन सह वह्निरूपहेतोर्व्याप्तिर्न भवति । यतः नियमोऽस्ति साध्यः खलु व्यापको हेतुश्च व्याप्यः। अत एव भावपक्षे यत्र व्याप्यो विद्यते तत्रैव व्यापको वर्तते इति व्याप्तिः। तथा हि समुच्यते यत्र यत्र धूमस्तत्र तत्र वह्निः इति साहचर्यनियमो हि व्याप्तिः। अत्र व्याप्यः धूमः व्यापकः खलु वह्निः। अतः एतयोर्मध्ये कापि हानिर्न भवेत् । तद्वारा व्याप्तिः सिद्ध्यते । परन्तु उक्तानुमानवाक्ये धूमरूपसाध्यो व्यापको वह्निरूपहेतुश्च व्याप्यः। अतः यत्र यत्र व्याप्यः तत्र तत्र व्यापकः इति नियमात् अत्र यत्र यत्र वह्निः तत्र तत्र धूम इति भवेत् । परन्तु एतेन नियमेन लौहपिण्डेऽव्याप्तिर्दोषो जायते । कारणं तत्र केवलं वह्निः तिष्ठति, न तु धूमः। अत एव अत्र वह्निरूपहेतुः असद्रूपेण प्रतिभाति । अयमसद्धेतुः हेत्वाभासनाम्नाभिधीयते । तथा च अनुमितौ हेतौ व्याप्तिपक्षधर्मतावैशिष्ट्यज्ञानमिव तद्विपरीतहेतौ हेत्वाभासज्ञानमप्युपयुज्यते । यतो हि पर्वतो वह्निमान् धूमादित्यनुमाने धूमहेतौ वह्निव्याप्तिमत्ताज्ञाने सति

तद्विपरीतहेतौ जले वह्निविरोधिवह्न्यभाववव्याप्यवत्ताज्ञानेऽप्रामाण्यज्ञानमावश्यकम् इति । तज्ज्ञानजनकञ्च विपरीतहेतौ हेत्वाभासज्ञानम् । सरलतया दुष्टहेतुस्तथा विकलाङ्गहेतुर्हि हेत्वाभासः । तथा हि शिवादित्यपादैः निगदितम् – **"अङ्गवैकल्यमाभासहेतुत्वम्"**[175] इति । अत्र तु एकः प्रश्न उदेति न्यायप्रवर्तकमहर्षिगौतमनये को नाम हेत्वाभासः इति चेदुच्यते तैः यद्यपि किमपि हेत्वाभासलक्षणं न लक्षितम्, तथापि एतद्वक्तुं शक्यते यत् 'सव्यभिचार-बिरुद्ध-प्रकरणसम-साध्यसम-कालातीता हेत्वाभासाः' इत्यत्र लक्षणे 'हेत्वाभासाः' इति पदेन हेत्वाभासशब्दस्य लक्षणं सूचितं हेतुवदाभाससमानार्थकत्वेनैव । वस्तुतस्तु पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वोपपन्नो हि हेतुर्गमक इति तद्वदाभासत इत्यत्र व्यत्यर्थः तद्भिन्नत्वमिति, तथा च पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेण भासमान इति । तदुक्तं तार्किकरक्षायाम् –

**"हेतोः केनापि रूपेण रहिताः कैश्चिदन्विताः।**
**हेत्वाभासाः पञ्चधा ते गौतमेन प्रपञ्चिताः॥"**[176] इति ।

अत्र च स्मरणीयं यत् प्राचीनन्याये हेत्वाभासशब्दो दुष्टहेतुवाचकः। नव्यमते तु हेत्वाभासशब्दो दुष्टहेतुवाचको हेतुदोषवाचकः चेत्युभयमेव । नव्यन्यायशास्त्रस्य व्युत्पत्तिमिमामवलम्ब्य नव्यन्यायवृक्षगङ्गेशोपाध्यायैर्हेत्वाभासस्य त्रिविधं लक्षणं लक्षितम् –

क) **अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्** – अर्थात् अनुमितौ कारणीभूतो योऽभावस्तस्य प्रतियोगि यद् यथार्थज्ञानं तद्विषयत्वं हेत्वाभासत्वमिति । लक्षणसमन्वयो हि ह्रदो वह्निमानिति अनुमितिः, तत्कारणीभूताभावः

---

[175] स.प., सम्पा. जयभट्टाचार्य, पृ. - १२३

[176] ता.र., पृ. - १४९

वह्न्यभाववान् ह्रद इति बाधनिश्चयाभावः, तत्प्रतियोगि यथार्थज्ञानं हि वह्न्यभाववान् ह्रद इति ज्ञानं, तद्विषयत्वस्य वह्न्यभाववद्ध्रदे सत्त्वादिति । अपि च व्यभिचारादावपि अनुमितिकारणीभूताभाव वह्निव्यभिचारिवान् ह्रद इति निश्चयाभावः, तत्प्रतियोगियथार्थज्ञानविषयत्वस्य वह्निव्यभिचारिजलादौ सत्त्वाल्लक्षणसमन्वयोऽवगन्तव्यः । तथा चानुमितितत्कारणान्यतरप्रतिबन्धकयथार्थ-ज्ञानविषयत्वमिति लक्षणशरीरम् ।

ख) **यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्** - अर्थात् यो विषयो यत्रेति विग्रहे यद्विषयकस्य भावो यद्विषयकत्वमिति, तदनन्तरं तेन यद्विषयकत्वेन इत्यत्र तृतीयार्थस्तावदवच्छेदकत्वमिति । लिङ्गस्य ज्ञानं लिङ्गज्ञानम्, यस्यार्थो हि हेतुविषयकज्ञानमिति । तस्य नाम हेतुविषयकज्ञानस्य, निष्ठत्वं षष्ठ्यर्थः। अनुमितिरत्र साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारकसमूहालम्बनात्मिका इति प्राप्यते । अनुमितेः प्रतिबन्धकमिति अनुमितिप्रतिबन्धकम्, तस्य भावोऽनुमितिप्रतिबन्धकत्वम् । अतः शाब्दबोधो भवति - अनुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वमिति । एवञ्च यद्विषयकत्वावच्छिन्ना लिङ्गज्ञाननिष्ठानुमितिनिष्ठाप्रतिबध्यतानिरूपित-प्रतिबन्धकता, तद्विषयत्वं हेत्वाभाससामान्यलक्षणस्य सम्पूर्णशरीरं पर्यवसितमिति ।

इदानीं वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः प्रदर्श्यते - तथा च यद्विषयकत्वावच्छिन्नावह्न्यभाववद्ध्रदविषयकत्वावच्छिन्ना लिङ्गविषयकज्ञान-निष्ठावह्न्यभाववान् ह्रदो धूमश्चेति समूहालम्बनज्ञाननिष्ठा, अनुमितिप्रति-बन्धकताह्रदो वह्निमानित्यनुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता वर्तते, अत एव तद्विषयकत्वस्य वह्न्यभाववद्ध्रदे सत्त्वाल्लक्षणसमन्वयो भवति ।

ग) **ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वं वा** इति तृतीयलक्षणे ज्ञायमानं लिङ्गमनुमितिकरणमिति मतमिव ज्ञायमानबाधादिः प्रतिबन्धक इति मतविशेषः ।

तन्मते यद्विषयकज्ञानस्य नानुमितिप्रतिबन्धकत्वमिति तन्मतविशेषमाश्रित्य लक्षणमिदमीरितम् । अत्र लक्षणे यत्पदेन यद्रूपावच्छिन्नविषयतासामान्यमिति बोध्यम्, अत एव ज्ञायमानं यद् यद्रूपावच्छिन्नविषयतासामान्यम्, अनुमितिप्रतिबन्धकं नाम अनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकं, तत्त्वं नाम तद्रूपवत्त्वमिति लक्षणसमन्वयः। अत एव शाब्दबोधो भवति - ज्ञानीययद्रूपावच्छिन्नविषयताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपित-प्रतिबन्धकता तद्रूपावच्छिन्नत्वमिति । अत्राप्यनुमितिपदेन साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याकारकानुमितिपदं ग्राह्यम् । इदानीमुदाहरणद्वारा लक्षणसमन्वयो प्रदर्श्यते - वह्न्यभाववान् ह्रद इति ज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्न-विषयताव्यापिका ह्रदो वह्निमान् वह्निव्याप्यधूमवान् चेत्यनुमितित्व-व्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतास्ति तद्रूपावच्छिन्नत्वस्य वह्न्यभाववद्ध्रदे सत्त्वाल्लक्षणसमन्वयो भवति ।

अत्रेदमवधेयं यत् तर्कसंग्रहकृता कारिकावलीकृता च नव्यनैयायिकजनकगङ्गेशस्य मतानुसारं हेत्वाभासलक्षणं कृतम् । तत्रादौ अन्नंभट्टस्य मतं हि **“अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम्”**[177] इति । अर्थात् अनुमितेः प्रतिबन्धकं यत् यथार्थज्ञानं तद्विषयत्वं हेत्वाभासत्वम् । प्रतिबन्धको हि द्विविधः – कारणीभूताभावप्रतियोगित्वं प्रयोजकीभूताभावप्रतियोगित्वं च । अत्र तु प्रतिबन्धकशब्दस्यार्थस्तावत् कारणीभूताभावप्रतियोगित्वम् । तथाहि ‘ह्रदो वह्निमान्’ इत्यनुमितौ ‘वह्न्यभाववान् ह्रद’ इति यथार्थनिश्चयात्मकं ज्ञानं प्रतिबन्धकम् । यतः तत्सत्त्वे ‘ह्रदो वह्निमान्’ इति अनुमितिर्न जायते । अत्र प्रतिबन्धकं नाम कारणीभूताभावप्रतियोगीति । तथा च

[177] त.सं., सम्पा. स. शर्मा बङ्गीय, पृ. - २८९-२९१

व्यभिचारादिहेत्वाभासेऽव्याप्तिवारणाय लक्षणे अनुमितीति पदस्थले अनुमितितत्करणान्यतरेति पदमुपादेयम् । तेन अनुमितिकारणीभूतस्य परामर्शस्य प्रतिबन्धकयथार्थज्ञानविषयत्वस्य हेत्वाभासत्वे व्यभिचारादौ हेत्वाभासलक्षणसमन्वयो भवति व्यभिचारादेरनुमितिप्रतिबन्धकत्वाभावेऽपि परामर्शप्रतिबन्धकात् । अपि च, 'पर्वतो वह्निमान्' इत्याद्यनुमितौ 'पर्वतो वह्न्यभाववान्' इत्यादेर्बाधभ्रमस्य हेत्वाभासत्ववारणाय यथार्थेति पदं लक्षणे प्रदेयम् इति । अत एव सम्पूर्णलक्षणशरीरं भवति — 'अनुमितितत्करणान्यतर-कारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्' इति । इदानीं दिङ्मात्रे दृष्टान्ते लक्षणसमन्वयः प्रदर्श्यते— 'वह्निरनुष्णो द्रव्यत्वात्' इति यज्ज्ञानं तद्विषयत्वं विषयतासम्बन्धेन एकज्ञानविषयत्वसम्बन्धेन च द्रव्यत्वरूपे हेत्वाभासे विद्यते इति लक्षणसमन्वयः।

ननु अत्रानुमितिप्रयोजकीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमित्येतावता सामञ्जस्ये कारणीभूताभावेत्यादिगुरुतरनिवेशः कुतः ? कारणलक्षणे प्रयोजक-लक्षणापेक्षयान्यथासिद्धिशून्यत्वस्याधिकस्य प्रविष्टत्वेन तस्य गुरुत्वादित्याक्षिप्य परामर्शविषयेऽतिव्याप्तिं प्रदर्शयन्ति केचित् । तथा हि अनुमितिं प्रति अप्रामाण्यज्ञानाभावविशिष्टः परामर्शः कारणं न तु तदविशिष्टोऽपि वह्निव्याप्यधूमवान् पर्वत इति ज्ञानमप्रमेत्यप्रामाण्यज्ञानानास्कन्दितेन परामर्शेण पर्वतो वह्निमानित्यनुमितेरजननात् । तथा च प्रयोजकत्वस्य जनकजनकतावच्छेदकसाधारण्येनानुमितिप्रयोजकीभूताभावपदेन अप्रामाण्यज्ञाना-भावस्यापि धर्तुं शक्यत्वात् । तत्प्रतियोग्यप्रामाण्यज्ञानविषयत्वस्य परामर्शविषये सत्त्वात् । कारणीभूताभावेत्यत्यादिनिवेशे तु अप्रामाण्यज्ञानाभावस्यानुमित्य-कारणत्वाद् बाधज्ञानाभावमादाय लक्षणसमन्वयो भवति।

वस्तुतस्त्वनुमितिकारणाभावप्रतियोगियथार्थज्ञानविषयत्वमित्युक्तौ कारणस्य

अभावः कारणाभाव इत्यर्थस्यापि धर्तुं शक्यतया अनुमितिकारणाभावपदेन परामर्शाभावो लभ्यते, तत्प्रतियोगियथार्थज्ञानविषयत्वस्य साध्यव्याप्यहेतुमत्पक्षे सत्त्वाद् व्यभिचारः स्याद्, अत एव भूतपदमुपात्तमिति । तथा सति अनुमितिकारणीभूताभावो न परामर्शाभाव इति नोक्तरीत्या व्यभिचारः ।

उक्तलक्षणे यथार्थपदस्यावश्यकताविषये दीधितिकृता विषयितम् - **"पर्वतो निर्वह्निर्धूमो वह्नेरभिधेयत्वं मेयत्वस्य व्यभिचारीत्याभ्रमादनुमितिप्रतिबन्धादाह यथार्थेति"**[178] इति । तथाहि लक्षणे 'यथार्थ'पदानुपादाने पर्वतो वह्निमान् इत्यत्र वह्न्यभाववत्पर्वतरूपबाधभ्रमविषये वह्न्यभावादौ अतिव्याप्तिः । तथा हि अनुमितिः पर्वतो वह्निमान्, तत्काराणीभूताभावो वह्न्यभाववान्, पर्वत इति भ्रमाभावः, तत्प्रतियोगिज्ञानविषयत्वस्य वह्न्यभावादौ सत्त्वादिति । यथार्थपदोपादाने तु वह्न्यभाववान् पर्वतो इति ज्ञानस्य यथार्थत्वमिति न दोषो भवति । चन्द्रकलाटीकायामेवमाटीकितम् – **"यथार्थपदानुपादाने पर्वतो वह्निमान् धूमादित्यादौ पर्वतादौ वह्न्यभावादौ चातिव्याप्तिः, पर्वतो वह्निमान् इत्यनुमितौ पर्वतो वह्न्यभाववानित्याकारकभ्रमात्मकनिश्चयाभावस्यापि कारणतया अनुमितिकारणीभूताभावप्रतियोगितादृशभ्रमविषयतायाः पर्वतादौ सत्त्वात् । एवं वह्न्यभाववद्वृत्तित्वादावप्यतिव्याप्तिः प्रकृतानुमितेर्व्याप्त्यादिविषयकत्वेन व्याप्ति-विषयकानुमितिप्रतिबन्धकवह्न्यभाववद्वृत्तिर्धूम इत्याकारकभ्रमविषयताया वह्न्या-द्यभाववद्वृत्तित्वादावनपायात् न केवलं व्यतिरेकिसाध्यस्थल एवातिव्याप्तिः केवलान्वयिसाध्यकप्रमेयमभिधेयत्वादित्यादावपि मेयत्वाभिधेयत्वादौ अतिव्याप्तिः, घटत्वाद्यभावादौ प्रतियोगितासम्बन्धेन मेयत्वभ्रमात्मकमेयत्वाभाव-वद्वृत्त्यभिधेयत्वम् इत्याकारकज्ञानस्यापि मेयत्वव्याप्तिविषयकानुमिति-**

---

[178] सा.नि.प्र., सम्पा. सुधाकर मालबीय, पृ. - ७१

**प्रतिबन्धकतया तद्विषयत्वस्य मेयत्वादौ सत्त्वात्, यथार्थपददाने तु न तत्र तत्रातिव्याप्तिः, पर्वतादौ वह्न्यभावादेर्ज्ञानस्य भ्रमात्मकतया यथार्थत्वासम्भवाद्"**[179] इति।

भ्रमविषये साध्याभावादौ अतिव्याप्तिवारणाय यथार्थपदसार्थक्यमित्युक्तम् । परन्तु तन्न युक्तियुक्तम्, तुल्यरीत्या प्रमाविषयेऽपि साध्याभावादावतिव्याप्तिः स्यात् । यथानुमितिकारणीभूताभावप्रतियोगि हि 'वह्न्यभाववान् पर्वत' इति भ्रमविषयत्वं वह्न्यभावे वर्तते तथैव अनुमितिकारणीभूताभावप्रतियोगि 'वह्न्यभाववान् ह्रद' इति प्रमाविषयत्वमपि वह्न्यभावे वर्तते । तत्रत्य अतिव्याप्तिवारणाय यो हि प्रकारोऽनुष्ठीयते तेनैव भ्रमविषये साध्याभावादौ अतिव्याप्तिवारणं सम्भवतीति यथार्थपदमनावश्यकम् । यद्वा प्रत्येकं साध्याभावादेर्हेत्वाभासतापत्तिः स्यात् । तत्र प्रतिबन्धकीभूतप्रमाविषयत्वस्य सत्त्वादतो यथार्थपदाघटितं किमपि लक्षणं करणीयं, तथाहि गङ्गेशोपाध्यायैः द्वितीयहेत्वाभाससामान्यलक्षणं लक्षितम् – **"यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम्"**[180] इति । परन्तु तर्कसंग्रहकृता अतःपरं किमपि नोक्तम्, तथा च कारिकावलीकृतः मतं प्राप्यते ।

कारिकावल्यां च गङ्गेशोपाध्यायानां द्वितीयहेत्वाभासलक्षणमनुसृत्य हेत्वाभासलक्षणं लक्षितम् - **"यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम्"**[181] इति। अर्थात् अनुमितिविरोधित्वमनुमितितत्करणान्यतरप्रतिबन्धकम् । तथा च ज्ञाननिष्ठयद्विषयकत्वावच्छिन्नानुमितितत्करणान्यतरप्रतिबन्धकत्वं तद्विषयत्वं हेत्वाभासत्वम् । तथाहि लक्ष्ये लक्षणमुपपादयति **"यद्विषयकत्वेन ज्ञानस्य**

---

179 सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसमेत), पृ. - ५५

180 सा.नि.प्र., सम्पा. द्विवेदी-भट्टाचार्य-शास्त्री-शास्त्री, पृ. – १५८०

181 का.व., सम्पा. पञ्चाननशास्त्री, पृ.- ३७४

**अनुमितिविरोधित्वात्ते दोषाः"**[182] इति । तथा च पर्वतो धूमवान् वह्निमत्त्वादित्यनुमितौ करणस्य धूमाभाववदवृत्तिर्वह्निनरिति व्याप्तिज्ञानस्य प्रतिबन्धको धूमाभाववद्वृत्तिर्वह्निनरिति निश्चयः। तादृशनिश्चयनिष्ठा प्रतिबन्धकता धूमाभाववद्वृत्तिवह्निविषयकत्वावच्छिन्नेति धूमाभाववद्वृत्तिवह्निव्यभिचारः। एवं ह्रदो वह्निमानित्यनुमितौ वह्न्यभाववान् ह्रद इति बाधनिश्चयः प्रतिबन्धकः। तादृशनिश्चयनिष्ठा प्रतिबन्धकता वह्न्यभाववद्ध्रदविषयकत्वावच्छिन्नेति वह्न्यभाववद्ध्रदो बाध इति।

ननु पर्वतो वह्निमानित्यनुमितौ वह्न्यभाववान् पर्वत इति बाधभ्रमः प्रतिबन्धकः। तादृशभ्रमनिष्ठा प्रतिबन्धकता वह्न्यभाववत्पर्वतविषयकत्वावच्छिन्नेति वह्न्यभाववत्पर्वतस्य दोषत्वे सद्धेतोर्धूमस्य दुष्टत्वप्रसङ्ग इति चेदाह मुक्तावल्याम् – **"यद्विषयकत्वञ्च यादृशविशिष्टविषयकत्वं बोध्यम्, तेन बाधभ्रमस्य अनुमितिविरोधित्वेऽपि न क्षतिः"**[183] इति। अत एव पर्वतो वह्निमानित्यनुमितौ वह्न्यभाववान् पर्वत इति बाधभ्रमस्यानुमितिप्रतिबन्धकत्वेऽपि तादृशप्रतिबन्धकता न वह्न्यभाववत्पर्वतत्वावच्छिन्नविषयकत्वावच्छिन्ना, वह्न्यभाववत्पर्वतस्य अप्रसिद्ध-त्वादिति सद्धेतुमात्रे वह्न्यभाववत्पर्वतादेर्दोषत्वं हेतोर्दुष्टत्वञ्च नास्तीति। एवञ्च ज्ञाननिष्ठयद्रूपावच्छिन्नविषयकत्वावच्छिन्नानुमितितत्करणान्यतरप्रतिबन्धकत्वं, तद्रू-पावच्छिन्नविषयत्वं हेत्वाभासत्वमिति। अत्र तु सत्प्रतिपक्षस्यानित्यदोषत्ववादी शङ्कते यत् वह्निव्याप्यधूमवान् पर्वत इति परामर्शकाले वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत इति परामर्शे सति धूमहेतोर्न सत्प्रतिपक्षत्वम्, पाषाणमयत्वे वह्न्यभावव्याप्यत्वाभावेन विशिष्टस्य वह्न्यभावव्याप्यपाषाणमयत्ववत्पर्वतस्याप्रसिद्धत्वाद् इति इष्टापत्तेः। अन्यथा

---

[182] भा.प., सम्पा. पञ्चानन शास्त्री, पृ. – ३७४-३७८

[183] तदेव, पृ. – ३७८-३७९

बाधस्यानित्यदोषत्वापत्तेः । तस्मात्तत्र वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्य नाभासत्वं, भ्रमादनुमितिप्रतिबन्धमात्रम्, हेतुस्तु न दुष्ट इति । इत्थञ्च साध्याभाववद्वृत्तिहेत्वादिकं दोषः, तद्वत्त्वञ्च हेतौ येन केनापि सम्बन्धेनेति नव्यनैयायिका वदन्ति, प्राञ्चस्तु वदन्ति यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम् । सत्प्रतिपक्षस्थले विरोधिव्याप्त्यादिकमेव तथा । तद्वत्त्वञ्च हेतोर्ज्ञानरूपसम्बन्धेन । न चैवं वह्निमान् धूमादित्यादौ पक्षे बाधभ्रमस्य साध्याभावविषयकत्वेनानुमितिविरोधित्वाज्ज्ञानरूपसम्बन्धेन तद्वत्त्वस्यापि सत्त्वात् सद्धेतोरपि बाधितत्वापत्तिरिति वाच्यम् इति । तत्र ज्ञानस्य सम्बन्धत्वाकल्पनात् । अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात्, तत्र बाधित इति व्यवहाराभावादिति केचिद् वदन्ति । अनुमितिविरोधित्वञ्चानुमितितत्करणान्यतरविरोधित्वम्, तेन व्यभिचारिणि नाव्याप्तिः ।

ननु पर्वतो वह्निमान् द्रव्यत्वादित्यनुमितौ वह्न्यभाववद्वृत्तिद्रव्यत्वरूपव्यभिचारस्य दोषत्वे तेन दोषेण धूमोऽपि दुष्टः स्यादिति चेदुच्यते विश्वनाथन्यायपञ्चाननमहापादैः - **“दोषज्ञानञ्च यद्धेतुविषयकम्, तद्धेतुकानुमितौ प्रतिबन्धकम्, तेनैकहेतौ व्यभिचारज्ञाने हेत्वन्तरेणानुमित्युत्पत्तेस्तदभावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेऽपि न क्षतिः”**[184] इति ।

ननु निर्वह्निपर्वतो वह्निमान् धूमादित्यादौ न कोऽपि हेत्वाभासः स्यात्, वह्न्यभावविशिष्टपर्वतविशेष्यकवह्निप्रकारकज्ञानस्य आहार्यत्वेन तन्निष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वस्य कुत्रापि असत्त्वादित्याशङ्कायां दीधितिकाराभिमतमनुमित्यघटितं हेत्वाभाससामान्यलक्षणमाह मुक्तावल्याम् – **“यादृशसाध्यपक्षहेतौ**

---

[184] भा.प., सम्पा. पञ्चानन शास्त्री, पृ. - ३८४

**यावन्तो दोषा, तावदन्यान्यत्वं तत्र हेत्वाभासत्वम्"**[185] इति ।

न्यायरत्नेऽपि गङ्गेशोपाध्यायमतमवलम्ब्य उवाच – **"तत्तदनुमितिकारणीभूत-तृतीयलिङ्गपरामर्शप्रमात्वनिरूपकव्याप्तिपक्षधर्मतावैशिष्ट्यव्यतिरेक एव हेत्वा-भासत्वम्"**[186] इति ।

ननु हेत्वाभासत्वस्य केवलान्वयित्वादितरभेदसाधकत्वं न संपनीपद्यत इति आशङ्क्य तत्तदनुमितिहेत्वाभासत्वस्येतरभेदसाधकत्वान्निरूपणं युज्यत इति शङ्कोत्तराभ्यामुच्यते न्यायाचार्यमणिकण्ठमिश्रेण तदीये न्यायरत्नरूपदर्शनशास्त्रे— **"यद्यपि हेत्वाभासत्वं केवलान्वयित्वान्नेतरभेदसाधकम्, तथापि तत्तदनुमिति हेत्वाभासत्वस्य तादृशत्वात् तन्निरूप्यते"**[187] इति ।

ननु हेत्वाभासत्वं दुर्निरूपं, विकल्पासहत्वादिति चेदुच्यते— **"तच्च तत्तदनुमितिकारणीभूताभावप्रतियोगिज्ञानविषयित्वं वा?"**[188] इति । अर्थात् तत्तदनुमितौ कारणीभूतो योऽभावः स व्यभिचारादिज्ञानाभावः, तत्प्रतियोगिज्ञानं व्यभिचारादिज्ञानं, तद्विषयत्वमित्यर्थः । ननु इदमसंगतम्, 'वह्निव्यभिचारी धूमः' इति भ्रमविषयीभूतधूमादौ अतिव्याप्तेः । न च तादृशयथार्थज्ञानविषयित्वं तत्, अतो नोक्तातिव्याप्तिः इति वाच्यम्, ज्ञानस्य विशेषणत्वेऽज्ञायमानतादशायां नित्यदोषे साधारणानैकान्तिकादौ अव्याप्तेः। सर्वदा हेतोर्दुष्टताव्यवहारनियामको दोषो नित्यदोषः। साधारणानैकान्तिको नित्यदोष इत्युच्यते । असाधारणः पक्षे

[185] भा.प., सम्पा. पञ्चानन शास्त्री, पृ. – ३८४-३८५

[186] न्या.र., सम्पा. – टि चन्द्रशेखरन्, पृ.- १६१

[187] तदेव, पृ. - १५८

[188] तदेव, पृ. – १५९

साध्यसन्देहदशायामेषः। हेतोर्दुष्टताव्यवहारस्तदानीमेव निश्चितसाध्यवह्न्यावृत्तत्वस्य हेतौ सत्त्वात् । एवं प्रतिहेतुपरामर्शेन प्रकृतहेतुपरामर्शस्य संबलनदशायामेव वस्तुतः सद्धेतावसिद्धौ वा सत्प्रतिपक्ष इति व्यवहार इति सोऽप्यनित्यदोषः। अनुमितिकारणीभूताभावप्रतियोगिज्ञानविषयत्वमित्यत्र ज्ञानस्य विशेषणत्वविवक्षायां व्यभिचारज्ञानशून्यतादशायां तादृशज्ञानविशिष्टविषयत्वं नास्तीति नित्यदोषे साधारणेऽतिव्याप्तिः । ज्ञानस्योपलक्षणत्वविवक्षायामसाधारण्योत्तीर्णतादशायां पक्षे साध्यस्य साध्याभावस्य वा निश्चयदशायां कालान्तरीयतादृशज्ञान-विशषयत्वमादायातिव्याप्तिः। प्रतिपरामर्शसंवलनाभावदशायामपि कालान्तरीयज्ञान-विषयत्वमादायातिव्याप्तिः। तथाहि भणितम्— **"तत्तदनुमितिकारणीभूत-ज्ञानाविषयत्वं वा?"**[189] इति । अर्थात् तत्तदनुमितौ कारणीभूतं यज्ज्ञानं परामर्शः, तदविषयत्वमित्यर्थः। सिद्ध्यसिद्धिपराहतत्वेन तादृशज्ञानविषयत्वस्य वक्तुमशक्यत्वादिति समुच्यते— **"व्याप्तिपक्षधर्मताशून्यत्वं वा ?"**[190] इति । ननु यत्किञ्चिद्व्याप्तिपक्षधर्मताशून्यत्वं तत् ? अथवा प्रकृतव्याप्तिपक्षधर्मताशून्यत्वम् ? नाद्यः, सद्धेतावतिव्याप्तेः, तस्य तत्र सत्त्वात् । न द्वितीयः, असंभवादिति । दुष्टहेतौ प्रकृतसाध्यव्याप्तेः प्रकृतपक्षधर्मताया वा हेतावप्रसिद्धत्वेन प्रकृतसाध्यव्याप्तिविशिष्ट-प्रकृतपक्षधर्मतायाः अप्रसिद्ध्या तच्छून्यत्वं सुतराम्प्रसिद्धमित्यसंभव इति । तदुक्तं— **"व्याप्तिपक्षधर्मताप्रमितत्वशून्यत्वं वा ?"**[191] इति । अर्थात् प्रमित्वस्य सिद्धत्वे तच्छून्यत्वस्य वक्तुमशक्यत्वात् तस्यासिद्धत्वे सुतरां वक्तुमशक्यत्वादिति दूषणं बोध्यम् । तदेवं विकल्प्य ययोद्देश्यं दूषयति— **"नाद्यः। समूहालम्बनेन यत्र घटपटयोर्गुणवत्त्वं गृहीत्वा तथैव व्याप्तिं स्मृत्वा, तथैव लिङ्गपरामर्शादिकत्र**

---

[189] न्या.र., सम्पा. – टि चन्द्रशेखरन्, पृ. - १५९

[190] तदेव

[191] तदेव, पृ. – १६०

**द्रव्यत्वमपरत्रानित्यत्वमेकत्रैव वा द्वयमनुमीयते, तत्र समूहालम्बनरूपतृतीयलिङ्गपरामर्शविषयस्य गुणवत्त्वस्य घटद्रव्यत्वसाधने हेत्वाभासत्वप्रसङ्गात् । न द्वितीयः। अत्रैव घटानित्यत्वसाधने गुणवत्त्वस्याहेत्वाभासप्रसङ्गात्, अनुमितिकारणीभूतज्ञानविषयत्वस्यैव विद्यमानत्वात् । एवमन्यत्राप्यूह्यम् । न तृतीयः। शब्दानित्यत्वसाधने कृतकत्वे श्रावणत्वेन प्रतिपक्षिते तस्यां दशायां हेत्वाभासत्वं न वर्तते । नापि चतुर्थः, पूर्वदूषणेनैव निरस्तत्वात्, व्याप्तिपक्षधर्मतातत्प्रमितीनां सत्त्वात् । यद्वा तथाविधसमूहालम्बन एवातिव्याप्तिः। अपि च यत्किञ्चिद् व्याप्तिपक्षर्मतादिव्यतिरेकेण चाप्रसिद्धिः, प्रतियोगिनोऽप्रमितेः।"**[192] इति ।

ननु हेतुलक्षणरहितत्वे सति हेतुवदवभासमानत्वं हेत्वाभासत्वमिति चेन्न, विकल्पासहत्वात् । पक्षधर्मेत्यादिपञ्चरूपर्हितत्वं (पक्षधर्मत्वं, सपक्षधर्मत्वं, विपक्षधर्मत्वं, अबाधिततत्वम्, असत्प्रतिपक्षत्वं चेति गमकतौपयिकानि पञ्च रूपाणि) वा ? यस्य हेतोर्यानि रूपाणि सन्ति, तदन्यतररूपरहितत्वं वा ? नाद्यः, व्यतिरेक्यादावतिव्याप्तेः । न द्वितीयः, अननुगमापत्तेः । एवञ्च हेतुवदवभासमानत्वस्य वैयर्थ्यं स्यात् । ननु धूमानुमाने घटादावतिव्याप्तिनिवृत्तये तद्विशेषणोपादानमिति चेन्न, तस्य तत्र हेत्वाभासत्वादेव । न च वाच्यं घटे न कथं हेत्वाभासपदप्रयोगः । विवेकिनामस्त्येव । अपि च हेतुवदवभासमानत्वमस्ति वदता वक्तव्यम्— यत्किञ्चिद्रूपेण हेतुवदवभासमानत्वं वा ? पञ्चम्यन्तादिरूपेण हेतुवदवभासमानत्वं वा? नाद्यः, घटादावतिव्याप्तेः, तस्य तत्र सत्त्वात् । न द्वितीयः, पूर्वोक्तदोषानतिवृत्तेः। किञ्च पूर्णलक्षणस्याज्ञायमानतादशायां नित्यदोषे साधारणानैकान्तिकादावव्याप्तेरिति ।

---

[192] न्या.र., सम्पा. – टि चन्द्रशेखरन्, पृ. - १६०

अस्य सिद्धान्त एवं प्रदीयते आचार्येण— **"तत्तदनुमितिकारणीभूततृतीयलिङ्ग-परामर्शप्रमात्वनिरूपकव्याप्तिपक्षधर्मतावैशिष्ट्यव्यतिरेक एव हेत्वाभासमानत्वम् । तथाहि — विरुद्धसव्यभिचारयोर्व्याप्त्यभावात्प्रमाभूतलिङ्गपरामर्शव्यतिरेकः। आश्रयासिद्धस्वरूपासिद्धयोः पक्षधर्मताविरहात् । व्याप्यत्वासिद्धे ज्ञानस्यैव विरहात् । सिद्धसाधनस्य यदि दोषत्वं तदा पक्षधर्मताविरहादेव । पक्षधर्मतावच्छेदकस्य सन्देहस्य विरहाद्बाधोऽपि यदा व्याप्तिविरहात् । प्रतिपक्षे तु परस्परप्रतिबन्धकात् तृतीयलिङ्गपरामर्शानुदय इत्यग्रे वक्ष्यते ।"**[193] इति ।

वस्तुतस्त्वनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकरूपवत्त्वं हेत्वाभासत्वम् । यद्यपि सत्प्रतिपक्षे परामर्शस्य ज्ञानं न प्रतिबन्धकम्, तथापि अनुमितिप्रतिबन्धकत्वेनैतद्विषयः प्रतिसाधनम् । यद्विषयतावच्छेदकं पूर्वसाधनम्, स्वरूपसम्बन्धेन तद्वता पूर्वसाधनता तु अस्त्येव । तथा च दुष्टहेतौ हेतुदोषव्यभिचारादौ च हेत्वाभासपदप्रोयोगे वत्साहित्यासाहित्याभ्यामुभय-लक्षणमप्युक्तं भवति । यद्यपि 'धूमो वह्निव्यभिचारी' इति ज्ञानस्यानुमितिप्रतिबन्धकत्वेन तद्विषयतावच्छेदके व्यभिचारी भवत्येव, तथापि तद्वत्त्वं न धूमेऽस्तीति नातिव्याप्तिः, अत्रानुमितितत्करणान्यतरसाक्षात्प्रतिबन्धकत्व-पुरस्कारेण अनुमितिप्रतिबन्धकस्य उक्तत्वात् । अत एव अनुमितिप्रतिबन्धकत्वं साक्षाद्वा ? परम्परया वा ? नाद्यः, व्यभिचारादावव्याप्तेः। न द्वितीयः, व्यभिचारज्ञानद्वारा व्याप्तिज्ञानविघटकोपाधावतिव्याप्तेः, बाधसत्प्रतिपक्षयोरव्याप्तेः चेत्यादि दूषणं निरस्तमिति ।

---

[193] न्या.र., सम्पा. – टि चन्द्रशेखरन्, पृ. - १६१

अत एव दृश्यते यद् यद्यप्यत्र निबन्धे मया केवलं नैयायिकत्रयस्य मतमुल्लिखितं, तथापि वक्तुं शक्यते यद् एतेषां मतमवलम्ब्याचार्यत्रयेण यल्लक्षणं कृतं हेत्वाभासस्य तत्तु सम्पूर्णतया गङ्गेशस्य हेत्वाभासलक्षणमवलम्ब्यैव । तथापि तत्राचार्यत्रयकृतलक्षणे हेत्वाभासविषये संशयो न दूरीभूतः। परन्तु आचार्यगङ्गेशकृतहेत्वाभासलक्षणत्रयपठनात्परं कोऽपि संशयो न भवति । किञ्चात्र सूत्रस्य स्मरणीयम् –

“अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।

अस्तोभमन्यवद्यञ्च सूत्रं सुत्रविदो विदुः॥”

अत एव दृश्यते लक्षणस्य प्रधानं तथान्यतमं वैशिष्ट्यं ह्यसन्दिग्धमिति । एतद्दृष्ट्या वक्तुं शक्यते यद् गङ्गेशकृतहेत्वाभासलक्षणमुत्कर्षतमन्येषामपेक्षया ।

# उपसंहृतिः

# उपसंहृतिः

इदानीं *'हेत्वाभाससामान्यनिरुक्तौ गदाधरजगदीशयोर्मतवैशिष्ट्यपर्यालोचनम्'* इति विषयमधिकृत्य गुम्फितो निबन्ध उपसंह्रियते । तत्र उपोद्धातोपसंहारसनाथितः षडाध्यायात्मकोऽयं शोधनिबन्धः। तत्र उपोद्धाते शोधबन्धनिर्मितिप्रवृत्तौ बहुशो निमित्तान् निरूप्य मच्छोधनिबन्धस्योपयोगित्वं प्रपञ्चितम् । आदौ एकः प्रश्न आयाति यत् निबन्धपत्रस्य मूलाख्ये कथं गदाधरस्य नाम प्रथमं प्रदत्तं मया ? यतः गदाधरभट्टाचार्यो जगदीशात् परवर्ती । अत एव जगदीशस्य वचनं प्रथमे दातव्यमिति। परन्तु मया तन्न कृतम् । अस्या आशङ्कायाः समाधानं हि मम निबन्धे जगदीशापेक्षया गदाधरस्य मतस्य गुरुत्वमधिकतया व्यक्तम् । अपि च, तस्य मतं सूक्ष्मातिसूक्ष्मतया विचार्य्य दृश्यते तन्मतं श्रेष्ठमिति । अत एव तस्य नामग्रहणं मयादौ कृतम् ।

षडाध्यायात्मकस्य शोधनिबन्धस्य **प्रथमोऽध्यायस्**तावद् **'विवक्षिताचार्याणां परिचयः'।** तत्र नव्यन्यायतिलकगङ्गेशोपाध्यायस्य, रघुनाथशिरोमणेः, जगदीशस्य, गदाधरस्य च केवलम् आचार्यचतुष्टयस्य आलोचनं विहितम् । ननु नव्यन्यायशास्त्रे बहव आचार्याः सन्ति, केवलमेतेषां परिचयः कथं प्रदत्तः शोधनिबन्धे इति चेदुच्यते

यदि सूक्ष्मातिसूक्ष्मतया मम निबन्धो लक्ष्यते तर्हि प्राप्यते अस्याः शङ्कायाः उत्तरम् । तद्धि निबन्धे केवलं गङ्गेशस्य हेत्वाभाससामान्यलक्षणस्योपरि रघुनाथस्य दीधितिटीकोपरि यत् टीकाद्वयस्य वैशिष्ट्यमालोचितं तत् खलु जगदीशस्य जागदीशी गदाधरस्य गादाधरी चेति । अत एव अन्येषामाचार्याणामावश्यकं प्रत्यक्षतया नायातम्, तथाहि तेषामालोचनं न कृतम् । यद्भवतु, एतेषामाचार्याणां परिचयः समासेन मया प्रदत्तः अध्यायेऽस्मिन् ।

**द्वितीयोऽध्याय**स्तावत् **'सङ्गतिविवेकः'**। अस्मिन्नध्याये पूर्वग्रन्थेन सहास्य ग्रन्थस्य सङ्गतिर्विहिता । ततः 'अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरू-प्यन्ते' इति ग्रन्थस्य व्याख्यानं कृतम् । किञ्च दीधितिकारस्य 'सपरिकरः' इति पदस्य व्याख्या कृता । अपि च, तत्त्वनिर्णयपदस्य, विजयप्रयोजकत्वपदस्य चालोचनं विहितं गदाधरदिशा जगदीशदिशा च ।

**तृतीयोऽध्यायो** हि **'प्रथमहेत्वाभाससामान्यलक्षणविवेकः'**। अध्यायेऽस्मिन् हेत्वाभासस्य प्रथमसामान्यलक्षणं 'अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविष-यत्वम्' इति विचारितम् । तत्र अनुमितिपदस्य प्रयोगविषये गदाधरजगदीशयोरु-भयोर्मतं समालोचितम्, ततः मम मतमपि तत्र दत्तम् । अपि च, यथार्थपदस्य समालोचनं प्रदत्तम् । पुनश्च लक्षणस्य समासतात्पर्यमपि विहितम् ।

**चतुर्थोऽध्याय**स्तावद् **'द्वितीयहेत्वाभाससामान्यलक्षणविवेकः'**। तत्र 'यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्' इति द्वितीयलक्षणस्य

यद्विषयकत्वपदस्य, लिङ्गमविवक्षितमित्यस्य, अव्यापकविषयिताशून्यत्वनिवेश-कल्पस्य, विशिष्टान्तराघटितनिवेशकल्पस्य, विशेषणत्रयसार्थकताया, न च चतुष्टयस्य, अत्र वदन्ति इति कल्पस्य च गदाधरजगदीशयोर्मतवैशिष्ट्यं सम्यग्रूपेण प्रदत्तम् ।

**पञ्चमोऽध्यायो** हि **'तृतीयहेत्वाभाससामान्यलक्षणविवेकः'**। 'ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वं वा' इति तृतीयलक्षणस्य सारः प्रथमे प्रदत्तः, ततश्च दीधितिकारस्य 'अथ दशाविशेषे' इत्यस्य व्याख्यानं कृतम् । ततः हेत्वाभासलक्षणत्रये किं लक्षणं श्रेष्ठं तत्प्रयुक्तम् । तत्र भणितं द्वितीयलक्षणं निष्कर्षतममिति । ततश्च पञ्चविधानां सव्यभिचार-विरुद्ध-असिद्ध-सत्प्रतिपक्ष-बाधितहेत्वाभासानां समासेन आलोचनं कृतम् ।

**षष्ठोऽध्याय**स्तावद् **'आचार्यकृतहेत्वाभासलक्षणस्योत्कर्षताविवेकः'**। तत्र न्याय-वैशेषिकशास्त्रे ये तावदाचार्याः सन्ति तेषु प्रायः प्रत्येकमाचार्यस्य हेत्वाभासलक्षणम् उल्लिख्य गङ्गेशस्य लक्षणं कथं श्रेष्ठं तत् सयुक्तिकं प्रदत्तम् । यथा तर्कसंग्रहकृता, भाषापरिच्छेदकृता, न्यायरत्नकृता, एवं प्रायः प्रत्येकमाचार्येण गङ्गेशस्य हेत्वाभासलक्षणानि अवलम्ब्य तेषां हेत्वाभासलक्षणं कृतम् ।

परिशेषे ममैकाशा वर्तते नव्यन्यायहेत्वाभासस्वरूपजिज्ञासूनां नितरामनेन शोधनिबन्धेन जिज्ञासानिवृत्तिर्भवेत् । पुनश्चाशासेऽहं भाविनि कालेऽपि मद्विरचितमिमं विषयमाधारीकृत्य पुनः पुनरनुसन्धाने क्रियमाणे नूतनविचाररत्नप्राप्तिर्भवेदिति शम् ।

# मूलचिन्तामणिः

# मूलचिन्तामणिः

अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते । तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् । यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम् । ज्ञायमानं सदनुमितिप्रतिबन्धकं यत्तत्त्वं हेत्वाभासत्वम् । दशाविशेषे हेत्वोरेवासाधारणसत्प्रतिपक्षयोराभासत्वात्तद्बुद्धेरप्यनुमितिप्रतिबन्धकत्वम् ।

यद्यपि बाधसत्प्रतिपक्षयोः प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वान्न लिङ्गाभासत्वम्, तथापि ज्ञायमानस्याभासस्यात्र लक्षणम् । यद्वा प्रत्यक्षादौ बोधेन न ज्ञानं प्रतिबध्यते किन्तूत्पन्नज्ञानेऽप्रामाण्यं ज्ञाप्यतेऽनुमितौ तूत्पत्तिरेव प्रतिबध्यते । ते च सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च ।

इति महामहोपाध्यायश्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ सामान्यनिरुक्तिप्रकरणम् ॥

# सहायकग्रन्थपञ्जी

# ॥ सहायकग्रन्थपञ्जी ॥


- अन्नंभट्टः। तर्कसंग्रहः। सम्पा. सत्करीशर्मा वङ्गीय। वाराणसी: चौखम्बा संस्कृत सीरीज् अफिस्, २००६। मुद्रण।
- अन्नंभट्टः। तर्कसंग्रहः। सम्पा. नारायण चन्द्र गोस्वामी। कोलकाता : संस्कृत पुस्तक भाण्डार, २०१२। मुद्रण।
- अन्नंभट्टः। तर्कसंग्रहः। सम्पा. पञ्चानन शास्त्री। कोलकाता : नवभारत पावलिशार्स्, १३९२ (वङ्गाब्द)।
- उदयनाचार्य। किरणावली (१, २ एवं ३)। सम्पा. गौरीनाथ शास्त्री। कोलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९९० एवं १९९१ (प्रथम संस्करण)।
- उदयनः। न्यायकुसुमाञ्जलिः। सम्पा. श्रीमोहन भट्टाचार्य। कोलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९९५ ।
- 'उपनिषद्ग्रन्थावली' (वृहदारण्यकोपनिषद्)। सम्पा. स्वामी गम्भीरानन्द। कोलकाता: उद्बोधन कार्यालय, २००० (दशम पुनर्मुद्रण) ।
- उद्द्योतकर। न्यायवार्तिक। सम्पा. विन्ध्येश्वरी प्रसाद। वारणसी : भारतीय विद्या प्रकाशन, १९६६ ।

❖ कणादः। वैशेषिकदर्शनम्। अनुवादक : उपेन्द्रनाथ मुखोपाध्याय। कोलकाता : वसुमती कर्पोरेशन् लिमिटेड्, १३९५ वङ्गाब्द (द्वितीय संस्करण)।

❖ कणाद। वैशेषिकसूत्रोपस्कार। सम्पा. शेख साविर आलि। कोलकाता : संस्कृत बुक् डिपो, २०१३ (प्रथम संस्करण)। मुद्रण।

❖ कौटिल्य। अर्थशास्त्र। सम्पा. मानवेन्दु बन्द्योपाध्याय। कोलकाता : संस्कृत पुस्तक भाण्डार, २००२। मुद्रण।

❖ गङ्गेशोपाध्यायः। तत्त्वचिन्तामणिः। सम्पा. ब्रह्मचारी मेधाचैतन्य। कोलकाता : आद्यापीठ बालकाश्रम, १४१७ वङ्गाब्द (प्रथम संस्करण)।

❖ गङ्गेशोपाध्यायः। सामान्यनिरुक्तिः। सम्पा. श्रीरूपनाथ झा। मिथिला : मिथिला विद्यापीठ, १९७०।

❖ गङ्गेशोपाध्याय। तत्त्वचिन्तामणिः (उपाध्यादिबाधान्तः)। सम्पा. नगीन जी. शाह। दिल्ली : मोतिलाल बनारसी दास पाबलिशार्स् प्राइभेट् लिमिटेड्, २००५ (प्रथम संस्करण)। मुद्रण।

❖ गङ्गेशोपाध्यायः। व्याप्तिपञ्चकम्। सम्पा. श्री गङ्गाधर कर। कोलकाता : यादवपुर विश्वविद्यालय, २०१५।

❖ गङ्गेशोपाध्यायः। तत्त्वचिन्तामणिः (द्वितीयभागः प्रथमपरिच्छेदः)। सम्पा. प. कामाख्यानाथ तर्कवागीश। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१०।

❖ गङ्गेशोपाध्यायः। व्याप्तिपञ्चकम्। सम्पा. राजेन्द्रनाथ घोष। कोलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २०१२। मुद्रण।

❖ गङ्गेशोपाध्यायः। सामान्यनिरुक्तिप्रकरणम्। सम्पा. वामाचरण भट्टाचार्य। वाराणसी : श्री साधुवेला आश्रम, विजया दशमी सम्बत् २०१०।

❖ गङ्गेशोपाध्यायः। सामान्यनिरुक्तिः। सम्पा. द्विवेदी, भट्टाचार्य, शास्त्री एवं शास्त्री। वाराणसी : चौखम्बा संस्कृत सीरीज् अफिस्, १९७०। मुद्रण।

❖ गङ्गेशोपाध्यायः। तत्त्वचिन्तामणिः (२)। सम्पा. प्रो. एन्. एस्. रामानुज ताताचार्य। तिरुपति : राष्ट्रियसंस्कृतविद्यापीठम्, १९९९ (प्रथम संस्करण)।

❖ गङ्गेशोपाध्यायः। पक्षताचिन्तामणिः एवं सामान्यनिरुक्तिः। सम्पा. सुबुद्धिचरण गोस्वामी। नवदिल्ली : राष्ट्रीय पाण्डुलिपि मिशन्, २०१३ (प्रथम संस्करण)।

❖ गङ्गेशोपाध्यायः। सिद्धान्तलक्षणम्। सम्पा. शैलजापति मुखोपाध्याय। कोलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९९१ ।

❖ गौतम। न्यायदर्शन (प्रथम भाग)। सम्पा. फणिभूषण तर्कवागीश। कोलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २०१२। मुद्रण।

❖ गौतमः। न्यायदर्शनम्। सम्पा. अनन्तलालठक्कुर। मिथिला: मिथिलाविद्यापीठ, १९६७ ए.ड.।

❖ गौतम। न्यायदर्शन (पञ्चम भाग)। सम्पा. फणिभूषण तर्कवागीश। कोलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९८९। मुद्रण।

❖ झालकिकरः, भीमाचार्यः। न्यायकोशः। सम्पा. वासुदेव शास्त्री अभ्यंकर। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१५ ।

❖ पतञ्जलि। महाभाष्य (पस्पशाह्निक)। सम्पा. ब्र. मेधाचैतन्य। कोलकाता : आद्यापीठ वालकाश्रम, २००७। मुद्रण।

❖ पाणिनि। अष्टाध्यायी। सम्पा. ड. तपनशङ्कर भट्टाचार्य। कोलकाता : संस्कृत बुक् डिपो, २०१२ । पुनर्मुद्रण ।

❖ प्रशस्तपाद। प्रशस्तपादभाष्य (१ एवं २)। सम्पा. दण्डीस्वामी दामोदर आश्रम। कोलकाता : आद्यापीठ बालकाश्रम, २००० एवं २०१४। मुद्रण।

❖ बाङ्गालीर सारस्वत अवदान : वङ्गे नव्यव्याय चर्चा। सम्पा. दीनेशचन्द्र भट्टाचार्य। कोलकाता: वङ्गीय साहित्य परिषत्, १४१४ वङ्गाब्द। मुद्रण।

❖ भट्ट, कुमारिल। मीमांसाश्लोकवार्तिक (प्रथम भाग)। सम्पा. ई. श. वरदाचार्य। दिल्ली: राष्ट्रीय संस्कृत संस्थान, १९८८। मुद्रण।

❖ भट्टाचार्यः, गदाधरः। गादाधरी। सम्पा. प. श्रीकीर्त्यानन्द झा। वाराणसी: चौखम्बा संस्कृत सीरीज् अफिस्, २०१०। मुद्रण।

❖ भट्टाचार्यः, गदाधरः। गादाधरी (सामान्यनिरुक्तिः)। सम्पा. शिवादित्य मिश्र। वाराणसी : चौखम्बा संस्कृत सीरीज् अफिस्,२०१०। मुद्रण।

❖ भट्टाचार्यः, गदाधरः। गादाधरी (सामान्यनिरुक्तिः)। सम्पा. डा. सुधाकरमालवीय। वाराणसी : चौखम्बा संस्कृत भवन, २००७ ।

❖ भट्टाचार्यः, गदाधरः। मुक्तिवादः। सम्पा. प. ढुण्ढिराजशास्त्री। वाराणसी : चौखम्बा संस्कृत सीरीज् अफिस्, १९९१ (प्रथम संस्करण) ।

❖ भट्टाचार्यः, गदाधरः। व्युत्पत्तिवादः (प्रथमो भागः)। सम्पा. आचार्यः हरेकृष्णशतपथी। तिरुपति : राष्ट्रियसंस्कृतविद्यापीठम्, २०११। मुद्रण।

❖ भट्ट, जयन्त। न्यायमञ्जरी। सम्पा. पण्डित सूर्यनारायण शुक्ल। वाराणसी : चौखम्बा संस्कृत सीरीज् अफिस्, १९३६ (प्रथम संस्करण)।

❖ तर्कालंकार, जगदीश। जागदीशी (सामान्यनिरुक्तिप्रकरणम्)। सम्पा. यादवेन्द्रनाथ भट्टाचार्य। कोलकाता : संस्कृत ग्रन्थालय, १९६५ ।

❖ सामान्यनिरुक्तिसौगन्ध्यम्। सम्पा. डा. राजाराम शुक्ल। वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, २००३ ।

❖ वैशेषिकदर्शन (एक अध्ययन)। सम्पा. नारायण शर्मा। वाराणसी : चौखम्बा विद्याभवन, १९६१ ।

❖ सुरि, हरिभद्र। षड्दर्शनसमुच्चय। सम्पा. एल. साउलि। कोलकाता : दि एशियाटिक् सोसाइटि, १९८६ ।

❖ भारतीय षड्दर्शन शास्त्र। सम्पा. चन्द्रकान्त तर्कालंकार। कोलकाता : संस्कृत पुस्तक भाण्डार, २००१ ।

❖ भारतीय दर्शनशास्त्र का इतिहास। सम्पा. देवराज एवं तिवारी। ईलाहावाद : हिन्दुस्तानी एकेडेमी, १९५० (प्रथम संस्करण)।

❖ भारतीयदर्शनेर रूपरेखा। सम्पा. ड. अमित भट्टाचार्य। कोलकाता : संस्कृत बुक् डिपो, २००३। मुद्रण।

❖ भारतीय दर्शन कोष (१)। सम्पा. भट्टाचार्य एवं भट्टाचार्य। कोलकाता : संस्कृत कलेज्, १३८३ (वङ्गाब्द)।

❖ भारतीयदर्शने मुक्तिवाद। सम्पा. ड. श्रीविजयभूषण वन्द्योपाध्याय। कोलकाता : महेश लाइब्रेरी, २००२ (द्वितीय संस्करण)।

❖ मनु। मनुसंहिता। सम्पा. मानवेन्दु बन्द्योपाध्याय। कोलकाता : संस्कृत पुस्तक भाण्डार, १४१९ वङ्गाब्द। मुद्रण।

❖ माधवाचार्यः। सर्वदर्शनसंग्रहः ( द्वितीय खण्ड)। सम्पा. सत्यज्योति चक्रवर्त्ती। कोलकाता : साहित्यश्री, १३८६ ।

❖ माधवाचार्यः। सर्वदर्शनसंग्रहः। सम्पा. वासुदेव शास्त्री अभ्यंकर। पुने : भाण्डारकर ओरियेण्टाल् रिसार्च् इन्स्टिटिउट्, २००८। मुद्रण।

❖ मिश्र, केशव। तर्कभाषा (१ एवं २)। सम्पा. गङ्गाधर कर। कोलकाता : यादवपुर विश्वविद्यालय एवं महाबोधि बुक् एजेन्सि, २०१३ (द्वितीय संस्करण) एवं २०१४ (द्वितीयसंस्करण)। मुद्रण।

❖ मिश्र, मणिकण्ठ। न्यायरत्न। सम्पा. टि चन्द्रशेखरन्। माद्राज : माद्राज गभर्नमेन्ट् ओरियेन्टल् सीरीज्, १९५३।

❖ मिश्र, वाचस्पति। न्यायवार्तिकतात्पर्यटीका। सम्पा. श्री राजेश्वर शास्त्री द्राविड। वाराणसी : चौखम्बा संस्कृत संस्थान, १९९० (पुनर्मुद्रण) ।

❖ मिश्र, शिवादित्य। सप्तपदार्थी। सम्पा. अमरेन्द्रमोहन तर्कतीर्थ। कोलकाता : मेट्रो पलिटन् प्रिण्टिं एण्ड् पावलिशार्स् हाउस्, १९३४ (प्रथम संस्करण)।

❖ मिश्र, शिवादित्य। सप्तपदार्थी। सम्पा. ड. तपनशंकर भट्टाचार्य। कोलकाता : संस्कृत बुक् डिपो, २०१४ (प्रथमसंस्करण)। मुद्रण।

❖ दर्शनशास्त्रस्येतिहासः। सम्पा. श्रीज्वालाप्रसादगौडः। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१२। मुद्रण।

❖ नवद्वीपेर इतिवृत्त। सम्पा. मृत्युञ्जय मण्डल। नदीया : नवद्वीप साहित्य समाज, २०१३ (द्वितीय संस्करण) ।

❖ नदीयार इतिहास (प्रथम पर्व)। सम्पा. कमल चौधुरी। कोलकाता : दे'ज्, २०१२।

❖ न्याय वैशेषिक दर्शन। सम्पा. करुणा भट्टाचार्य्य। कोलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २०१३। मुद्रण।

❖ न्यायदर्शने निग्रहस्थान। सम्पा. रत्ना दत्त शर्मा। कोलकाता : यादवपुर विश्वविद्यालय, १४१७ वङ्गाब्द ।

❖ न्यायपरिचय। सम्पा. फणिभूषण तर्कवागीश। कोलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २००७। मुद्रण।

❖ न्यायपञ्चानन, विश्वनाथ। भाषापरिच्छेद। सम्पा. पञ्चाननशास्त्री। कोलकाता: संस्कृत पुस्तक भाण्डार, १९८४। मुद्रण।

❖ न्यायपञ्चानन, विश्वनाथ। न्यायसिद्धान्तमुक्तावली। सम्पा. श्रीकृष्णवल्लभाचार्य। वाराणसी : चौखम्बा संस्कृत सीरीज् अफिस्, २०११। मुद्रण।

❖ न्यायपञ्चानन, विश्वनाथ। कारिकावली। सम्पा. आत्मारामशर्मा। नवदिल्ली : राष्ट्रीय संस्कृत संस्थान , २०१२। मुद्रण।

❖ न्यायपञ्चानन, विश्वनाथ। न्यायसूत्रवृत्ति। सम्पा. शेख साविर आलि। कोलकाता: संस्कृत पुस्तक भाण्डार, २०१५ (प्रथम प्रकाश)।

❖ न्याय-वैशेषिक एक चिन्तन। सम्पा. राममूर्ति शर्मा। नवदिल्ली : राष्ट्रियसंस्कृतसंस्थान, १९९८ ।

❖ न्यायरत्न, महेशचन्द्र। नव्यन्यायभाषाप्रदीपः। सम्पा. श्रीकालीपद तर्काचार्य। कोलकाता : संस्कृत कलेज्, १९७३ (प्रथम संस्करण)।

- याज्ञवल्क्य। याज्ञवल्क्यसंहिता। सम्पा. सुमिता बसु। कोलकाता : संस्कृत पुस्तक भाण्डार, २०११। मुद्रण।
- वल्लभाचार्य। न्यायलीलावती। सम्पा. पण्डित हरिहर शास्त्री। वाराणसी : चौखम्बा संस्कृत सीरीज् अफिस्, १९९१ (प्रथम संस्करण)। मुद्रण।
- वरदराज। तार्किकरक्षा। सम्पा. सरोजा कौशला। दिल्ली : हंस प्रकाशन, १९९७। मुद्रण।
- वाचस्पत्यम् (पञ्चमो भागः)। सम्पा. श्रीतारानाथ तर्कवाचस्पति भट्टाचार्य। वाराणसी : चौखम्बा संस्कृत सीरीज् अफिस्, १९६२ ।
- व्याकरणदर्शनस्य दर्शानन्तरैः सह तुलनात्मकमध्ययनम्। सम्पा. जगदीश चन्द्र मिश्र। नवदेहली : राष्ट्रियसंस्कृतसंस्थान, २००६ (प्रथमसंस्करण) ।
- राढी, कान्तिचन्द्र। नवद्वीप महिमा। सम्पा. यज्ञेश्वर चौधुरी। नदीया : नवद्वीप पुरातत्त्व परिषद्, २०११ (परिबर्धित संस्करण)। मुद्रण।
- रा. नवीनः। द्वितीयहेत्वाभासलक्षणविमर्शः। सम्पा. का. इ. देवनाथ। तिरुपति : राष्ट्रियसंस्कृतविद्यापीठम्, २०१०। मुद्रण।
- शङ्कराचार्य। वेदान्तदर्शन (१)। सम्पा. स्वामी विश्वरूपानन्द। कोलकाता : उद्बोधन कार्यालय, २००९। मुद्रण।
- शब्दकल्पद्रुमः (द्वितीयो भागः)। सम्पा. राजा राधाकान्त देव। वाराणसी : चौखम्बा संस्कृत सीरीज् अफिस्, १९६१ ।
- श्री चैतन्यदेव ओ समकालीन नवद्वीप। सम्पा. यज्ञेश्वर चौधुरी। नदीया : नवद्वीप पुरातत्त्व परिषद्, २००४ ।

❖ सिंह, अमर। अमरकोष वा अमरार्थचन्द्रिका। सम्पा. श्रीमद्गुरुनाथ विद्यानिधि भट्टाचार्य। कोलकाता : संस्कृत पुस्तक भाण्डार, १९८८।

**English Books :**

❖ A History of Indian Philosophy (Vol.-I). Ed. Surendranath Dasgupta. Delhi : Motilal Banarasi Das Publishers Private Limited, 2012. (7th Reprint).

❖ Annambhatta. Tarkasaṃgraha. Ed. K. C. Mehendale. Varanasi : Bharat-Bharati, 1980 . Print.

❖ An Introduction to Indian Philosophy. Ed. Satischandra Chatterjee & Dhirendramohan Datta. Calcutta : University of Calcutta, 1960. Print.

❖ Gangeśa's Theory of Truth. Ed. Jitendranath Mohanty. Delhi : Motilal Banarasi Das Publishers Private Limited, 1989 (Second Revised edition).

❖ History of Navya-Nyāya in Mithila. Ed. Prof. Dineshchandra Bhattacharya. Darbhanga : Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning, 1958 (1st edition).

❖ Indian Philosophical Systems. Ed. Swami Sarvavutananda. Kolkata : The Ramakrishna Mission Institute of Culture, 2010 (4th edition). Print.

❖ Indian Philosophy (A popular introduction). Ed. Debiprasad Chattopadhyaya. New Delhi : People's Publishing House, 1964. Print.

❖ Indian Philosophy (Vol.-I). Ed. Jadunath Sinha. Delhi : Motilal Banarasi Das Publishers Private Limited, 1999. Print.

❖ Mādhavācārya. Sarvadarśanasaṃgraha. Ed. E. B. Cowell & A. E.

Gough. Delhi : Bharatiya Kala Prakashan, 2008. Print.

- Nature of the Anumāna. Ed. Subuddhi Charan Goswami. Kolkata : The Asiatic Society, 2015. Print.
- Navyanyāya Language and Methodology. Published by Prof. Mihir Kumar Chakraborty. Kolkata : The Asiatic Society, 2010. Reprint.
- Nyāyaratna, Mahesh Chandra. A primer of Navya-nyāya language and methodology (Navyanyāyabhāşāpradīpah). Ed. Ujjwala Jha. The Asiatic Society, 2010. Reprint.
- Goutam. Nyāyasutras. Ed. Prabal Sen. Kolkata: The Asiatic Society, 2003. Print.
- The Essentials of Indian Philosophy. Ed. M. Hiriyanna. Delhi : Motilal Banarasi Das Publishers Limited, 2008. Reprint.
- The Nature of Vyāpti according to the Navya-Nyāya. Ed. Tarasankar Bhattacharya. Kolkata : Sanskrit college, 1870.
- The Six Systems of Indian Philosophy. Ed. Friedrich Max Muller. New Delhi: Associated Publishing House, 1899 (1st Published).

---